CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Other Manuscripts
Manu 3

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्ति श्रीमद्भरद्वाजमहर्षिवंशोद्भसुकुलोपनामकश्रीमत्पण्डि॥
तेनिरानन्दसूरिसूनोःश्रीमत्पण्डित गोपीलालस्येदंपुस्तकस्य॥

पञ्जिका
१

अथ मंगलाचरणम् ॥ १
अथ ग्रंथावतारः ॥ १
तत्रैव ग्रंथकर्त्ताः ॥ १
गुरुशुक्रयोर्बालवृद्धास्तगेमल १
मासे च ॥ १
व्रतारंभोद्यापनादिन कार्य्यम् १
सिंहस्थे गुरौ व्रतारंभप्रतिष्ठादि
न कार्य्यम् ॥ ॥ २
अथ व्रतलक्षणं व्रतकालदेशौ २
खण्डतिथिषु प्रारंभसमापने नस्तः २
अथ देशाचारव्यवस्था ॥ ३
अथ दमनविभागनिर्णयः
अथ व्रताधिकारिणः ॥ अथ द्विरागमन निमित्तानि ३
स्त्रीविषये विशेषः ॥ ४
अथ व्रतधर्माः ॥ ॥ ५
अथ उपवासधर्माः ॥ ६
अथ व्रतहविष्याणि ॥ ६
अथ पञ्चरत्नस्वरूपं नवरत्नानि च ८
अथ पञ्चपल्लवानि ॥ ८
तत्रैव पञ्चगव्यस्वरूपम् ९
तत्रैव पञ्चगव्यमन्त्राः ॥ ९
अथ पञ्चामृतस्वरूपं ॥ ९
तत्रैव षड्रसाः ॥ ॥ ९
तत्रैव चतुःसमगन्धः ॥ ९
तत्रैव यक्षकर्दमगन्धः ॥ सर्वगन्धानि च ९
तत्रैव सर्वौषध्यः ॥ ॥ ९
सौभाग्याष्टकद्रव्याणि ॥ ९
अष्टाङ्गार्घ्यलक्षणम् ॥ १०

राम
१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पंचवर्णानि ॥ १०
कौतुकाख्यद्रव्याणि १०
तत्रैवसप्तमृद: ॥ १०
सप्तधातव: ॥ १०
सप्तधान्यानि सर्व्वबीजानि १०
तत्रैवसप्तदशधान्यानि १०
तत्रैवाष्टादशधान्यानि १०
दशविधशाकानि १०
अथकुंभलक्षणम् १०
अथप्रतिमालक्षणम् ॥ ११
तत्रैवहोमसंख्या ॥ ११
अथहोमद्रव्याणि ॥ ११
अथमंत्रदेवता: ॥ ११
प्राणाद्यादिहोममंत्रा: ॥ ११
अनादिष्टकथनं ॥ ११
द्रव्यप्रतिनिधिस्तत्रैव ॥ ११
अथपवित्रलक्षणम् ११
अथसमिध: अथधूप: ॥ ११
अथहोमयोग्यपात्राय: ॥ ११
सुवर्णादीनांमानं ॥ ११
रजतमानं· ताम्रमानं ॥ ११
अथधान्यमानं ॥ १२
अथहोमद्रव्यमानं ॥ १२
अथक्षेत्रविस्तरणं तत्रैवतत ॥ १२
संख्या ॥ १३
अथसर्वतोभद्रमण्डलम् ॥ १३
अथलिंगतोभद्रमण्डलम् ॥ १३
तत्रैवचतुर्लिंगलक्षणं १४
अथद्वादशलिंगोद्भवल
क्षणम् ॥ १५
अथमण्डलदेवता: ॥ १५
अथस्रुवालक्षणम् ॥ १६
अथोपचारा: ॥ १७
उद्यापनात्तुक्तोविधि: १८
अथव्रतभंगेसंपूर्णविधि: १८
उपयुक्तपदार्थानि १८

ॐ अस्य चंदनमंत्र:॥ [illegible] केशव:॥ [illegible] देवस्त्रयो देवा: कुशे स्थिता इति॥ १॥ क्षीरसागर संभूतं बिल्वपा
पप्रण[illegible]॥ नमो नम:॥ [illegible] बिल्वो [illegible] दोषो न विद्यते॥ इति बिल्वपत्रसंग्रहमंत्र:॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्रिका २

अथसर्वव्रतेषुसामान्यपूजाविधिः॥	१९	वारसमारम्भरोटकव्रतम्	२४	तत्रैवछत्रादिदानविधिः॥	३२
अथादौप्रतिपद्व्रतानि॥	२०	अथकार्त्तिकशुक्लद्वितीयाव्रतम्	२६	अथश्रावणशुक्लतृतीयायांस्वर्ण	
तत्रैवप्रतिपन्निर्णयः॥	२०	तत्रैवभ्रातृद्वितीयाविधिः॥	२६	गौरीव्रतम्॥	३४
अथचैत्रशुक्लप्रतिपदिवत्सरा॥		अथतृतीयाव्रतानि॥	२७	अथोद्यापनम्॥	३४
रम्भः॥	२०	तत्रैवसौभाग्यशयनव्रतम्॥	२७	अथकथा॥	३५
अथारोग्यप्रतिपद्व्रतम्॥	२२	तत्रैवगौर्यान्दोलोत्सवः॥	२८	अथहरितालिकाव्रतम्॥	३६
अथविद्याव्रतम्॥	२३	अथचैत्रशुक्लतृतीयारुन्धतीव्रतं	२९	अथकथा॥	३७
अथतिलकव्रतम्॥	२३	तत्रैवकथा॥	२९	अथोद्यापनम्॥	४०
अथ श्रावणशुक्लप्रतिपत्सोम		अथवैशाखशुक्लतृतीयायामक्षयव्रतं	३१	अथहस्तगौरीव्रतम्॥	४१

रामः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथकोटीश्वरव्रतम्॥	४२	अथसिद्धिविनायकव्रतम्	५४	अथकरकचतुर्थीव्रतम्	६६
अथवृहद्गौरीव्रतम्॥	४३	अथाङ्गपूजा॥	५५	अथकथागौरीचतुर्थीव्रते च	६६
तत्रैवकथा॥	४३	तत्रैवपत्रिकापूजा॥	५५	अथपञ्चमीव्रतानि॥ ५	६८
अथसौभाग्यसुन्दरीव्रतम्॥	४५	अथकथा॥	५६	अथकथा॥ श्रीपञ्चमीपूजा	६९
अथचतुर्थीव्रतानि॥ ४	४८	तत्रचंद्रदर्शनेनिषिद्धम्ः	५७	अथऋषिपञ्चमीव्रतपूजा॥	७०
तत्रैवसङ्कष्टचतुर्थीव्रतम्	४९	अथस्यमन्तकोपाख्यानम्॥	५७	अथशिष्टाचारव्रतम्ः	७०
कथा च॥	५०	अथकपर्दीश्वरविनायकव्रतम्	६२	अथपुनःकथा॥	७२
अथदूर्वागणपतिव्रतम्	५२	अथब्रह्मचारीपूजा॥	६३	अथोद्यापनम्॥	७३
अथभानुवारयुक्तदूर्वागणपतिव्रतं	५२	तत्रैवकथा॥	६४	अथनागपञ्चमीव्रतम्	७४

पञ्जिका ३

ललिताव्रतम्

तत्रैवनागदष्टव्रतम् ७५

अथापाङ्गललिताव्रतम् ७६

अथकथा ॥ ७८

अथषष्ठीव्रतानि ॥ ८२

अथकपिलाषष्ठीव्रतम् ८४

अथकथा ॥ ८६ अथस्कन्दषष्ठीव्र ८७

अथसप्तमीव्रतानि ॥ ८८

तत्रैवगङ्गोत्पत्तिः ॥ ८८

अथशीतलाव्रतानि ॥ ८८

अथकथा ॥ ८९

अथमुक्ताभरणव्रतपूजा ॥ ९०

अथकथा ॥ ९१

अथरथसप्तमीव्रतम् ॥ ९३

अथास्यामेवस्नानविधिः ॥ ९५

अथअचलासप्तमीव्रतम् ॥ ९५

अथपुत्रसप्तमीव्रतम् ॥ ९६

अथाष्टमीव्रतानि ॥ ९७

तत्रैवबुधाष्टमीव्रतम् ॥ ९७

अथकथा ॥ ९८

अथोद्यापनम् ॥ १००

अथदशाष्टमीव्रतम् ॥ १०१

अथकथा ॥ १०१

अथजन्माष्टमीव्रतपद्धतिः ॥ १०३

तत्रैवव्रतप्रयोगः ॥ १०६

अथजन्माष्टमीव्रतम् ॥ १०८

तत्रैवव्रतकथा ॥ ११०

तत्रव्रतोद्यापनम् ॥ ११२

रामः ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ उद्यापनमथ
१३३

२ अथपरमनामो
पापन) पृष्ठ २
१४४

अथज्येष्ठसैत्रोप्याव्रतम् ॥	११५	अथदशमीव्रतानि ॥ १०	१५४	अथनिर्जलैकादशीव्रतम् ॥	१६८
अथदूर्वाष्टमीव्रतम् ॥ १२०	११८	तत्राशादशमीव्रतम् ॥	१५४	अथशयन्यैकादशीव्रतम् ॥	१६९
अथमहालक्ष्मीव्रत. कथा च ॥	१२५	अथदशहराव्रतं गंगापूजा च ॥	१५६	तत्रैव चातुर्मास्यव्रतानि ॥	१६९
अथाशोकाष्टमीव्रतं ॥	१२४	अथदशावतारव्रतम् ॥	१५६	अथगोपद्मव्रतं ॥	१७२
अथनवमीव्रतानि ॥ ९	१२४	अथविजयादशमीव्रतम् ॥	१५७	अथकथा ॥	१७३
चैत्रशुक्लनवमीरामनवमी ॥	१२४	अथैकादशीव्रतानि ॥ ११	१५८	अथबोधिन्यैकादशीव्रतम् ॥	१७६
अथरामनवमीव्रतपूजाविधिः ॥	१२८	तत्रशुद्धाविद्धानिर्णयः ॥	१५८	अथहरिबोधनविधिः ॥	१७६
अथाश्विननवम्यां देवीपूजा ॥	१४६	अथैकादशीव्रतोद्यापनम् ॥	१६३	अथभीष्मपंचकव्रतम् ॥	१७७
अथावरणपूजा ॥	१५२	तत्रैव कथा ॥	१६३	अथवैतरणीव्रतम् ॥	१८०

लेखमेतत्सामालिख

Nepal Sanskrit University, Balmeeki Campus...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पंजिका
४

अथसोद्यापनंशुक्लैकादशीव्रतम् १९१
अथकृष्णैकादशीव्रतम् १९२
अथउभयैकादशीव्रतम् १९५
अथद्वादशीव्रतानि ॥ १९६
तत्रभाद्रशुक्लश्रवणाद्वादशीव्रतं १९६
अथाग्निपुराणोक्तकथा ॥ १९७
द्वादश्यामुपोषणपक्षेत्रयोदश्यां
पारणम् ॥ १९९
अस्यामेववामनजयंतीव्रतम् २०२
अस्यापूजाक्रमः ॥ २०४

अथसन्तूपद्वादशीव्रतम् २०५
अथत्रयोदशीव्रतानि ॥ २०८
तत्राषाढशुक्लत्रयोदशीजया
पार्वतीव्रतम् २०८
अथगोत्रिरात्रिव्रतम् २१०
अथगोत्रिरात्रिव्रतान्तरम् २१२
अथोद्यापनविधिः ॥ २१५
अथाशोकत्रिरात्रव्रतम् २१६
अथशनिप्रदोषव्रतम् २१८
अथानंगत्रयोदशीव्रतम् २२२

अथचतुर्दशीव्रतानि ॥ २२५
तत्रवैशाखशुक्लनृसिंहचतु
र्दशीव्रतं कथा ॥ २२५
अथभाद्रशुक्लचतुर्दश्यामनं
तव्रतम् २२८
अथव्रतविधिः ॥ २२८
पूजाविधिश्च ॥ २२८
अथानन्तव्रतकथा ॥ २३०
अथोद्यापनम् २३४
तत्रैवान्यप्रकारेणोद्यापनम् २३७

राम:
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथनष्टडोरकप्रायश्चित्तम्	२३८
अथापरमनन्तोव्रतोद्यापन॥	२३९
अथभाद्रशुक्लचतुर्दश्यांकद॥	
लीव्रतम्	२४१
तत्रैवपूजामंत्राणि॥	२४१
अथकथा॥	२४२
अथोद्यापनम्	२४३
कार्त्तिककृष्णनरकचतुर्दशी॥	२४४
कार्त्तिकशुक्लवैकुंठचतुर्दशीव्रतम्	२४५
अथामौनमाघकृष्णचतुर्दशी॥	
शिवरात्रिव्रतम्	२४६
अथव्रतविधिः॥	२४८
तत्रैवषोडशोपचारपूजामंत्रः	२४९
अथकथा॥	२४९
अथाशिवरात्रिव्रतोद्यापनम्	२५१
अथपूर्णिमाव्रतानि॥ १५	२५२
ज्येष्ठपूर्णिमायांवटसावित्रीव्र	२५३
अथव्रतविधिः॥	२५४
अथकथा॥	२६१
अथाषाढपौर्णमास्यांगोपद्मव्र	२६३
अथकथा॥	२६७
अथाषाढपौर्णमास्यांको॥	
किलाव्रतम्	२६८
तत्रैवपूजामंत्राणि॥	२६९
अथकथा॥	२७०
अथाषाढाधिमासेकोकिलाव्रतं	२७१
अथोद्यापनम्॥	२७२
अथश्रावणशुक्लपौर्णमास्यां	
रक्षाबंधनम्	२७४
अथभाद्रशुक्लपौर्णमास्यांउमा	
महेश्वरव्रतम्	२७५

Nepal Sanskrit University, Balmeeki Campus

पंजिका ५

अथाश्विनपौर्णमास्यांकोजागरव्रतं	२८१	अथचातुर्मास्यव्रतानि॥	२९८	अथमलमासेव्रतांतरं॥	३११
अथसामान्यपूर्णिमापूजाविधिः	२८२	तत्राषाढादिश्वाश्विनांतस्त्वल्लिक	२९९	तत्रैवदेवीपुराणीयव्रतं॥	३१२
तत्रैवसोद्यापनारुद्धनारदीयकथा	२८४	अथवरलक्ष्मीव्रतम्॥	३००	अथविशेषपूजा॥	३१३
तत्रैवभविष्यपुराणीयाकथा॥	२८६	तत्रैवपूजाविधिः॥	३००	अथवारव्रतानि॥	३१३
अथामावास्याव्रतानि॥	२८८	अथकथा॥	३०१	तत्रवारव्रतम्॥	३१३
तत्रमार्गशीर्षामायांगौरीतपोव्रतं	२८९	अथदानफलव्रतम्॥	३०४	चाश्विनादिरविवारव्राशादित्यव्र	३१३
तस्यैवकालिकापुराणमहाव्रतं	२९०	तत्रैवपूजामंत्राणि॥	३०४	अथसोमवारव्रतम्॥	३१६
अथमाघामायामर्घोदयव्रतं॥	२९१	अथचातुर्मास्यधारणपारणव्रतं	३०५	अथकथा॥	३१७
अथसोमवत्यमावास्याव्रतम्॥	२९२	अथाश्विनशुक्लैकादश्यादिमा		अथभौमवारव्रतम्॥	३१८
अथतद्व्रतकथा॥	२९४	सपर्यंतमासोपवासव्रतम्॥	३०६	अथपूजाविधिः॥	३१९
अथोद्यापनम्॥	२९८	अथमलमासव्रतं॥	३०८	अथकथा॥	३२०

रामः ५

पंजिका
६७

अथोद्यापनम् ॥ ३२१
अथसंक्रांतिव्रतानि ॥ १ ३२२
तत्रधान्यसंक्रांतिव्रतम् २ ३२२
अथलवणसंक्रांतिव्रतम् ३ ३२२
अथभोगसंक्रांतिव्रतम् ॥ ४ ३२३
अथरूपसंक्रांतिव्रतम् ५ ३२३
अथतेजसंक्रांतिव्रतं ॥ ६ ३२३
अथसौभाग्यसंक्रांतिव्रतम् ७ ३२३
अथतांबूलसंक्रांतिव्रतम् ८ ३२३
अथमनोरथसंक्रांतिव्रतम् ९ ३२४
अथविशोकसंक्रांतिव्रतम् १० ३२४
अथायुःसंक्रांतिव्रतम् ॥ ११ ३२४
अथसंक्रांतिव्रतम् ॥ १२ ३२४
अथसंक्रांतिव्रतोद्यापनम् ॥ ३२४
अथघृतस्नपनम् ॥ ३२५
अथघृतकंबलम् ॥ ३२६
अथव्यतीपातयागव्रतम् ३२६
तत्रैवनारदीयपुराणोव्यतीपातव्रतम् ३२८
अथलक्षपूजाविधिः ॥ ३२९
अथलक्षपूजाव्रतोद्यापनम् ॥ ३३०
तत्रलक्षनमस्कारविधिः ॥ ३३१
तत्रलक्षवर्तिदानव्रतम् ३३३
तत्रैवसोद्यापनाकथा ॥ ३३३
अथागस्त्यार्घ्यः ॥ ३३६
अथाश्वत्थकल्पः ॥ ३३८
अथाश्वत्थोपनयनम् ३४०
अथसोद्यापनाश्वत्थव्रतं ३४१
अथलिंगोद्यापनम् ३४२
अथान्यप्रकारोद्यापनम् ३४२
अथतुलसीविवाहविधिः ॥ ३४२
अथानुक्रमणिकाध्यायः ॥ ३४३
इतिव्रतार्कपंजिकासमाप्ताः ॥

अथकरगरकपूजा
विधिः ॥४ ॥ ३२५

रामः
६७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Camp

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मा.मा. श्रीगणेशायनमः ॐनमोवासुदेवाय नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततोजयमुदीरयेत् १ ऋषयऊचुः
मुनिश्रेष्ठावालखिल्याःसर्वलोकहितेच्छया कलौकलुषचित्तानांलोकानांदीनभागिनाम् ज्ञानविज्ञानहीनानांशिश्नोदरस्वभि
नाम् क्षणभंगुरबुद्धीनांस्वार्थतत्परमानसम् कथंप्रसन्नोभगवान्भविष्यतिजनार्दनः श्रुतंवेद्भास्करमुखात्तद्व्रतमुत्तमम्
नश्वरंजायतेचित्तंक्षणमात्रंजपादिषु वाह्यपूजासमर्थानामुद्धारायसुखायच इहलोकेपरत्रापियेनपुण्यमवाप्यते वाल
खिल्याऊचुः सम्यक्पृष्टंमुनिवरैःकलिबुद्धिप्रभञ्जिताः विचरन्तिनरामूढानानामार्गोपसेवकाः तेषामर्थेभास्करेणप्रोक्तंव्रत
मनुत्तमम् ३ भास्करउवाच शृण्वन्तुभोभवन्तोपिवालखिल्याश्चनारद सनकाद्याश्चसन्तोपिशृण्वन्तुव्रतमुत्तमम् मत्परि
भ्रमणेनैवजायतेसचराचरम् तेनैवहिक्षमायातिजायतेन्तर्हितंततः ब्रह्मविष्णुमहेशाद्यैरेकदाप्रार्थितस्त्वहम् कथंतवगतिज्ञा
नंजायतेतत्रदस्वनः एवंतैःप्रार्थ्यमानोहंहताःस्वांगांशसंभवाः चत्वारएवपुरुषायुगरूपामहोज्वलाः तत्राद्यःसात्विकःश्वेतवस्त्र
माल्यविभूषणः ज्ञानमुद्रांकरेबिभ्रद्ध्यानस्तिमितलोचनः द्वितीयोराजसोजातोदण्डपुस्तकधारकः रक्ताम्बरान्वितःस्रुक्स्रुवकुलमाभि
भागकृत २ तृतीयस्तामसोहोताप्रणीतापशुघातकः पठन्वेदंगीतनृत्यकरस्त्वोकैःसमावृतः चतुर्थोमदिरामत्तःकराभ्यां
रूपीडकः कृष्णवर्णोतिसर्वतिहास्यघूर्णितलोचनः सूर्यउवाच एतान्पश्यन्तुभोदेवाःकारणेमेगतेःस्थितम् उत्पत्तिस्थितिना
शायसर्वेषांपर्ययाम्यहम् इत्युक्त्वाभास्करस्तूर्णंमेदिनीतांव्यगाहत ब्रह्माद्याःपरिपप्रच्छुःरुतंप्रेक्ष्यशनैःशनैः ४ देवाऊचुः
कथंश्रीभास्करगतिःकथंकालांशकोभवान् एषनःसंशयःकिंकार्यंत्वयातत्रणमुच्यताम् ५ सूतउवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वंस्त्रष्टोसि यदारभ्य ब्रह्मस्त्राद्दिवसाश्रितः प्रयुतैकं सप्तलक्षं च अयुतं चाष्टसंख्यकम् मह्यं त्रेतोरवर्षाणां प्रेर्यन्ति तु मयाजनाः ध्या
नायतपसे ज्ञानमोक्षसाधनकर्मणि मयि नास्ति नरः कोपि स्वल्पायुश्चिन्तयान्वितः अल्पनिद्रानराः सर्वे रविमण्डलभेदिनः त्रे
त्रेतोवाच एतस्मादुत्तमश्चाहं त्रेतानाम महाबलः नराणां सुखकरोत्यन्तं स्मात धर्मविनाशकः मया वर्णाव्यवस्था च जातिभेदाः पृथक्
पृथक् उत्पादिता राजनीतिः सौख्यानि विविधानि च उच्चावचास्तथा धर्मास्मात धर्मविनाशकाः प्रयुतैकं द्विलक्षं च नवसंख्या
युतानि च षट्सहस्राणि मे मानं बुद्धिं संप्रीणयाम्यहम् २५ द्वापर उवाच शृण्वन्तु देवा महाश्चायुगानां युगमुत्तमम्
द्वापरं नाम विख्यातं नाना सौख्य प्रदायकम् अहं बुद्धिं प्रेरयामि सर्वेषां सुखहेतवे षडयुतं चाष्टलक्षं चतुःसंख्यसहस्रकम् तत्कालस्य
प्रमाणं तु प्रेर्यन्तो हि मया जनाः जैमिनेस्तु स्वरूपेण कर्ममार्गाः प्रकाशिताः वर्णभेदाः कृतास्मात्तानतेषां ज्ञानवर्जैर्विधिः विचारितस्त्वनेना
तो मया धर्माः प्रकाशिताः नामसाश्च भाविष्यन्ति मयि भूपाः सहस्रशः अन्योन्यं तेषां शिरश्छेदाद्यास्यन्ति विलयं ध्रुवम् ब्राह्मणाश्चैव स
र्वेषामहं ज्येष्ठोस्मि देवताः ३० कलिरुवाच शाधिक्कथं कर्णकटु प्रोच्यते भ्रातृभिः कथम् मन्महात्म्यमजानद्भिर्ज्ञानैर्बुद्धिवर्जि
तैः एतद्धर्मे विहीनोहं कलिः सत्यविवर्जितः अयुतं च चतुर्लक्षं सहस्राद्वितयं तथा मत्कालपरिमाणं तु प्रेरयामी हशी धियम् प
स्त्रीगमने द्यूते चौर्ये कुत्सनिकृष्टके पैशून्ये वृत्तिलोपे च मद्यमांसादिभक्षणे मयि स्वल्पायुषो लोका बहुधा विधवाङ्गनाः सर्वेलो
काजारजाता शिश्नोदरपरायणाः वाममार्गरता भ्रातृभगिनीभोगकारकाः वार्धके बहुधा सर्वे निर्धना रोगसंयुताः ब्राह्मणाः शू
द्रकर्माणः शूद्रा ब्राह्मणवृत्तयः गुरुद्रूहः सर्वजनाः पतित्यक्षप्रतिसङ्गरे स्वल्पेन हेतुना नार्यो भर्तृत्यागविधायकाः ३७ जानिव
न्ध्याकाकवन्ध्यामृतवन्ध्याभवन्ति च विद्यालक्ष्मीकलाद्याश्च नीचेषु रमन्ति च दासीभोगरता लोकाः परित्यज्य कुलस्त्रियः

कार्तिक मा॰ एवंधर्मंकरिष्यामिभ्रात्धर्मविनाशकम् एतन्ममलरूपंतुयोजानातिसपण्डितः सर्वधर्मपरित्यक्तंमाजानीतयुगंकलिम् ४० देवाज
ञ्ः कलेतवसमोनास्तिकश्चिच्चित्तविमोहकः किंचिद्व्रतंवादानंवातेनमुक्तोभवेज्जनः कृत्वाकृपांवदक्षिप्रंविष्णुलोकंव्रजेद्यथा
कलिरुवाच अनूरुवदताप्रोक्तंभास्करेणश्रुतंमया मत्त्यापिस्वर्गगमनकारणंश्रूयतांतुतत् सूर्यउवाच द्वादशानांतुमासानां
मार्गशीर्षोतिपुण्यदः तस्मात्पुण्यफलःप्रोक्तोवैशाखोनर्मदातटे ततोलक्षगुणःप्रोक्तःप्रयागेमाघमासकः तस्मान्महाफलःप्रो
क्तःकार्तिकोजलमात्रके एकतःसर्वदानानिव्रतानिनियमास्तथा एकतःकार्तिकस्नानंब्रह्मणातुलयाधृतम् सन्ततिश्चैवसंपत्तिः
कलौयेषांप्रदृश्यते अवश्यंतैःकृतंविद्धिकार्तिकस्नानमादरात् स्नानंचदीपदानंचतुलसीवनपालनम् भूमीशय्याब्रह्मचर्यं
तथाद्विदलवर्जनम् विष्णुसंकीर्तनंसत्यंपुराणश्रवणंतथा कार्तिकेमासिकुर्वन्तिजीवन्मुक्तास्तएवहि नकार्तिकसमंधर्ममर्थं
नोकार्तिकात्परम् नकार्तिकसमंकाम्यंमोक्षदंनचकार्तिकात् युधिष्ठिरेणधर्मार्थमर्थार्थंचध्रुवेणच श्रीकृष्णेनचकामार्थं
मोक्षार्थंनारदेनच कृतमेतद्व्रतंतस्मात्कुष्ठंकृष्णप्रियंचाहि ५० ⁂ इतिसनत्कुमारसंहितायांकार्तिकमाहात्म्ये प्रथ
मोध्यायः १ ⁂ अरुणउवाच ब्रूहिभास्करसर्वात्मन्कदारभ्यव्रतंकृतम् सकलंजायतेसम्यक्कावपूज्यात्रदेवताः ॥
सूर्यउवाच अहंविष्णुश्चसर्वेशश्चदेवीतिथेस्तथा एकोहंपंचधाजातोनानादेहस्वरूपधृक्यथा अस्माकंसर्वदेवैतैर्भेदाविद्धिखगे
श्वरः तस्मात्तोषंप्रमाणैःशान्तैःशैवैश्चवैष्णवैः कर्तव्यंकार्तिकस्नानंसर्वपापापनुत्तये सूर्यस्यप्रीतयेकार्यंतुलासंस्थेदिवा
करे इषपूर्णांसमारभ्ययावत्कार्तिकपूर्णिमा तावत्स्नानंविधातव्यंशिवसंतुष्टयेनरैः ५ देवीपक्षंसमारभ्यकृत्वाप्यकार्ति श्रीः
कमवेत् तावत्स्नानंविधातव्यंदेवीसंतुष्टयेनरैः देवीपक्षंसमारभ्यकृष्णायांकार्तिकेभवेत् चतुर्थीतावदेवस्यात्स्नानंगणपतुष्टये १ २

गणपती चतुर्थी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकादशीं समारभ्य ह्याश्विनस्य सितेतराम्· एकादशीं कार्तिकस्य शुक्लायां परिसूर्यते· येन व्रतं कृतं तस्मात्परितुष्टो जनार्दनः
नकार्तिकसमो मासो न काशीसदृशी पुरी· न प्रयागसमं तीर्थं न देवः केशवात्परः· प्रसङ्गाद्वालकाकारैर्ज्ञात्वाऽज्ञात्वा कृतं भवेत् १०
स्नानं कार्तिकमासस्य न पश्येद्यमयातनाम्· स्नानार्थं चेन्न सामर्थ्यं दद्यादन्यस्मै धनादिकम्· स्नातस्य तस्य हस्तस्य ग्रहणात्तु पापभा
ग्भवेत् अथवा कार्तिकस्नानं ये कुर्वन्ति द्विजातयः तेषां प्रावरणं दत्वा स्नानजं फलमाप्नुयात् राधादामोदरः पूज्यः कार्तिके तु विशेष
तः स्वर्णो वाप्यथ रूप्यस्य अभावे शुल्कजामपि मृज्जां वा चित्रजातां वाऽथवापि स्वविचित्रिताम्· दामोदरस्य राधायास्तुलस्यर्धार्चय
न्तिये· मूर्तिं तेतु नराः सत्यं जीवन्मुक्ता न संशयः २५ अपि पापसहस्रौघैः कार्तिकस्नानतो नराः अचिरूपमुक्तो भवति नात्र कार्या विचा
रणा· कृतं यैः कार्तिके मासि दीपदानं विधानतः दृश्यन्ते ये रत्नभाजस्ते त एव प्रकीर्तिताः यो वेदाभ्यासिने दद्याद्दीपार्थं तैलमादरा
त् कोवा तस्य फलं वक्तुं भुवि निःश्रुतिमानवः दीपदानासमर्थश्चेत्परदीपं तु रक्षयेत्· तुलस्यभावे कर्तव्या पूजा धात्रीतले स्वयं मुख्य
पूजाविधानं तु कर्तव्यं सूर्यमण्डले· अप्रत्यक्षाः सर्वदेवाः प्रत्यक्षो भगवानयम्· सर्वेषामेव नेत्रोऽयं जगज्जीवयतेऽनतम्· एतद्भूस
मुद्भूता रुद्राद्याः सर्वदेवताः प्रत्यक्षो भगवानेष चतुर्वेदैश्च गीयते· सर्वदेवाः कालवश्याः कालकालो दिवाकरः २२ एतस्य मण्डले पू
ज्याः सर्वदेवाः प्रयत्नतः एतदाराधनेऽशक्तः प्रतिमां पूजयेन्नरः प्रतिमातोऽधिकं पुण्यं ब्राह्मणस्य तु पूजने· अविद्यो वा सविद्यो वा ब्रा
ह्मणो मामकी तनुः प्रायः कलियुगे विप्राः शूद्राचारपरायणाः वाममार्गरताः प्रायः संध्यास्नानविवर्जिताः २५ ईदृशाश्चापि सं
पूज्या ब्रह्मबीजसमुद्भवाः महादुर्गन्धयुक्तोपि गुणवत्वात्तु सेव्यते· यथा रसोनश्च तथा द्विजाः पूज्याः प्रयत्नतः रुद्रयापवचात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिकमा. गावोविश्वभक्षणेतत्पराः तथापिताःपूजनीयालोकद्वयफलप्रदाः तथापिताःपूजनीयालोकद्वयफलप्रदाः ब्रह्मबीजेष्वपिश्रेष्ठः
३ कृतोपनयनस्ततः तस्मादपिश्रेष्ठतरोयःसावित्रींजपेद्वसौ तस्मादपिश्रेष्ठतरोयःसावित्रींजपेद्वसौ तस्माच्छ्रेष्ठतरस्सन्ध्यांयःक
रोतिद्विजोत्तमः ततोप्यधिकगुणोज्ञेयोयःस्नानंकुरुतेद्विजः उत्कृष्टस्ततोज्ञेयोऽस्मात्स्वाचारेणसंयुतः ३१ ततोप्यधीतशास्त्रस्तुवे
दवेत्तात्ततोपिच वेदार्थवेदवेत्ताचसदाचारपरायणः अपरान्नरुचिःस्वस्त्रीनिरतःस्वोदयेनतथा मध्याह्नेप्रयतःसन्ध्यांयःकरोति
द्विजोत्तमः अयाचितव्रतोहोमीदेवब्राह्मणपूजकः विभज्यभुक्सत्यवादीद्विजोयत्रतुतिष्ठति कलिकालोपसर्गाद्यास्तस्थलेनवि
शन्तिच तस्मात्सर्वप्रयत्नेनकार्त्तिकेद्विजमर्चयेत् ३५ दरिद्रोदानपात्रंस्याद्विद्यावांस्तुविशेषतः मोक्षायैकाकिनेदद्याद्दानंद
माकुलायच सपत्नीकायधर्मार्थविशेषेणकुटुंबिने तीर्थप्रतिग्राहिणेचदत्तंयत्तीर्थभोजिने धनुर्धरायवद्दत्तंयद्दत्तंप्रेतभोजिने
वैद्यविद्याजीविनेचतथानक्षत्रसूचिने इत्यादीयतेदानंयेनासौनरकंव्रजेत् सर्वत्रपूजयेद्विप्रंसपत्नीकंद्विजोत्तमः विप्राभावेपूज
नीयागावःकृष्णामनोहराः कपिलागोषुचश्रेष्ठातदभावेचपिंगला तदभावेसितातस्याअभावेचसितेतरा तदभावेचयाका
चिद्दोग्ध्रीवत्सेनसंयुता विष्णोर्मूर्तिर्जगन्माया स्थावरातिप्रवक्ष्यते शूद्रस्यापितमूर्तीनांनमस्कारंकरोतियः पितृभिर्निरयंया
तिदशपूर्वैर्दशापरैः शूद्रार्तिकस्यसंस्पर्शाद्दहेदासप्तमंकुलम् ४२ तस्माद्द्विजार्यैविप्रैर्यास्थापितातांसमर्चयेत् ततोपियादेव
ताभिःकृतासाभुक्तिमुक्तिदा मूर्त्यभावेपूजनीयोह्यश्वत्थोयावटोथवा कार्तिकेतुलसीशाकंताम्बूलंवानराधमः अज्ञानाज्ज्ञान
तोवापिभुंजानोनरकंव्रजेत् धात्रीछायातलेयेनसम्यग्भुक्तंतुकार्तिके दम्पतीभोजनंदत्तमन्नदोषात्प्रमुच्यते संपूर्णंकार्तिकं श्री:
येतुसम्पूज्यामलकींशुभाम् राधादामोदरप्रीत्यैभोजनीयेचदम्पती पश्चात्स्वयंतुभुञ्जीतनश्रीस्तस्यक्षयंव्रजेत् शालग्रामशि ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लोचके सदा सन्निहितो हरिः तस्मात्सर्वप्रयत्नेन शालग्रामं प्रपूजयेत् ४८ ॥ इति श्रीसनत्कुमारसंहितायां कार्तिकमहात्म्ये द्वितीयोध्यायः २

ऋषयऊचुः शिवस्य किं कृतं गोभिर्वा ब्राह्मणैः केन हेतुना उत्कण्ठा जायते स्माकं वालखिल्या वदन्तु तान् वालखिल्या ऊचुः ए
कदा हंससमारुह्य विधाता समुपागतः कृत्वा चतुर्विधां सृष्टिं तत्कौतुकसमुत्सुकः पश्यन् हिमाचलं दिव्यं नानामृगसमन्वितम् ग
ङ्गादिकसरिद्भिश्च पूज्यमानमितस्ततः नाना ऋषिगणाकीर्णं सिद्धगन्धर्वसेवितम् पक्षिणां कलनिह्रादैर्मोहयन्तं श्रुतिद्वयम् नाना
पक्षिगणाकीर्णमगम्यं च क्वचिद्भ्रमात् क्वचिद्दुःश्रियं विभ्राद्धिमैर्न हरितं क्वचित् मेघसंसर्गतः श्यामच्छायां च मेघजां तथा प
श्यन्स कौतुकं दिव्यं गङ्गाद्वारमुपागमत् तत्रापश्यदृषीन्सर्वान्कार्तिकस्नानतत्परान् विष्णुभक्तिपराञ्छुष्टान् राधादामोदरार्चकान् ७
वासुदेव जगन्नाथ हरे विष्णो जनार्दन इत्यादिनाम ब्रुवतो दृष्ट्वा कोपसमन्वितः ब्रह्मोवाच इह तु वृद्धिता कस्माद्भवतां समुपागता पि
तामहं परित्यज्य कोत्र देव उपासते अहं सर्वस्य जगतः कर्ता मां त्यज्य भूतले आराध्यते तावदूर्ध्वं नो चेच्छापं ददाम्यहम् वसुन्धरा भवन्त
श्च नाशनीया मया ध्रुवम् वालखिल्या ऊचुः इति ब्रह्मवचः श्रुत्वा त्रस्तास्ते ऋषिसत्तमाः ध्यायन्तश्चेतसा विष्णुं प्रत्यक्षो भूज्जनार्दनः विष्णुरुं
निमित्तमात्रं त्वं ब्रह्मन्विश्वस्यास्य तु पालकः नारायणः सोत्र विप्रैः पूज्यते कार्तिके सदा ब्रह्मोवाच अहं पितामहः साक्षाद्विश्वकर्ता जग
द्गुरुः पूज्योस्मि सर्वलोकानां वेदानामिति संमतम् वालखिल्या ऊचुः एवं तयोर्विवदतो न कस्यापि पराजयः तदा विष्णुरुवाचेदं ब्रह्म
न् शृणु वचो मम आवयोर्यश्च माहात्म्यं सामर्थ्यं यत्तदावयोः महेशो वेत्ति यत्तत्त्वं तत्र न्याय्योस्तु चावयोः ब्रह्मणा तु तथेत्युक्तं जग्मतुः
काशिकां प्रति प्रणिपत्य महादेवं ब्रह्मा वचनमब्रवीत् ब्रह्मोवाच देवाकर्णय विश्वस्य कर्ताहं च पितामहः १७ मदाज्ञानुपरो विष्णुः

निकि·मा· कथंपूज्योभविष्यति· विष्णुरुवाच· देवदेवमहादेवसदाधर्मासनस्थित· कःश्रेष्ठआवयोर्मध्येसत्यंब्रूहिजगत्प्रभो श्रीविष्णुरुवाच·
४ शिवउवाच· एतन्ममममहालिङ्गंकिंपदूर्ध्वंतलेकियत् योज्ञास्यतितेतदन्तंसलोकेपूज्योभविष्यति तस्मादेकत्रयाहित्वंब्रह्मन्नवि
ष्णोत्वमेकतः एतद्वचनमाकर्ण्यवेधाश्चोपरिसंययौ· अधस्ताच्चगतोविष्णुर्ययौपंचशतंसमाः २२ विश्रान्तःखेदखिन्नश्चन
प्राप्नोन्तस्ततस्यच· पुनरागत्यचययौप्रणमन्रुद्रमादरात् रुद्रउवाच· कथमन्तोस्तिलिंगस्यकथ्यतांमधुसूदन कियद्दूर्
वसेःप्राप्तः किंचिन्हंतत्रवर्तते· विष्णुरुवाच· खेदखिन्नोस्मिभगवन् गताःपंचशतंसमाः सप्तपातालमुल्लंघ्यतथाब्रह्माण्डगो
लकम् भास्करस्यातपोनास्तितत्रापश्येगतोस्म्यहम्· तेजोरूपस्यलिङ्गस्यपारःप्राप्तोमयानतु· २५ इतितस्यवचःश्रुत्वातूष्णीं
भूयव्यवस्थितः ब्रह्मावर्षसहस्राणिययावूर्ध्वंसुदुःखितः विचारयन्मनस्येकाकिंकर्तव्यंमयाधुना· विष्णुनान्तोयदाप्राप्तस्तदाग्रे
ष्ठोभविष्यति नप्राप्तश्चेत्तदातुल्योजायेतांनौशिवाज्ञया· तस्माच्छमकरिष्यामियथास्यांलोकपूजितः इतिनिश्चित्यमनसा
कामधेनुमभाषत· ब्रह्मोवाच· कामधेनोविधातार्हंसाहाय्यंममसुव्रते· त्वयाकार्यंसर्वथैवनोचेच्छापंददाम्यहम् अत्रसाह
य्यकर्त्रीचेत्त्वंभविष्यसिशोभने ३० तदामनोरथान्पूर्णान्संकरिष्यामिसत्वरम् धेनुरुवाच भवान्यदाज्ञापयतितामस्वैकरवाण्यहम्
शिवाग्रेकथयिष्यामिलिंगान्तादागतंत्वया· ततोगांतांसमादायविधाताधोययौपुनः ददर्शमध्यमार्गेसौकेतकंकुसुमान्वितम्
उवाचवचनंसाधुब्रह्मातंकेतकंप्रति· ब्रह्मोवाच· पुष्पोत्तमास्तुकल्याणंसाहाय्यंक्रियतांमम· शिवाग्रेकथ्यतांधातालिंगस्यान्तं
गतस्तव· इतिश्रुत्वाब्रह्मवाक्यंकेतकोपिसमाययौ· ततोब्रह्माशिवपुरोगत्वाहासंचकारह ३५ ब्रह्मोवाच· सहस्रवर्षैर्लिङ्गान्तो

मयादृष्टस्त्वाखिलः नराक्त्वावीक्षितु यान्येस्त्वकृतत्वान्निरीक्षितः इतिश्रुत्वावचस्तस्यक्रोधप्रस्फुरिताधरः अन्तःक्रोधंसमासाद्याशि
वोवचनमब्रवीत् शिवउवाच विनातुसाक्षिणाब्रह्मन्नन्यायोवदतोभवेत् आनीयतांविश्वदर्शीसाक्षीविश्वासकारकः ब्रह्मोवा
च एषाधेनुःकेतकोयमुभौतत्रैवसंस्थितौ प्रष्टव्यौतौमहादेवत्वयाशपथपूर्वकम् शिवउवाच हतध्यानांनुपत्यापंसुवयोर्मत
केपतेत् यद्यसत्यंवभाषेयालिंगान्तोवीक्षितोमुना ४० धेनुरुवाच लिंगान्तंतेयतोब्रह्मायदृष्टंनास्तिकिंचन अतःपरावृत्य
ययोर्मयैतत्त्वविलोकितम् केतकउवाच त्वल्लिंगोर्ध्वंनिवसतामयादृष्टःपितामहः ततोव्ययोगतःस्वेयंपरावृत्यसमागतः ॥
शिवउवाच मिथ्याकृतेयाधमास्याद्दृष्टापतितन्मुखे अपवित्रंमुखंतस्मात्तवीविष्पत्यसंशयम् गवामंगेषुतिष्ठंतिसर्वेदेवाःस
वासवाः पुच्छेषुसर्वतीर्थानिसर्वेदेवाश्चमस्तके मुखेषुसर्वपापानिब्रह्महत्यादिकानिच श्रुणुकेतकतेपुष्पैर्नरोमामर्चयिष्यति
४५ लक्ष्मीमन्त्रानिर्दीनोसौरौरवंनरकंब्रजेत् श्रुणुब्रह्मन्नरोयस्तुजनस्त्वांपूजयिष्यति सद्योभवत्यसौकुष्टीदरिद्रोम्लतसंततिः
श्रुणुविष्णोमहाभागकार्तिकेस्मिन्जितंत्वया तस्मात्त्वत्प्रीतयेलोकैःकृतंभवतुचाक्षयम् ब्रह्मांशाकसमुद्भूतेपालाशोयस्तुभो
जनम् कुर्यात्कार्तिकमासेतुविष्णुलोकेप्रयास्यति गोशापकारणंप्रोक्तमित्यार्किंकथयतामथ ५० ॐ इतिश्रीसनत्कुमा
रसंहितायांकार्तिकमाहात्म्येतृतीयोध्यायः ३ ॐ ऋषयऊचुः पलाशत्वंकथंजातंब्रह्मणःशाकरस्यच वटत्वंचतथावि
ष्णोःपिप्पलत्वंब्रवन्तुतत् वालखिल्याऊचुः ब्रह्मणातुपुरासृष्टाःसर्वेदेवाःसवासवाः मिलित्वासर्वएवैतेब्रह्माणंवाक्यमब्रुवन्
ब्रह्मन्सर्वाधिकोरुद्रःसर्वदेवेषुपठ्यते कर्तुंतद्दर्शनंदेवाःकामाभवतासह इतीन्द्रवचःश्रुत्वासर्वदेवपुरोगमः ब्रह्माकैलाशमग
मन्नानादेवगणा[redacted]वृताः शिवद्वारंसमासाद्यदेवाःसर्वेपिसंस्थिताः नंदिश्वरस्तेद्वारपालःशिवश्चाभ्यन्तरेस्थितः गन्तुमंवान

र्तिक॰ मा॰ गन्तव्यमस्माभिः शिवसन्निधौ परात्मत्वाथवास्य तस्य स्थानेगन्तव्यमेव च एवं चिन्तयमाने तस्मिन्नारदो मुनिसत्तमः पुरोह
५ श्चोदेवयन्दैस्तं प्रणाम्याब्रुवन्नमम् देवा ऊचुः मुने देवविदां श्रेष्ठ ब्रूहि प्रश्नसुशोभनम् किं करोमि महादेवो गन्तव्यं वा न चा
न्तरे नारद उवाच चन्द्रनाथाद्दशायान्तु देवाः संप्रस्थिताः गृहात् तस्मात्कश्चिन्महाविघ्नो भवता संभविष्यति किं करो
ति महादेवः क्रुद्धे प्रीति दशाविधौ तस्मात्संभोगकार्ये यं वर्तते त्रिपुरान्तकः इन्द्र उवाच सर्वेषामेव दुःखानां नाशकर्ता द्वि
ष्यतिः मय्यागते कथं नाशो देवतानां भविष्यति विभीषणाय देवानां वल्गनं कुरुते मुनिः इतीन्द्रस्य वचः श्रुत्वा व्याकुलो भूत्
मुनिस्तदा कथं मद्वचनं सत्यं भविष्यत्यघवर्जिणि अद्य मद्वचनं सत्यं यदि शीघ्रं भविष्यति राधादामोदरमुद्दे करिष्ये का
र्तिकव्रतम् एवं संचिन्त्य मनसा तूष्णीं भूतो मुनीश्वरः १८ इन्द्रो विचार्य देवैः किमिदानीं विधीयताम् ततः इन्द्र उवाचेदं वन्दे
मद्वचनं शृणु गृहीत्वा विप्ररूपं त्वं शिवस्याभ्यन्तरे व्रज यदि प्रसङ्गोऽस्त्यस्माकं तदा वार्ता निगद्यताम् यदि नास्ति प्रसङ्गश्चेद्या
चकस्त्वं न याहि च अवध्यत्वाद्दतास्यत्वा भिक्षुरूपेण तद्व्रज इति देवेन्द्रवचनं श्रुत्वा वह्निस्तथाकरोत् अभ्यन्तरे ददर्शाथ शिव
या सह संगतम् शिवयापि च दृष्टः सलज्जिता भोगमत्यजत् कोऽसि कोऽसीति संपृष्टो भिक्षुकोऽहं क्षुधान्वितः दृष्टोस्य न्वोस्मि दीनो
स्मि भोजनं मम दीयताम् तेनाहं दृष्टमिति ज्ञात्वा पार्वती तमभोजयत् २० सोऽपि भुक्त्वा समाचारं वक्तुं संप्रस्थितो वह्निः तस्मिं
न्नेव क्षणे गुप्तो नारदः पार्वतीपयोः शिरो निधाय पार्वत्याः पादयोः सरुरोद ह पार्वत्युवाच अहो बालक किं जातं तत्सर्वं प्रभामिधीय
ताम् करोमि निष्कृतिं तस्य साध्यासाध्यस्य नान्यथा नारद उवाच मातर्वक्तुं न शक्नोमि उपहासस्य कारणम् सत्यं यथेन्द्रादिदे श्रीः
वैस्तथा कोऽन्यः करिष्यति इति तस्य वचः श्रुत्वा पुनः पुनरपृच्छत मुग्धयित्वा ततो नेत्रे कराभ्यां समुनीश्वरः उवाच वचनं नीचमुखो ५

सौगन्धदाक्षरम् नारदउवाच इन्द्रोयंयुवयोर्भोगंदेवताभ्योन्यवर्णयत् युवयोश्चकृतानिन्दांतांश्रुत्वादुःखितोस्म्यहम् २८
भोगविच्छित्तयेवासवःप्रेषितोद्विजरूपधृक् अथवाकिमनेनापिकथनेनममाम्बिके जगन्मातासिदेवितंकातेस्यादुपहासता इ
तितस्यवचःश्रुत्वापार्वतीक्रुद्धमानसा स्फुरदोष्ठारक्तनेत्रादृष्ट्वातंनारदंप्ययो गत्वादेवानुयाचेदंसंभोगाद्विरतोहरः आगम्य
तांदर्शनार्थंहरतोसौविलोकितः वन्हेर्मुनेर्वचःश्रुत्वादेवेन्द्रःसगणोययौ प्रणिपत्यमहादेवंकृताञ्जलिपुटोभवत् दृष्ट्वात
१२ थाविधंशक्रंपार्वतीक्रुद्धाब्रवीत् ३१ पार्वत्युवाच अहल्याजारदुष्टात्मन्सहस्रभगवासव उपहासःकृतोमेयत्फलंतस्य
समाप्नुहि यावन्त्यःसन्तिदेवानांजातयःसर्वएवते अजानन्तःस्त्रीसुरवानिशार्विनःसन्तुसस्त्रियः इतिदेवीवचःश्रुत्वाकम्पिताः
सर्वदेवताः ब्रह्मविष्णुमहेशाद्यास्तुष्टुवुर्जगदम्बिकाम् ततोदेवीप्रसन्नाभूद्देवेन्द्रंवाक्यमब्रवीत् पार्वत्युवाच देवामद्वचनंमि
थ्यात्रिकालेपिनजायते तस्मादेकांशतोवृक्षायूयंसर्वेभवन्तुवै इतिदेव्यावचःश्रुत्वादेवाजातास्तुपादपाः ३६ अश्वत्थरूपीभग
वान्वटरूपीसदाशिवः पालाशोब्रह्मधाताचवज्रीशक्रोबभूवह इन्द्राणीशालनाज्ञेयादेवनार्योलतास्तथा मालत्याद्याःपुष्प
वृक्षाउर्वश्याद्याप्सरोभवन् तस्मात्सर्वप्रयत्नेनकार्तिकेश्वत्थमर्चयेत् यानारीकार्तिकेमासिलक्षंकुर्यात्प्रदक्षिणा राधादामोदरंस
म्यग्मन्दवारेचतत्तले दम्पतीभोजयेद्राधादामोदरसरूपिणौ भावयित्वासपत्नीकान्पश्चाद्भुञ्जीतवाग्यता बन्ध्यापिलभतेपुत्रंइत
रासांतुकाकथा ४१ मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे अग्रतःशिवरूपायअश्वत्थायनमोनमः विष्णोश्चप्रतिमाभावेकी
र्तनंजागरादिकम् अश्वत्थमूलेकर्तव्यंविष्णोराराधनंपरम् सदासन्निहितोविष्णुर्द्विपात्सुब्राह्मणेतथा पादपेषुचबोधीन्द्रेशाल
ग्रामेशिलासुच कार्तिकेमासिसंप्राप्तेयोनतद्व्रतमाचरेत् यथाकरस्थितंरत्नंतथात्यजतिबालिशः ४५ कार्तिकान्नापरोमासो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिक·मा· विष्णुप्रीतिकरो भुवि· स्वल्पक्लेशेनैव यस्मिन्मासे विष्णुः प्रसीदति· दुर्लभं मानुषं जन्म आर्यावर्ते ततोपि च· ततोपि दुर्लभं ज्ञानं ज्ञात्वा
६ यैस्तु न कुर्वते· व्रतं कार्तिकमासस्य ते नराः शुद्रबुद्धयः· ब्रह्महत्यादिपापानां नाशनः कार्तिको मतः· तस्मात्सर्वप्रयत्नेन कार्तिकोसौ यथाविधम्
समाचरेत्· अश्वत्थपूजा स्पर्शेन कर्तव्या शनिवासरे· अन्यवारेश्वत्थसंगाद्दरिद्रो जायते नरः ५० ❁ इति श्रीसनत्कुमारसंहि
तायां कार्तिकमहात्म्ये चतुर्थोध्यायः ४ ❁ अरुण उवाच· मन्दं विना कथं जातो नस्पृश्यः पिप्पलो भुवि· एतदाख्याहि भगवन्
कौतुकं श्रवणे मम· सूर्य उवाच· देवैर्दैत्यैर्नृपरान्ते समुद्रमथने कृते· पुरा पायो विष्णुयुक्तैर्बलिराजादिसंयुतैः· मन्थानं मन्दरं कृ
त्वा नेत्रं कृत्वा तु वासुकिम्· मथन्त्युः पञ्चवर्षाणि ततः फेनोप्यजायत· ततो वर्षत्रयेणैव समुत्पन्ना सुराभवत्· ततो जाता कामधेनुर्व
र्षेणैकेन भो खग· वर्षार्द्धेरावतो हस्ती वर्षात्सप्तमुखो हयः· त्रिभिर्मासैः सरसस्ततो वर्षेण चन्द्रमाः ५ ततो वर्षत्रयाज्जातं ज्वा
लामालातिभीषणम्· कालकूटं विषं घोरं तद्दाहं जगत्त्रयम्· तज्ज्वालाक्रान्तदेहस्तु विष्णुर्नीलो बभूव ह· हाहाकारो महाना
सीत्त्रैलोक्ये सचराचरे· वयन्तु चकिता जाता तस्मिन्काले खगोत्तम· स्वकरैर्वहु तोयानि निक्षिप्तानि धरातले· ततः संप्रार्थितः सं
र्वैर्मया धात्रा च विष्णुना· कृपालुना तेन पीतं विषं हालाहलं स्वयम्· तद्दाहविनिवृत्यर्थं धृता गङ्गा स्वमस्तके· कृता ललाटे च
चन्द्रस्य कर्पूरस्य तु लेपनम्· ततः कोदण्डमभवद्वर्षात्षड्भिश्च मासतः· पारिजातस्ततो वर्षात्सार्द्धमासाच्च कौस्तुभः· ततो ज्येष्ठा समु
त्पन्ना काषायाम्बरधारिणी· पिङ्गकेशा रक्तनेत्रा कूष्माण्डसदृशस्तना १२ अतिवृद्धा दन्तहीना ललज्जिह्वा घटोदरी· यां
दृष्ट्वैव चलो लोकोयं समुद्विग्नः प्रजायते· ततो भृङ्गालचलापाङ्गी सौन्दर्यस्यैकवारिधिः· कृशोदरी स्वर्णवर्णा पीनोन्नतपयोधरा १४ श्रीः
दधत्क्षीरोदकं वासः कराभ्यां कमलस्रजम्· तस्या दर्शनमात्रेण मोहिता देवदानवाः· ततः पुनर्मथ्यमानाद्दुग्धाख्याद्वै सागरात् ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गच्छपीयूषकलशंस्वयंधन्वन्तरिर्ययौ । आदौवीक्ष्यसमस्तंदेवारत्नानिविभजुस्ततः सुरादत्तादानवेभ्योधेनुःसंस्थापितासुरैः ॥
ऐरावतःसुरेन्द्रेणभानुनासोहयेश्वरः देवैरात्ताश्चाप्सरसःकौस्तुभःशूलपाणिना पाञ्चजन्योविष्णुनैवपारिजातस्तुजिष्णुना
गृहीत्वाकौस्तुभंविष्णुरयन्नपञ्चन्त्रिशमुखम् लक्ष्मीर्हरेरास्यंदृष्ट्वाचाधोमुखीस्थिताभवत् सर्वेपश्यन्तितांलक्ष्मीनकेना
पिविभज्यते पश्यन्त्यन्योन्यमास्यानिस्तुवन्तिचसमंपुनः ततःपितामहःप्राहशिवमर्धाङ्गधारणम् लक्ष्मीरियंकस्यदेयेया
देशंपरमेश्वरः सर्वान्दृष्ट्वाततोदेवान्रुद्रोवचनमब्रवीत् रुद्रउवाच एषनारायणःसाक्षाल्लक्ष्मीयोग्यामतोमम
तथापिस्वेच्छयालक्ष्म्याक्रियतांवास्वयंवरः २३ श्रीरुवाच देवदेवमहादेवभक्तानुग्रहकारक निःस्पृहंयत्तवसुखंतन्मिथ्या
नैवजायते शिवउवाच आकार्यतांसागरोस्याःपितापाणिग्रहायच त्वर्णांकरोतुसामग्रीद्वादश्यामथकार्तिके २४
सूर्यउवाच ततस्त्वाकारितोधात्राकृतवैवाहिकोनदीशः नारदोदत्तवान्तत्रमंततोलक्ष्मीर्व्यजिज्ञपत् श्रीरुवाच
आदौज्येष्ठांसमुद्वाह्यकनिष्ठामुद्वहेत्ततः एषपन्थाश्चतुर्वेदोक्तस्तस्मात्त्वयाविधीयताम् इतिलक्ष्मीवचःश्रुत्वासर्वेयुद्विग्नमान
साः अतःपरंकिंविधेयंकएतांवरयिष्यति इत्युद्विग्नान्सुरान्दृष्ट्वानारदोवाक्यमब्रवीत् नारदउवाच विलोकितातीवभक्तो
मुनिरुद्दालकोमहान् वरोद्वाहार्थमेनांसवरयिष्यत्यसंशयम् विष्णुरुवाच आकार्यतांमुनिवरउद्दालकमिदंवचः श्रुत्वे
वानीतएवैषनारदेनमहात्मना तंनम्रकन्धरंदृष्ट्वाविष्णुर्वचनमब्रवीत् विष्णुरुवाच उद्दालकमुनिश्रेष्ठगृहस्थस्याश्रमं
विना स्थातपस्याभवतितस्मात्पाणिग्रहंकुरु ममुद्रस्यतुकन्येयंज्येष्ठानाम्नापतिव्रता एनांवरयविप्रत्वंकनिष्ठांवरयाम्यहम् ३३

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्त्ति· मा· इति विष्णुवचः श्रुत्वा तूष्णीमासन्मुनीश्वरः दत्वा समुद्रस्य हस्ते जलं तां नारदोर्पयत् तदुत्तरं समानीतास्मि लक्ष्म्याः पाणिग्रहः कृतः
७ लक्ष्मीं कौस्तुभं मुनीन्द्रं वाक्यमब्रवीत ४५ नयेमामाश्रमं स्वेत वत्तुष्टोस्मि सर्वदा अहं गच्छामि वैकुण्ठं गच्छ ब्रह्मन् त्वमाश्रमं
इत्युक्त्वा निर्गतो विष्णुर्वैकुण्ठं रमया सह उद्दालकोपि तां गृह्य प्रययौ स्वीयमाश्रमम् ज्येष्ठोवाच शिरःपीडाकरश्चाय
माश्रमो मम वर्त्तते न वसाम्यत्र भोः स्वामिन्नय मामन्यमाश्रमम् एवं सहस्रशस्तेन दर्शिता श्चाश्रमाः स्वका एकोपि तस्या मन
सि न समायाति न चाश्रमः तदा मुनिः पर्यपृच्छत कीदृशं रोचते स्थलम् ज्येष्ठोवाच रात्रौ रात्रौ गृहे यत्र दम्पत्योः कलहो भ
वेत् स्वकौलं धर्ममुत्सृज्य यत्र तिष्ठन्ति ये जनाः द्यूतकारा मद्यपाश्च यत्र वेश्योपगामिनः ४७ गुरुमातृ द्विजातीनां द्वेष्टारो यत्र
संति च नित्यं परान् तापयंति भ्रवाद्यं वादयन्ति च ये पुष्टमैथुनं कुर्युर्वेदनिन्दां प्रकुर्वते मैत्र्यन्तरायाय लोका यत्र यत्र वसंति
च तत्र तत्र रतिर्मेस्यान्नान्यस्था नेऽनुवर्तते इति तस्या वचः श्रुत्वा मुनीन्द्रोऽभ्यद्दुःखितः यो वासो मम योग्यस्तत्तोस्या वासो न
रोचते अतःपरं किं विधेयं विष्णुना कारिता प्रियम् स्वकार्य साधका देवा भवन्ति न परस्यतु सुखं दुःखं न जानन्ति किं कार्यं तु
मयाधुना अथवा जातएवास्या विवाहस्तु दुःखदः एनां त्यक्त्वा गमिष्यामि नान्यथा मे तपो भवेत् विचार्यैवं स मुनिस्तां भा
र्यां विकाशमब्रवीत ४९ उद्दालक उवाच कृणु मद्वचनं कान्ते ह्यश्वत्थाधः स्थिराभव शरत्कालस्य गमेनाशिरःपीडा भवि
ष्यति तस्मादहं गमिष्यामि निवसेयं यथास्थलम् विलोक्यता दृशं तत्र स्थानं यामि तथाश्रुव इत्थमाश्वस्य तां ज्येष्ठां पलायन श्रीः
मचीकरत् सापि स्थित्वा तस्य मार्गमास्तूर्यं प्रदर्शिहृ सायंकाले तदा जाते निराशा भूत्तदागमे रुरोद करुणं दीनं त्रैलोक्यं बधिरीकृतम् ५१ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वैकुण्ठेपिस्थितंलक्ष्म्याविष्णुंसापिप्पलाजिह्यपत श्रीरुवाच रोदनंश्रूयतेचायमद्भगिन्याकृतंप्रभो गतस्तांसम्यसमुनिःसान्त्वना
यसमाव्रज श्रुत्वैतद्वचनंलक्ष्म्याःस्वगारूढोजनार्दनः प्रियासहयपौतत्रयत्रारोदितिसाविरम् विष्णुरुवाच जानेज्येष्ठे
विहायैवत्वांगतोसौमुनीश्वरः मदंशसंभवश्चायमश्वत्थोस्तिगयापुरे योधिनामालमत्रैवचिरकालंस्थिराभव ५५ तवैवा
नुचराःसर्वेभविष्यन्तिप्रियाचकाः तैःसार्द्धंस्थीयतामत्रशोकंत्यक्त्वासुखीभव अथार्कपुत्रयोगोस्तिसप्तमेसप्तमेहनि भगिनी
तेवरूपमेवमिलनायागमिष्यति यैःस्पृष्टोन्यवारेषुपिप्पलस्तत्क्षणंव्रज मन्दवारेतुयैःस्पृष्टस्तत्रयास्यतिमत्प्रिया इतिचा
श्वास्यवैकुण्ठंजगामसहरिःस्वयम् तस्मान्मन्दंविनानूनंनस्पृश्योश्वत्थपादपः इत्थमश्वत्थपूजांतुकुर्यात्कार्तिकमासके न
कार्तिकात्परोमासःसत्यंसत्यंब्रवीमिते ज्येष्ठाख्यानंमयाप्रोक्तंशृण्वतांपापनाशनम् अतःपरंब्रूहिवत्सकिमन्यच्छ्रोतुमिच्छसि ६९
॥ इतिश्रीसनत्कुमारसंहितायांकार्तिकमाहात्म्येज्येष्ठोपाख्यानंनामपंचमोध्यायः ५ ॥ अथऋषयऊचुः कदा
स्नानंप्रकर्तव्यंकथंस्थेयंदिनावधि एतदाख्यातुमर्हन्तिवालखिल्यास्तपोधनाः १ वालखिल्याऊचुः रात्र्यांतुयामशेषाया
मुत्तिष्ठेच्छयनेसुधीः विष्णुंस्तुत्वावहुस्तोत्रैर्दिनकार्यंविचारयेत् २ प्रातःस्मरामिभवभीतिमहार्तिशान्त्यैनारायणंगरु
डवाहनमब्जनाभम् ग्राहाभिभूतवरवारणमुक्तिहेतुंचक्रायुधंतरुणवारिजपत्रनेत्रम् ३ प्रातर्भजामिभजतामभयंकरंतं
प्राग्देहजन्मकृतपापभयापहत्यै योग्राहवक्त्रपतितांघ्रिगजेन्द्रघोरशोकप्रणाशमकरोद्धृतशंखचक्रः ४ प्रातर्नमामिमन
सावचसाचमूर्ध्ना पादारविन्दयुगलंपरमस्यपुंसः नारायणस्यनरकार्णवतारणस्यपारायणप्रवणविप्रपरायणस्य ५
श्लोकत्रयमिदंपुण्यंप्रातःप्रातःपठेन्नरः लोकत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः ६ ब्रह्मामुरारिस्त्रिपुरान्तकारीभानुःशशी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिकमा॰ भूमिसुतो बुधश्च गुरुश्च शुक्रः सह भानुजेन कुर्वन्तु सर्वे मम सुप्रभातम् ७ पृथ्वी सगन्धा सरसास्तथापः स्पर्शी च वायुर्ज्वलितं च
८ तेजः नभः सशब्दं महता सहैव कुर्वन्तु॰ ८ भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः रैभ्यो मरीचिश्च्यवनश्च द
क्षः कुर्वन्तु॰ ९ सनत्कुमारः सनकः सनन्दनः सनातनोप्यासुरिपिङ्गलौ च सप्तस्वराः सप्त रसातलानि कुर्वन्तु॰ १० सप्तार्ण
वाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त भूरादिकृत्वा भुवनानि सप्त कुर्वन्तु॰ ११ इत्थं प्रभाते परमं पवित्रं पठेत्स्म
रेद्वा शृणुयाच्च तद्वत् दुःस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात् १२ इत्याशित्विति भिर्विष्णुं स्तुत्वा हस्तावलो
कनम् कुर्याद्दर्पणं स्वर्णं दूर्वां गां मङ्गलं चयत् इष्टाग्रामाद्दिशं यायान्नैरृत्यां जनवर्जिते ग्रामनैरृत्यदिग्भागे रथ्या
स्नानादिवर्जिते नम प्रदेशे तु तृणान्यास्तीर्य मलमुत्सृजेत् घ्राणोनेक्षेत च मुखं पिधायाम्बरखण्डतः १३ न च पश्येत न च वी
वेन्न भाषेन्न च संलिखेत् गन्धलेपक्षयकरं ततः शौचं समाचरेत् एका लिङ्गे गुदे सप्त दश वामकरे तथा उभयोः सप्त दा
तव्या पादयोर्मृत्तिकात्रयम् एतद् गृहस्थानां द्विगुणं ब्रह्मचारिणाम् त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम् एवं शौ
चं विधायाथो दन्तधावनमाचरेत् दुग्धकण्टकवृक्षोत्थं हित्वा स्याद्दन्तधावनम् सद्यास्नानं ततः दन्तधावनमाचरेत् उ
पवासे नवम्यां तु षष्ठ्यां श्राद्धतिथौ रवौ अमायां दन्तकाष्ठस्य योगात्कुलक्षयः कुर्याद्द्वादशगण्डूषान्तु केशधावने १२
गृहीत्वार्चनसामग्रीं ततो हरिपुरं व्रजेत् तस्माद्वे शिवगेहे स्याद्वा भास्करस्य वा अथवा तु गणेशस्य स्थाने पिप्पलसन्निधौ गोष्ठे
वाथ नदीतीरे गत्वा पूजां समाचरेत् ततो गायेत न त्यजेत् पूजां कृत्वा सुबुद्धिमान् अशक्तो गायनाद्येषु गायकानेव पूजयेत् नाराय रामः
वेनापि नृत्यन्ति कार्तिके विष्णुसन्निधौ कार्तिके मासि संप्राप्ते गगने स्वच्छतारके राधौ लक्ष्मीः समायाति द्रष्टुं भुवनकौतुकम् ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पत्रपत्रचदीपान्साफ्यपत्याग्निसमुद्भवा तत्रतत्रार्तिंकुर्यान्नान्धकारेकदाचन तस्माद्दीपस्थापनीयःकार्तिकेमासिवैसदा ३७
लक्ष्मीरूपार्थिनांप्रोक्तंदीपदानंविशेषतः देवालयेनदीतीरेराजमार्गेविशेषतः निद्रास्थानेदीपदातातस्यश्रीःसर्वतोमुखी
दुर्वलस्यालयंवीक्ष्यदीपशून्यंतुयोददेत् विप्रस्यचान्यवर्णस्यविष्णुलोकेमहीयते कीटकंटकसंकीर्णेदुर्गमेविषमस्थले ३८
कुर्याद्योदीपदानानिनिरकेसनगच्छति एवंसंकीर्तनंकृत्वानाडीद्वयनिशामुखे आगत्यतोयनिकटेदेशकालादिचोच्च
रेत् स्मरेज्जगदिकानद्योविष्णुशर्वादिदेवताः नाभिमात्रजलेस्थित्वामंत्रमेनमुदीरयेत् कार्तिकेहंकरिष्यामिप्रातःस्नानंज
नार्दन प्रीत्यर्थंतवदेवेशदामोदरमयासह नित्येनैमित्तिकेकृत्स्नकार्तिकेपापशोषणे गृहाणार्घ्यंमयादत्तंराधयासहितो
हरे किरणाधूतपापाचपुण्यतोयासरस्वती ३९ गंगाचयमुनाचैवपंचनद्यःपुनन्तुमाम् स्नानमंत्रान्समुच्चार्यमलस्नानेस
माचरेत् अघमर्षणकंकृत्वावासःपरिदधेत्ततः जान्हवीस्मरणंकुर्यात्सर्वतीर्थेषुमानवः नान्यत्तीर्थंतुजान्हव्यांस्मरणीयं
कदाचन स्नानांगतर्पणंकृत्वाचाञ्चलपीडयेद्बहिः यन्मयादूषितंतोयंशारीरमलसंभवैः तद्दोषपरिहारार्थंयक्ष्माणंत
र्पयाम्यहम् वस्त्रनिःपीडनंकृत्वाकुर्याच्चतिलकंततः ततःसन्ध्यामुपासीतस्वस्वशाखोक्तेनवर्त्मना ततःकार्योजपोदेव्यायाव
दर्कोदयोभवेत् एतत्प्रोक्तंरात्रिशेषकृत्यंदैनमथोच्यते ४१ ❁ इतिसनत्कुमारसंहितायांकार्ति० षष्ठोध्यायः ६ ❁
वालखिल्याऊचुः कार्तिकेदिनकृत्यंयत्तत्कृणवन्तुमुनीश्वराः यस्मिन्कृतेकार्तिकोयंसकलःसफलोभवेत् विष्णोःसहस्र
नामाद्यंसन्ध्यान्तेचपठेत्ततः देवालयेसमागत्यपुनःपूजनमारभेत् नृत्यगानादिकार्येषुप्रहरंद्वयंसंनयेत् ततःपुराणश्रवणं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिक मा॰ पामार्थसम्यगाचरेत् गौरालिकस्यपूजांचंतुलसीपूजनंतथा कृत्वामाध्यान्हिकंकर्मभुञ्जीतहिविलोक्तितम् बलिदानंवैश्वदेवम्
९ तिथीनांसमर्चनम् कृत्वाभुञ्जीतयोमर्त्यःकेवलंचाम्रतंहितत् यथाशक्तिद्विजाभोज्याःप्रत्यहंवाथपर्वणि हविष्यभोजनंकु
र्याद्धविष्यमथचोच्यते ६ हैमन्तिकंसितास्विन्नंधान्यंमुद्गास्तिलायवाः कलायकङ्गुनीवारावास्तूकंहिलमोचिका षष्ठिकाःका
लशाकंचमूलकंकेमुकेतरत् कन्दंसैन्धवसामुद्रंगव्येचदधिसर्पिषी पयोनुद्धृतसारंचपनसाम्रहरीतकी पिप्पलीजीरकंचैवना
रङ्गंचैवतिन्त्रिणी कदलीलवलीधात्रीफलान्यगुडमैक्षवम् अतैलपक्वंमुनयोहविष्यान्नंप्रचक्षते १० सर्वथैवनभोक्तव्यमा
मिषान्नंतुकार्तिके तत्सर्वदावर्जनीयंकार्तिकेतुविशेषतः दग्धमन्नंद्विपक्वंचमसूरान्नंसवल्कलम् उद्धालकाःपर्युषितमन्न
मामिषमुच्यते वृन्ताकानिपटोलानितुम्बिकाचकलिङ्गकम् बिम्बीफलानित्रपुसंफलशाकेषुचामिषम् दोरकातुलसीबि
ल्वीछत्राकंपोस्तपत्रकम् चक्रवर्तीराजगिरीपत्रशाकेषुचामिषम् गृञ्जनंरक्तमूलंचपलाण्डुलसुनंतथा सर्वदैवामिषाणिस्युः
कार्तिकेसूरणंत्यजेत् १५ परमांसैःस्वमांसानियःपुष्णातिनराधमः परजन्मनितस्यैवविष्ठायांजायतेक्रिमिः बालान्मृगानप
सिणोवातथाबालफलानिच घातयन्तिदुरात्मानोजायन्तेम्रतबालकाः सर्वाण्येकत्रदानानिसर्वतीर्थाण्यथैकतः सर्वतीर्था
न्येकतश्चअहिंसाकलयासमम् एवंविचार्यभुञ्जीतननुविघ्वानिवेदित वैश्वदेवस्यान्तेतुयदागच्छतिभिक्षुकः चाण्डालोवाथ
चोरोवाविष्णुरूपीनसंशयः सायंकालेउषःकालेवैश्वदेवस्यचान्तरे अतिथिर्विमुखोयातिसतुदुःखस्यभाजनम् एवंभुक्त्वाच श्रीः
मेत्पश्चाद्यथाकिष्टंनतिष्ठति २१ दन्तोच्छिष्टंसलाकाभिर्निर्हरेन्नैवपीडयेत् दृष्ट्वापदन्तसंलग्नमुच्छिष्टंतत्तुदन्तवत् तान्निष्काशन ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नश्चेत्स्यात्कदाचिद्बुधिसत्तमः चान्द्रायणत्रयंकुर्यात्तस्यसंशुद्धिहेतवे भक्षयेत्तुलसीवक्त्रेमुख्यर्थंतीर्थवारिणा तुलस्याधारणंकार्यंका
र्तिकेतुविशेषतः तुलस्यांसर्वतीर्थानितुलस्यांसर्वदेवताः कार्तिकेमासितिष्ठंतिनात्रकार्याविचारणा २५ यस्यैवमृत्युसमये
तुलसीमुखसंस्थिता महापापीदुराचारःकीकटेवाथसंस्थितः नयात्यसौसंयमिनींविष्णुलोकेमहीयते तुलसीमञ्जरीभि॰
र्योविष्णोर्वाथशिवस्यच सहस्रनामभिःकुर्यात्पूजायांभक्तिसंयुतः किंदानैःकिंव्रतैस्तस्यसर्वपापैःप्रमुच्यते तुलस्यमृतजन्मा
सिसदात्वंकेशवप्रिये केशवार्थंविचिन्वामिवरदाभवशोभने २९ मन्त्रेणानेनतुलसींलुनीहिहरितुष्टये अङ्कोत्तुसमालो॰
क्यतुलसीनांकदम्बकम् नङ्कहंनविशान्त्येवयमदूतानसंशयः यत्किंचिद्दीयतेदानंतुलस्याचसमन्वितम् अपात्रेपिप्रयुक्तंत
न्नरकेनव्रजेन्नरः संसारभयहारेणद्विनेशेषंसमापयेत् सायंकालेपुनर्गच्छेद्विष्णोर्देवालयंप्रति सन्ध्यांकृत्वाप्रयुञ्जीत
तत्रदीपान्यथाबलम् निशायाःप्रहरेचाद्येकुर्याज्जागरणंसदा ब्रह्मचर्यव्रतंकुर्याद्भार्यायायाद्दतौतथा नयाकामयमा
नोवाभार्यांगच्छन्नदोषभाक् हरिसंतुष्टयेकार्यस्त्यागोवास्वेष्टवस्तुनः मासान्तेद्विजवर्यायदद्यात्तद्धृतपूर्तये सर्वव्रतानि
चैकत्रसत्यव्रतमथैकतः ३९ तस्मात्सर्वप्रयत्नेनसत्यंभाषेतसर्वदा अन्यधर्मेष्वधिकृतिःकुलजातिविभागतः अधिकारी
कार्तिकेतुसर्वएवजनोभवेत् कलौकलुषचित्तानामुपायोनैववर्तते उद्धारार्थंकार्तिकस्यव्रतंकुर्यात्प्रयत्नतः तावद्गर्जन्ति
पापानिब्रह्महत्यादिकानिच नकृतंकार्तिकस्नानंयावज्जन्तुभिरादरात् गोग्रासःकार्तिकेमासिविशेषाद्येनुदीयते ३५
तेषांपुण्यफलंवक्तुंनशक्नोतिपितामहः विष्णोर्देवालयंप्रातःसंमार्जयतिकार्तिके नस्यवैकुण्ठभवनेजायतेसुदृढंगृहम् ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कार्तिक·म· दद्यात्कार्तिकमासेतुधर्मकाङ्क्षानिभूरिशः नतत्पुण्यस्यनाशोस्तिकल्पकोटिशतैरपि· सुधादिलेपयेयस्तुकार्तिकेविष्णुमन्दिरम्
१० नित्यादिकंलिखेद्वापिमोदतेविष्णुसन्निधौ रात्रिशेषेभवेत्स्नानमुत्तमंकिञ्चिदुष्णकम् सूर्योदयेमध्यमंतद्यावन्नास्तांतुकृत्तिका·
ताराद्रेवभवेत्स्नानमन्यथातन्नकार्तिकम् देवालयेवातीर्थेवाकृतोदुष्टेन्दपैःकरः तन्मोचयन्तियेलोकास्तेषांधर्मस्त्वनन्तकः
स्नानेस्त्रीभिर्विधातव्यंगृहीत्वाज्ञांधवस्यच· अपृष्ट्वापतिकृतंधर्मंभर्तारंतत्क्षयंनयेत् स्त्रीणांनास्त्यपरोधर्मोभर्तारंप्रोज्झ्यका
श्रुपप· कुर्यात्सहस्रपापानिभर्त्राज्ञांयासमाचरेत् सैवधर्मवतीलोकेनजायेतव्रतादिना· दरिद्रःकृपणोमूर्खोरोगीनोपियदि
चेत्पतिः नाक्रुशःशरणंस्त्रीणांतस्याग्यान्निरयंव्रजेत् ४५ ॥ इतिश्रीसनत्कुमारसंहितायांकार्ति॰सप्तमोध्यायः ७ ॥
अरुणउवाच कस्मिंस्तीर्थेविशेषेणफलंकार्तिकसंभवम् क्षेत्रेवाश्तदाख्याहिभगवन्भूतभावन· सूर्यउवाच यत्रकु
ञापिकर्तव्यंजलेस्नानंतुकार्तिके· ततोदशगुणंपुण्यंपश्चात्तोयनिमज्जनात् ततःशतगुणंपुण्यंवहिःकूपोदकेकृतम् कूपात्स
हस्रगुणितंफलंवापीनिषेवतः ततोऽयुतगुणंपुण्यंतडागस्नानतोभवेत् ततोदशगुणंपुण्यंनिर्झरेषुनिमज्जनात्· ततोपि
कोटरंपुण्यंनदीस्नानस्यकार्तिके· नद्यादशगुणंप्रोक्तंतीर्थस्नानेखगोत्तम ५ ततोदशगुणंपुण्यंनद्योर्यत्रचसंगमः नदी
त्रयस्यसंयोगेपुण्यस्यान्तोनविद्यते· सिन्धुःकृष्णाचवेणीचयमुनाचसरस्वती गोदावरीविपाशाचनर्मदातमसामही कावेरी
सरयूःक्षिप्रातथाचर्मण्वतीनदी वितस्तावेदिकाशोणोवेत्रवत्यपराजिता गण्डकीगोमतीपूर्णाब्रह्मपुत्रःसरोवरम् वाग्वती श्रीः
दशानदूष्वतथाबदरिकाश्रमः दुर्लभाःकार्तिकेत्वेतेतीर्थान्यथनिबोधमे १० सर्वेभ्यश्चस्थलेभ्यश्चआर्यावर्त्तन्तुपुण्यदम्· १०

कोलापुरीततःश्रेष्ठानन्तःकाञ्चिद्वयंस्मृतम् अनन्तसेनवसतिर्निराहस्तेत्रमेवच चक्रक्षेत्रंततःपुण्यंमुक्तिक्षेत्रंततोधिकम् १२
अवन्तिकाततःश्रेष्ठाततोद्वारिकास्मृता अयोध्याचततःश्रेष्ठागङ्गाद्वारंततोधिकम् ततःकनखलंश्रेष्ठंततोमधुपुरीवरा
एकोपिकार्त्तिकोमासोमथुरायमुनाजले यैःस्नातस्तेनुवैकुण्ठेपुनःकालंवसन्तिहि राधादामोदरस्तत्रस्वयंस्नातःकार्त्तिके
अतोमधुपुरीश्रेष्ठायमुनाचविशेषतः द्वारवतीततःश्रेष्ठाप्रत्यहंस्नातिकेशवः षोडशस्त्रीसहस्रेणसार्धंयादवसंयुतः
द्वारकायांमृत्तिकयाभालकोयेनमण्डितः धार्यतेसोनरोज्ञेयोजीवन्मुक्तोनसंशयः द्वारकास्नानमाहात्म्यंनवक्तुंशक्यतेमया १८
गोविन्दपदिनवचित्तानाजायतेपुण्यभारतः ततोभागीरथीश्रेष्ठायत्रविन्ध्येनसंगता तस्माद्दशगुणंपुण्यंतीर्थराजेप्रजायते
नामोच्चारणमात्रेणगंगायाःयत्फलंलभेत् नतत्सहस्रतीर्थानांयानात्स्नानाच्चाप्यते गङ्गागङ्गेतियोब्रूयाद्योजनानांशतै
रपि २३ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति येषांयेषांतुपापानांप्रायश्चित्तंनविद्यते तानितानिविनश्यन्तिगंगाभि
देशस्तुस्पर्शनात् एवंवदन्तिनदीगङ्गांतेनरानरकौकसः अयंब्रह्मद्रवःसाक्षान्महेशेनधृतःस्वके ब्रह्मविष्णुमहेशाद्याःसर्वेगङ्गा
मुपासते कल्पेदशसहस्राणिविष्णुस्त्वयक्ष्यतिमोक्षिणीम् तदर्धंजाह्नवीतोयंतदर्धंदेवतागणाः २५ यावत्तिष्ठतिगङ्गात्रता
वत्तीर्थानिसन्तिच स्वस्वस्थानेनृणांपापंतावदेवहरन्तिच यदैवाद्रक्ष्यागङ्गास्यात्कोवातत्पापमाहरेत् विचार्येवंमुनी
र्थानिगमिष्यन्तिधरातले तस्मान्मुनीश्वराःसर्वेसेवन्तिष्ठतिजाह्नवी तावद्गाकियतांधर्मस्तनोभूमौनिलीयताम् २८

कार्तिकम् समाश्रित्यह्यस्मद्दृढंयावत्कृतयुगंभवेत् अन्यथाकलिकालेनअपनीयाभवत्सुधीः ततःश्रेष्ठतराकाशीधर्मस्थानाशोनजाय
११ ते यत्रस्नानेनगङ्गापिसर्वपापंव्यपोहति ३० काशिकायांनैवनाशोब्रह्मणोपिमृतोसति तथाकाशीकृतंकर्मसुकृतंवापिदुःकृतं
नैवनाशंसमायातिकल्पकोटिशतैरपि यद्दर्शनार्थंगङ्गापिजाताचोत्तरवाहिनी यस्यांपञ्चनदंतीर्थंत्रिषुलोकेषुविश्रुतम्
भयात्तत्रतपस्तप्तंप्रस्वेदात्किरणानदी गभस्तीशादधोभागेगङ्गयासहसङ्गता धूतपापापितत्रैवचन्द्रांशाकसमुद्भवा रुद्रांश
कसमुद्भूतास्वयंभागीरथीस्थिता विष्णोरंशसमुद्भूतायमुनातत्रसंगता ब्रह्मांशसंभवायत्रदृश्यतेतुसरस्वती तीर्थं
पञ्चनदंनामभूमावेकंविराजते आगतेकार्तिकेमासिरौरवंनरकंगताः आक्रोशन्तेतुपितरोवंशेस्माकंभविष्यति २१ क
श्चित्पुण्यवतांश्रेष्ठोगत्वापञ्चनदेशुभे अस्माकंतर्पणंकुर्यान्नरकार्णवतारकम् तीर्थराजादितीर्थानिप्राप्तेकार्तिकमासके
स्नानार्थंपञ्चगङ्गंतुसमायान्तिनसंशयः कृत्वातुलक्षपापानिस्नात्वापञ्चनदेशुभे विन्दुमाधवमभ्यर्च्यमुक्तोजन्मान्तरेभवेत् ४०
दद्याद्योपञ्चनदेदीपंयोविधिपूर्वकम् तस्यवंशेप्रजायन्तेबालकाःकुलदीपकाः कार्तिकेमासियोविप्रोगभस्तीश्वरसन्निधौ
शान्तस्तुजपंकृत्वामन्त्रसिद्धिःप्रजायते सर्वतीर्थानिगच्छन्तितत्तत्तीर्थदिनेखलु यात्रार्थंकाशिकास्थानिनयान्तिकापिसा
रथे तानिसर्वाणिवसन्तिस्नातुंपञ्चनदेशुभे मणिकर्णिकाविन्ध्याद्रिपुण्याप्यादीनांतुकाकथा दुर्लभोमानुषोदेहोदुर्लभा श्रीः
काशिकापुरी तत्रापिकार्तिकेमासिपञ्चगङ्गंसुदुर्लभम् ४५ येःस्नातंकार्तिकेमासिसकृत्पञ्चनदेशुभे सर्वतीर्थकृतस्ना ११

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नात् फलं कोटिगुणं भवेत् वाराणस्यां तु यैः स्थित्वा त्रिवर्षं कार्तिकव्रतम् सोपाङ्गं सम्यगं यैर्मर्त्यैः कृतं भक्त्येकतत्परैः इहलोके फ
लं तेषां प्रत्यक्षं जायते स्वर्ग सन्तत्या चैव सम्पत्त्या यशोभिर्धर्मवुद्धिभिः भवन्ति संयुता ब्रूहि किमन्यच्छ्रोतुमिच्छसि ॥४९॥
॥ इति श्रीसनत्कुमारसंहितायां कार्तिकमाहात्म्ये ऽष्टमोध्यायः ॥८॥ ॥ ॥ ऋषय ऊचुः ॥ कार्तिकस्य उपाङ्गानि व्र
तानि कथयन्तु नः कृतेषु येषु भवति संपूर्णं कार्तिकव्रतम् वालखिल्या ऊचुः आश्विने शुक्लपक्षे तु भवेद्या चैव पूर्णिमा
तस्यां वै पूजनं कुर्यात् श्रियो जागरपूर्वकम् नारिकेलोदकं पीत्वा अक्षक्रीडां समारभेत् निशीथे वरदा लक्ष्मीः को जागर्तीति
भाषिणी जगत् प्रभ्रमते तस्यां लोकचेष्टावलोकिनी तस्मै वित्तं प्रयच्छामि यो जागर्ति महीतले सर्वथैव प्रकर्तव्यं व्रतं दारिद्र
भीरुभिः एतद्व्रतप्रभावेण वलितो प्यभवद्धनी ५ ऋषय ऊचुः वलितः प्रोच्यते को सौ लब्धवान् स कुतो धनम् एतद्धि स्त
रतो ब्रूत वालखिल्यास्तपस्विनः वालखिल्या ऊचुः ब्राह्मणो वलितो नाम मागधः कुलसंभवः नानाविद्याप्रवीणो सौ स्ना
नसन्ध्यापरायणः याचनं मरणात् तुल्यं मन्यते सो द्विजोत्तमः गृहागतं संगृह्णाति नान्यथा याचयते कचित् तस्य भार्या महाच
ण्डी नित्यं कलहकारिणी सङ्गिन्यः स्वर्णरूप्यालंकारादिविभूषिताः नानामाल्याम्बरधरा दृश्या देवाङ्गना इव अहं दरि
द्रस्य गृहे पतितास्मि दुरात्मनः " लज्जा मां वाधते त्यर्थं ज्ञातीनां सुखदर्शने धिगस्य तव विद्यां या निर्धनस्य कुलस्य च " एवं वदन्ती
लोकेषु न करोति पतीरितम् संकल्पं कृतवत्येकं यद्यद्भर्तावदिष्यति विपरीतं करिष्यामि यावल्लक्ष्मीः प्रसीदति भर्तः पाषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिकम गच्छेत्वं चौर्यं कुरुष्व पालये आनीयतां धनं भूरि नो चेत्संताडयाम्यहम् क्षणं रोदिति नास्माति कदाचिद्दुःखादिति १९ साकृपालंता
१२ उयति सर्वं ल्के शपते पतिम् सोऽथ तस्यास्तु चरितं याचनादुःखभीतितः नोवाच वचनं किंचिद्यथालाभेन तोषितः एकस्मिन्
श्राद्धपक्षे तु उद्विग्नो भूद्द्विजोत्तमः एतस्मिन्वत्सरे सर्वं श्राद्धसामाग्रिकं गृहे वर्तते गृहिणी चेयं न करिष्यति किंचन इत्युद्विग्नमना
विप्रो भाषते न च किंचन चिन्तयाविष्टमेनं तमाययौ मित्रमुत्तमम् नाम्ना गणपतिख्यातं तस्मिन्नभ्यागते सति नोवाच पूर्ववद्द्वा
तं मित्रं वचनमब्रवीत् भो भो बलित चित्तं ते किमर्थं चिन्तयान्वितम् अवश्यं सुधिया कृत्वा चिन्तां ते निहराम्यहम् २० बलित
उवाच अधुना पितृपक्षे तु पितुः श्राद्धं समागतम् सामाग्रिकं चास्ति गृहे विपरीतकरी प्रिया कथं सम्पद्यते श्राद्ध इति चिन्तातु
रोस्म्यहम् गणपतिरुवाच धन्योसि कृतकृत्योसि भार्या यस्य हि स्त्री गृहे ब्रूहि त्वं वै परीत्येन भार्या कार्यं करिष्यति बलितस्तु
तथेत्युक्त्वा सायं भार्यामभाषत अनर्थकारके च पिंडपरस्वः श्राद्धकं पितुः नस्थापितं धनं तस्मान्मदर्थे तैस्तु पापकैः तस्मान्न
शीघ्रपाकं त्वं कुरु दृष्टे कदापि चेत् ब्राह्मणाय द्यूतकाराः शौचाचारविवर्जिताः निमन्त्र्यास्ते त्वया भद्रे नोत्तमाश्च कदाचन
इति भर्तृवचः श्रुत्वा संभारस्तु महान्कृतः निमन्त्रिताश्च साद्विजाः काले पाकस्तया कृतः २९ विपरीतैरेव वाक्यैः श्राद्धं संपादितं त
या पिण्डदानं ततः कृत्वा भार्यां वचनमब्रवीत् विस्मृत्य पिण्डान्नीत्वा त्वं क्षिप गङ्गाजले शुभे पिण्डान्नीत्वा तथेत्युक्त्वाऽशौच श्रीः
कूपेप्यपाक्षिपत् तज्ज्ञात्वा बलितो दुःखी बभूवाकलिताननः क्रोधाद्धि निर्ययौ गेहात्संकल्पं कृतवानिति ३० लक्ष्मीर्यदि प्र १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सन्नाम्यान्तदान्नं भक्षयाम्यहम् तावत्कन्दफलाहारी वनमध्ये वसाम्यहम् इतिसंकल्प्य विप्रः स गहनेनिर्जनेवने एकोधर्मनदी
तीरे वृक्षवल्कलधारकः विंशद्दिनानि न्यवसद् आगता वैषपूर्णिमा कालीवंशसमुद्भूता नागकन्याः सुलोचनाः निवसंत्यत्र
नेतस्मिन्व्रतं चक्रुः समागमे श्वेतीकृतं तु सुधया गृहं चन्द्रगृहोपमम् मण्डलानि विचित्राणि नानापुष्पैः कृतानि च पञ्चा
मृतानि रत्नानि दर्पणच्छादनानि च स्थापयित्वेन्दिरापूजां कृतान्ताभिः प्रयत्नतः एवं तु प्रथमे यामे वालाभिर्नीत एव हि ३६
आरब्धं तु ततो द्यूतं तुर्यं तास्तु न लेभिरे चतुर्भिस्तु विनाक्षाणां क्रीडनं नैव जायते तस्मान्मृग्यस्तुरीयस्तु विचार्यैवं विनिर्गता
कन्यैका तु नदीतीरे ददर्श वलितं द्विजम् ज्ञात्वा तं साधुचरितं संचिन्त्य च मुखाकृतेः उवाच वचनं चारु द्विज कोसि समागतः याल
द्य क्रीडितं द्यूतं रमाप्रीतिकरं परम् इत्थं तद्वचनं श्रुत्वा वलितो वाक्यमब्रवीत् ४० वलित उवाच द्यूतेन क्षीयते लक्ष्मीर्द्यूता
द्धर्मो विनश्यति मुग्धा वदसि किं त्वं कथं लक्ष्मीः प्रसीदति कन्यकोवाच भाषसे त्वं पण्डितवत्कर्मणे न त्वितु मूर्खवत् इष्टस्य
शुक्लपूर्णायां द्यूताल्लक्ष्मीः प्रसीदति द्यूतक्रीडां तु कृत्वैव कौतुकं पश्य चेन्दिराम् इत्युक्त्वा सोतयानीतः क्रीडार्थं स्वस्य मन्दिरम्
दत्वा तस्मै नारिकेलजलं भक्ष्यादिकं तथा आरब्धं तु ततो द्यूतं श्रीलक्ष्मीः प्रीयतामिति लापितो न च रत्नानि कन्याभिर्ब्राह्मणेन
न तु कौपीनं लापितं स्वीयं ताभिर्निर्जितमेव तत् ब्राह्मणः क्रोधसंयुक्तः किं कर्तव्यं मयाधुना उपवीतं लापयित्वा ततः स्वीयं
कलेवरम् लापयिष्ये विनिश्चित्य उपवीतं ललाप सः ताभिर्जितं च तदपि शरीरं लापितं स्वकम् ४७ ततोर्धरात्रे संजाते

कार्तिकम॰ लक्ष्मीनारायणावुभौ आगतौ लोकचरितं द्रष्टुं विप्रं ददर्शतुः सुपवीतं विकोपीनं चिन्तयाति कृशीकृतम् उवाचवचनं
१३ विष्णुः शृणुत्वं पद्मलोचने तवव्रतकरो विप्रः कथं जातः स चिन्तकः तस्मादेनं कुरु क्षिप्रं लक्ष्मीवन्तं सुखोचितम् ५० इ
ति विष्णुवचः श्रुत्वा पद्मयासौ कटाक्षितः वालाचित्तहरो जातस्तत्कालं मदनोपमः ततः कामेन संविद्धास्तास्तिस्रो ना
गकन्यकाः विप्रायवचनं प्रोचुः शृणु विप्र तपोधन ५२ कन्यका ऊचुः यद्यस्माभिर्जितस्त्वं चेद्भूतां स्माकं वचोऽनुगः
वयं त्वया निर्जिताश्चेद्यथेच्छसि तथा कुरु इति तासां वचः श्रुत्वा तथा मन्य स च द्विजः क्रीडना ताजिताः कन्या गान्धर्वे
ण विवाहिताः तासां रत्नानि ताश्चापि गृहीत्वा स्वपुरं ययौ प्राप्तं च राज्ञी तिरस्कारान्मया दुर्भाग्यमुत्तमम् ५५ तस्मा
त्संमानिता च राज्ञी सापि प्रीता वभूव ह चकार स्वामिनश्चाज्ञामित्थं लक्ष्मीव्रतं त्विदम् वहुरात्रि व्यापिनी या सात्र
पूर्णा विशिष्यते एवं लक्ष्मीव्रतं कृत्वा न दरिद्रो न दुःखभाक् कथां श्रुत्वा विधानेन व्रतस्यास्य फलं लभेत् ५८
॥ इति श्रीसनत्कुमारसंहितायां कार्तिकमहात्म्ये नवमोध्यायः ९ ॥ ॥ वालखिल्या ऊचुः कस्मादिमासकमतः
कार्तिकस्यादिमातिथिः आकाशदीपदानं तु कुर्वंतु क्रम्बिम नमाः तुलायां तिलतैलेन सायं सन्ध्यासमागमे आकाशदीपं यो
दद्यान्मासमेकं निरन्तरम् स श्रिका पश्रीपतये श्रियानस वियुज्यते आकाशदीपवंशास्तु विंश हस्तात्तमो भवेत् मध्यमोन श्रीः
वहस्तस्तु कनिष्ठः पञ्च हस्तकः यथा दूरस्थितैर्लोकैर्दृश्येत तत्तथाचरेत् तथान्याह्निक राण्ड पुरी पदानं विशिष्यते वंश १३

स्यनवमांशेनलम्बाकार्यायताकिका मयूरपिछमुष्ठिंवाकलवंशोपरिन्यसेत् विष्णुप्रीतिकरोदीपः पितुरुद्धारस्यकारकः ९
एकादश्यामुलाकोद्धदीपदानमतोपिच दामोदरायनभसितुलायांलोलयासह प्रदीपंतेप्रयच्छामिनमोनन्तायवेधसे
आकाशवंशमदर्शपितुरुद्धारकंनहि अत्रार्थेकथयिष्यामिचेतिहासंपुरातनम् विप्रोभवद्धविन्ध्याद्रौहोलिकोनामतापसः
वेदशास्त्रप्रवीणश्चज्ञानविज्ञानसंयुतः तस्यपुत्रद्वयंजातंचित्रभानुर्मनोजवः १० वेदशास्त्रार्थनिरतावुभौधर्मपरायणौ
द्यूतस्यव्यसनंजातंतयोर्दैवस्ययोगतः व्यसनेनतुतेनैवपितृद्रव्यंविनाशितम् जातंपरस्त्रीव्यसनंएवावस्थावतोस्तयोः न
जायंतेनिर्धनानांद्यूतंवेश्यास्त्रियोपिच चौर्यंविधीयतातस्मादेवंमन्त्रयतुस्त्वतौ चक्रतुस्तत्रचौर्याणिलोकेज्ञातौविमाविति
ततःसंत्यज्यतंदेशंययतुर्गहनंवनम् मृगयाजीविनौजातौसर्वधर्मवहिष्कृतौ प्रातःस्नानंप्रकुर्वन्तावेकंधर्मंसमाश्रितौ १४
तस्मिन्वनेनिवसतिभिल्लेन्द्रोजिलरिल्लिकः ननानीनामतत्कन्यासौन्दर्यस्यैकशेवधिः दृष्ट्वातौतस्यसोऽस्रूराद्युभावापितयान्तौ
तयासर्वंपितृद्रव्यंताभ्यामेवसमर्पितम् एकंधर्मंमापिचक्रेपित्रर्थंदीपदानकम् एकदातुतयाप्रोक्तौननान्याभ्रातरावुभौ १८
अद्यमज्जनकश्राद्धंलुराठनीयोनकोपिहि उभावपिमयाविप्रौमयाभोज्यौयथेप्सितम् अन्योपिकेविद्विप्राश्चेन्मयाभोज्यास्त्व
सर्वथा ब्रह्मचर्यव्रतीवाहयुवामपितथैवतु मयासहनसंबन्धःक्रियतामितिचाहसा ततस्तयातिसंभारंमांसानिविविधानि
च २१ शाकपाकादिकंसर्वंतयानिःपादितंततः ताभ्यांभुक्तंयथेष्टंचववृतीवकनीयसा ततस्त्वजीर्णमभवदसाध्यमविलंबकं

कार्त्तिकम ततः कालवशं प्राप्तो वने तस्मिन्मनोजवः बद्ध्वा यमभटैर्नीतः संयमिन्यां च कुद्वितः चित्रगुप्तस्तु तं दृष्ट्वा दूतान्वाक्यमथाब्रवीत्
१४ नयन्त्वेनं तु पापिष्ठमन्धतामिस्रसंज्ञकम् त्यजन्तु कुम्भीपाके च शीर्षसंस्कार्यं तु च २५ कुम्भीपाके ततः क्षिप्तो नायं तस्मिन्
विपच्यते अन्धतामिस्रके क्षिप्तस्तत्र पश्यति हव्यवत् इत्याश्चर्यं श्रुत्वा दूता धर्मराजं व्यजिज्ञपुः दूता ऊचुः कुम्भीपाके तिसं
क्षिप्तोऽपि क्षिप्तो [illegible]भिर्मनोजवः न तस्य जायते पीडा अश्मा तिमत्स्यो यथा जले यम उवाच आनीयतां ततस्तूर्णमीषत्पुण्यं मनो
जवम् धर्मराजाज्ञया तैस्तु समानीतोस्य सन्निधौ दृष्ट्वा तं धर्मराजोपि दूतानाज्ञापयेदिति सदास्य स्नानशीलत्वात्कुम्भीपा
केन बाधते न तान्याकल्पितो दीपः पित्रर्थं गगने शुभः निक्षिप्त एतद्धस्तात्तत द्विशांशफलं तु तत् अनेन लब्धं तु तस्यैव पु
ण्यात्तामिस्रनाशनम् पुण्यद्वयभरादस्य निरये वसतिर्नहि तस्मात्पिशाचदेहो यं क्रियतां धर्मभोगभाक् ३२ ततः पिशा
चो भूत्वासौ तस्मिन्नेव तु पिप्पले अहादिस्यो रक्तमन्नं भुक्त्वा तत्रैव तिष्ठति एकदा तु चतुर्दश्यां सन्ध्याकाल उपस्थिते कुस
पक्षे दीपदानं कर्तुं पितृहिताय सा तनान्नुपगता भर्ता मृगयार्थं क्वचिद्गतः स्नाता स्वच्छाम्बरं धृत्वा नानालंकारभूषिता ३५
प्रयोसा दीपदानार्थमाक्रान्ता तेन रक्षसा पूर्वजन्मनि संबन्धो येषां ये यां प्रजायते तदेवं भूतैर्बध्यन्ते न कदाचित्परे जनाः
तेन धृष्टा तु सा बाला क्षणोन्मत्ता बभूव ह भक्ताभूषणकाद्यं च जहास च रुरोद च गीतं गायति चात्मानं कदाचित्ताडयत्य श्रीः
पि नृत्यं च कुरुते कापि क्षणाद्दन्तांश्च खादति सर्वे भिन्नाभिन्न पत्यस्तद्दासा दासिकास्तथा भ्रातृपुत्रादिकाः सर्वे स्त्रा १४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतास्तुसहस्रशः कश्चिद्वदतिवातोयंकश्चिद्वक्तिपिशाचकः ४० डाकिनीशाकिनींकेचिदभिचारमथापरे यक्षंदेवंदानवंच
धत्तूरादिकभक्षणम् ४१ तर्कयन्तिपरेलोकाद्दुष्टजीवस्यदंशनम् म्रियतांवध्यतामेकोधूप्यतांदीप्यतांपरः कश्चिन्मन्त्रयते
तांचभेषजंचापिकुर्वते एतस्मिन्नन्तरेभर्त्ताविचित्रभ्रातुःसमाययौ आकारितास्तुमंत्रज्ञाउपायाबहवःकृताः कंचित्ताडयते
सापिकिञ्चिद्वदतिगच्छति कंचित्प्रीणयतेस्वर्थंबलादपिकदाचन बलिदानादिग्रहणेनगच्छामीतिवदत्यपि बधाकश्चिद्दो
रकेणातिष्ठतिष्ठतिमूर्छिता भिनत्त्युलूखलंक्वापिगृहंपातयतिक्वचित् एवंजातात्वसाभ्यासागृहमध्येनिवेशिता एकदा
तेनमार्गेणबहवःकेरलाजनाः ४२ पञ्चगङ्गोदकंगृह्यकेरलेश्वरशासनात् भाद्रमासिप्रस्थितास्तेतद्गेहेवसतिःकृता ते
षांमध्येसुधीःकश्चिद्द्रात्रोपांचनदंस्तवम् अपठद्रामरक्षादिविष्णुपञ्जरकादिच तच्छ्रुत्वातुपिशाचोसौजातःप्रस्वस्थमान
सः संदेहघबन्धनादींश्चत्यक्त्वाचेष्टांसुसंस्थिता ततस्तेनतुभक्तेनशयनायाऽऽस्तरःकृतः चिक्षेपस्यानशुद्ध्यर्थंपञ्चग
ङ्गोदकंचतैः ततस्तत्रतच्छिरसिविन्दवःपतिताःखग ज्ञानंतस्यसमुत्पन्नंविन्दुस्पर्शनमात्रतः उवाचवचनंचाग्रकेभवन्तः
समागताः तोयमेतत्स्थितंकुत्रकिंवाज्ञानोदकंत्विदम् दत्वाकिंचित्प्राशनार्थंदीयतांस्वल्पमेवहि कृपालुनातेनदत्तं
जलंपाञ्चनदंशुभम् तत्पीत्वाविमलाबुद्धिःक्षणादेवाभ्यजायत पूर्वजन्मचसस्मार यमलोकागमंतथा ४३ गत्वाभ्रातुः
सचरणौधृत्वादीनंसरोदह आत्मनश्चगतिःप्रोक्ताउपायोस्याविधीयताम् भ्रात्रासर्वेकार्पटिकाःपृष्टास्तेऽच्युरादरात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कार्तिकम॰ कार्पटिका ऊचुः जानाति काशितीर्थानां महिमानं महेश्वरः यज्जलस्पर्शमात्रेण पिशाचो भूत्स सात्विकः अस्मभ्यं दीयते राज्ञा
१५ एको ग्रामस्स्व वार्षिकम् स्वर्णमुद्राशतं चापि जलाहरणहेतवे गम्यतां पञ्चदिवसैर्भवद्भिः काशिकापुरी तिष्ठन्ति पण्डितास्त
त्र विचार्य गतिरुत्तमा एवं तद्वचनं श्रुत्वा गृहीत्वा सधनं बहु ६० स कुटुम्बः काशिकां सदर्श हरसेविताम् काशीप्रवेशकाले तु
गणैरीशैर्निराकृतः तत्क्रोशात् पिशाचो सावुवाच करुणं वचः भ्रातर्गणा मां रक्षन्तु ममोपायो विधीयताम् इति श्रुत्वा वचस्त
स्य चित्रभानुः समागतः कार्पटा सकलवृत्तान्तं पण्डितेभ्यो न्यवेदयत् तन्मोक्षणाय चादिष्टो दयस्त्वाकाशदीपकः आका
शदीपदानेन पिशाचोपि समागतः वाराणस्यां न नान्यः सपुत्रो भूत् गुणसंयुतः कृत्वा सर्वेपि ते काशीवासं मोक्षमवाप्नुवन् ६१
नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे नमो यमाय रुद्राय कान्तारपतये नमः मन्त्रेणानेन ये मर्त्याः पितृभ्यः खेतु दीपकम्
प्रयच्छन्ति गता ये स्युर्नरके यान्ति ते पि वै उत्तमां गतिमित्येते दीपदानं समये रितम् लक्ष्मीसन्तानसिद्ध्यर्थमारोग्याय प्रदीपये
त् आकाशे दीपदानं तु तथा श्रीविष्णुतुष्टये ६२ ॐ इति श्रीसनत्कुमारसंहितायां कार्तिकम॰ दशमोध्यायः १०
ॐ बालखिल्या ऊचुः कार्तिकस्यासिते पक्षे द्वादशी वत्ससंज्ञिता गोधूलिकालसंयुक्ता द्वादशी वत्सपूजने वत्सपूजा व
त्सश्चैव कर्तव्या प्रथमेहनि सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीम् गोक्षीरं गोघृतं चैव दधि क्षीरं च वर्जयेत् दिनान्ते सूर्यबि श्रीः
म्बार्धं तु भयत्र घटीदलम् ततो नीराजनं कार्यं निरीक्षेच्छुभाशुभम् नानादीपान् प्रकल्प्यादौ स्वर्णपात्रादिसंस्थितान् ४ १५

ज्वाल
नीराजयेद्दीपपूर्वान्निरीक्षेतशुभाशुभम् लापयित्वासर्वदीपाञ्जनराभिमुखान्न्यसेत् मुख्यादीपानवप्रोक्ता अन्यानपिचकल्पये
त् ज्वालाचेद्दक्षिणासंस्थाःसतेजस्काशिखान्विता स्थिराचेत्सौख्यदाप्रोक्ता विपरीतातुदुःखदा कार्तिकेशुक्लपक्षेतुद्वादश्यादि
षु पञ्चसु तिथिषूक्तापूर्वरात्रेनृपाणांनीराजनाविधिः पक्षसंख्यावयस्याद्वे द्वितीयेमासमेककम् तृतीयेऋतवःप्रोक्ता चतुर्थेत्व
यनेत्वब्दा वर्षंतु पञ्चमेदीपेशुभेशुभाशुभविनिर्णये स्फुर्यांशासंभवादीपा अन्धकारविनाशकाः त्रिकालंमेदीपयंतुदिशन्तु
चशुभाशुभम् अभिमन्त्र्यचमन्त्रेणततोनीराजयेत्क्रमात् आदौदेवांस्ततोविप्रान्हस्तिनस्तुरङ्गमान् ज्येष्ठान्श्रेष्ठान्सुय
न्यांश्चमातृमुख्याश्चयोषितः ततोनीराजितान्दीपान्स्वस्वस्थानेषुविन्यसेत् २२ कृष्णेर्लक्ष्मीविनाशःस्यात्श्वेतैरत्नक्षयोभ
वेत् अतिरिक्तेषुयुद्धानिमृत्युःकृष्णशिखेषुच एकाङ्गीनामगोपालीतयैतच्चकृतंव्रतम् धनधान्यसमायुक्ताजातावर्षत्रये
णसा २४ ऋषयऊचुः काएकाङ्गीकथंजाताधनधान्यसमन्विता एतद्विस्तरतःश्रोतुमिच्छन्त्येतेतपोधनाः वालखि
ल्याऊचुः आसीत्पुराहृषीकेशोसंचेलोधेनुलोलुपः गवामष्टसहस्राणितद्गेहेनिवसंतिच वत्सादीनांनसंख्यास्तितथाले
केगणामपि तस्यैकाकन्यकाजाताएकाङ्गीनामविश्रुता नापुत्रस्यतुलोकोस्तीत्यादिवाक्यैःप्रपञ्चितः पुत्रार्थंतुमहायत्नं
मञ्चेलोसावथाकरोत् गोशतानांसहस्रंतुनीलोत्सर्गशतंतथा कृतंसंचेलकेनात्रततःपुत्रोभ्यजायत दुन्दुभिर्नामविख्या
तस्तेषामासीत्पुरोहितः अतीवकुटिलोधूर्तोलोभिनांमाशिरोमणिः २० लाभेच्छुपातुतेनोक्तंमूलजातोहिबालकः अन्यत्र

६१

कार्तिक॰ दृष्टं किमपि किञ्चिद्दत्वा विदायितः आकारितापितृभ्यां तु एकाङ्गी चञ्चलेक्षणा· नयेमं बालकं शीघ्रं मुखे दत्वा घृतं मधु २३
१९ क्षिपस्व तूर्णं गङ्गायामस्माकं सुखवृद्धये· एकाङ्गी तं समादाय दयाविष्टमानसा आस्थापितं गह्वरे तं महावृक्षस्य कोटरे·
वारत्रयं समागत्य दिवसेषु निशासु च· तस्मै पयः पाययित्वा पुनर्याति स्वकं गृहम् जातोसौ वर्षमात्रेण कलभाषी स बाल
कः २५ श्रुत्वा श्रुत्वा वदेद्वाणीं नानापक्षिचतुष्पदाम्· एकाङ्ग्यपि च संजाता यौवनाक्रान्तदेहिका· एकाङ्गी दुन्दुभिः प्राह य
कान्ते वचनं लघु· मा त्वं वरय भद्रं ते कुलपूज्योस्मि तेनघे स्वर्णाढ्यां त्वां करिष्यामि नानावस्त्रोपशोभिताम्· इति तद्वचनं श्रु
त्वा एकाङ्गी वाक्यमब्रवीत्· धिङ् मूर्ख कामदुष्टात्मन् न हं त्वाभीरकन्यका· ब्रह्मबीजसमुद्भूतः कथं मां वरयिष्यति २९
दुन्दुभिरुवाच· चतुर्णां कन्यका विवाह्या ब्राह्मणैः शुभे पितामहेनेदमुक्तं तस्माद्भार्या भव स्वनः ३० एकाङ्ग्युवा
च याचकं न वरिष्यामि न च कारणाकुरूपकम्· सुशीलं च सुरूपं च भर्तारं वरयाम्यहम्· नानाप्रकारैः सा बाला दुन्दुभि
ना प्रलोभिता नाभूद्यदा तस्य वश्या तदा क्रोधं चकार सः अन्यायेध्रीयतां चेयं ताडनीया तथा मया एकान्ते वा घातनी
या किं त्विमन्वेषयाम्यहम्· इत्थं विचार्य विप्रोसौ तस्याः पश्यति कौतुकम्· निलीय दिवसे विप्रस्तया सार्धं गतो वने· अपश्य
द्रूतश्चेष्टां तस्या दुष्टो द्विजाधमः तया निष्कासितो बालो दुग्धं दत्वा यथोचितम्· क्रीडयित्वा क्षणं तत्र पश्चात्संस्थापितः पुनः श्रीः
अकरोच्च गवां रक्षां विप्रेणात्थं विलोकितम्· आगत्यासौ गृहे शीघ्रं संवैलं वाक्यमब्रवीत्· अहं समित्कुशाद्यर्थं गतो भागी १९

रथीतटे एकाकीतत्रसंदृष्टा क्रीडन्ती यवनैः सह यवनाद्वालको जातः स्थापितः कोटरेस च अहो नष्टं तव कुलं नरकेषु पतिष्यसि
शाल्यये कथयिष्यामि नो चेत्त्वां त्यज दुर्मते तस्याः पुत्रं च तं चापि वध्वा पृष्ठे वृषस्य च वनमध्ये त्यजाक्षि सं वहि कारो न्यथा भवेत् ४०
राज्ञां च दण्डनीयस्त्वं ज्ञातीनां च बहिष्कृतः कन्यकारक्षणाद्देव नरकेषु पतिष्यति संवेलस्त्वासितेस्तेन जगाम गहनं वनम् ता
वुभौ वृषपृष्ठे तु वध्वा त्यक्तौ वने तदा वृषोपि तां समादाय ययौ देवस्य योगतः हरिद्वारं तया सार्धं बन्धः शैथिल्यतां ययौ बन्धा
द्विनिर्गता सा तु बालको पि विमोचितः वृषभस्तेन पाशेन बद्धो बालिकया तया जानाति वनमार्गान्सा वृषेणाद्यपश्चाद्दुलम् कन्दा
दिकं भक्षयित्वा कुटीं तत्र चकार सा ४५ तृणान्यानीय विक्रीतेतेनैव वृषभेण सा पुष्णाति तेन द्रव्येण भ्रातरं वृषभं च सा आग तथा
ते कार्तिके मासि लोका स्नानार्थमाययुः स्नानार्थं तु समानीतास्ते गावो देशदेशतः इमां गोपालिकां ज्ञात्वा रक्षणाय सदुःस्थिते
आनीय भूयसी सेवा आरब्धा तु गवां खग संदृश्य लोकः स्वीयागा वत्सेनामभ्यनन्दत इष्यासित हरेस्तिथ्यां गोपूजा विहिता वैः कृता
तां दृष्ट्वा बालिका सापि पूजां चक्रे यथाविधि अतिभक्त्या बालिकया चेत्थं वर्षत्रयं कृतम् ५० तस्या दैववशात्तत्र संवेले शः समा
ययौ स्नानाय कार्तिके मासि गङ्गाद्वारे मुनीश्वराः दृष्ट्वा वने बालिकां सा वनकौतुकदर्शिनी पृष्टोदन्तं ततस्तस्याः पाणिग्राहमची
करत् तदाज्ञया हृषीकेशः समागत्याथ वेष्टितः दुन्दुभिश्च नृपस्तत्र धृतस्तस्या पिताभ्यति धिक्कृतो दुन्दुभिस्तेन तया शापं प्राप्य सो
पुनः अद्यारभ्य नरा लोके कारणं विश्वासकारकाः अवश्यं विलयं यान्ति कार्तिके न शपाम्यहम् इत्युक्त्वा चार्चितस्तस्मै संवेला

कार्तिकम॰ यस्तबालकः[५५] गोव्रतं तु हृषीकेशो चोपदिष्टं तथा खग॰ पित्रोर्धनादिकं दत्वा भर्त्रा सार्धं जगाम सा॰ तस्मात्कोऽपि जनं कार्यं द्वादश्यां कार्ति
१७ कस्य तु॰ एतद्गोव्रतमाहात्म्यं श्रुत्वा कुर्वंति ये नराः तेगोव्रतप्रभावेण न गोभिर्विच्युता भुवि॰ गोपराधः कृतो यः स्यात्तद्व्रताद्विलयं व्र
जेत् ५८ ❁ इति श्रीसनत्कुमारसंहितायां कार्तिकमहात्म्ये वत्सद्वादशीमहात्म्यं नामैकादशोध्यायः ११ ❁ बालखि
ल्या ऊचुः कृष्णपक्षे त्रयोदश्यां मासि चाश्वयुजे तथा॰ दीपोत्सवसमीपे तु व्रतमेतत्समाचरेत् प्रातःस्नात्वा त्रयोदश्यां कृत्वा वै दन्त
धावनम्॰ त्रिरात्रनियमं कृत्वा गोविन्दे भक्तितत्परः कार्यमेतद्भुतस्यान्ते गोवर्धनमहोत्सवः त्रिमुहूर्ताधिका ग्राह्या परवेधान
दोषभाक् बालखिल्या ऊचुः आश्विनस्यासिते पक्षे त्रयोदश्यां निशामुखे॰ यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति एकदा धर्मराजे
न दूताः सर्वे पि चैकतः॥ कृत्वा प्रोवाच वचनं ते सन्त्यद्भुतमनामायतः उच्चावचां मारयतां भवतां जायते दया॥ क्वचिज्जाता अथवा नैव सत्यं ब्रूत
ममाग्रतः॥ ॥दूता ऊचुः॥ इदं प्रश्न्ये महाराज्ञो हंसो नाम बभूव ह॥ एकदा मृगयार्थं स गतः सैन्यसमावृतः॥ तत्रापश्यन्मृगं वै
केमृग्या सह विनिर्गतम् स्त्रीतोन्मत्तकामरंगीतेन नृहरिणार्थं कृतोद्यमः मृगोपि भूपतिं दृष्ट्वा पलायनपरोभवत् तत्पृष्ठे नृह
थस्त्यक्तः स्वकीयैस्तेन भूमृजा॥ अतितृषः तां क्वचिद्याति दूरे पोसौ जायते क्वचित् देशाद्देशान्तरं यातः शराश्चेराप्तया तिसः
आमध्याह्नगतस्तस्य दृष्टे राजा हृयास्थितः मृगंपलायगतवान् राजापि श्रममूर्छितः घर्माक्रांतः पिपासार्तो नृहदेराज श्रीः
१७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लंकचित् वटच्छायां क्षणं सेव्य जलाधारं ददर्श सः सैन्यं न दृष्टवान् मार्गं जलस्यापि न दृष्टवान् क्षुधया पीडितो प्यासीत्सोपि श्रम
पीडितः आडिशाद्दं मस्तु श्रावक्षुधितास्ताः प्रयान्ति हि प्रहस्यात्वस्य तच्छाखां चलितस्तेन वर्त्मना क्रोशोपरि ददर्शाग्रे कासारं पंक
जान्वितम् हंसकारण्डवाकीर्णं स्थाने स्वमनोहरम् नानापद्मैः परिवृतं सुज्वलन्तमिवज्वलम् नृपो दृष्ट्वा नतं तडागं हृतकृत्य इवाभ
वत् ९६ स्वयं पीत्वा जलं पश्चादश्वायापि निवेदितम् ददर्श धीवरांस्तत्र नानामत्स्योपहिंसकान् तान पृच्छन्महराजो ग्रामोस्ति
निकटे क्वचित् कोत्राइर्ध्वं तु नगवा ग्रामोस्ति नगरोपमः संवर्तो नाम तत्रत्यः सामन्तकमहीपतिः स्वगृहद्वारि वासार्थं पथिकानां
नृमरडपः रचितोस्ति च गन्तव्यं त्वया तत्र सुखेप्सया स्नानपानादिकाष्ठानां सौकर्यं तत्र विद्यते राजोवाच इन्द्रप्रस्थस्थ
लादस्मात्कियद्दूरे व्यवस्थितम् केन मार्गेण गन्तव्यं प्रब्रूत मत्स्यघातकाः २१ धीवरा ऊचुः अस्मान्नैऋत्यकोणे तु नवयोजनदूरतः
इन्द्रप्रस्थपुरं रम्यं वर्तते राजसेवक इति तद्वचनं श्रुत्वा अद्य गन्तुं न पार्यते गृहं प्रतीति निश्चित्य ग्राममध्ये ययौ नृपः तेजो
विशेषानुमितः कश्चित्प्रौढः पुमानिति इति ज्ञात्वा तु सद्वैकादत्वास्मै वेश्म नायच भक्षणार्थं समानीत अन्नं जस्त्रिपिटादधि
शीततोयं समानीतं किञ्चिद्भुक्तं नृपेण तत् रात्रौ तत्रैव संसुप्तो जागार्ति पुनः पुनः ग्रामेशजातपुत्रस्य षष्ठाहस्तादिने भवत् २६
ददर्श नृपती रात्रौ नारी याति चतत्त्वहम् दीर्घात्यंतं रूपवती लेखनी हस्तशालिनी तदञ्चलं गृहीत्वा स पर्यपृच्छत कासि च नो
याचवचनं सा तु नृपेणाक्षपिता पुनः बलात्कारेणाञ्चलं सा गृहीत्वाभ्यन्तरे विशत् साहंकारो नृपो भूत्वा स्थितवान् तां प्रतीक्षयन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एजोवन्न

कार्तिकम पुनःसापिसमायातासद्यएववरानना बलात्कारेर्न्दपतिनाकरेधृत्वावचोब्रवीत् ३० कात्वंकस्यापलाशाक्षिसत्यंब्रूहिममाग्रतः
१८ अन्यथात्वांहनिष्यामिरोचतेयत्तथाकुरु श्रीजीवन्तिकोवाच मारितश्चमयात्वंस्याद्धर्मवत्वात्सुरासितः मुञ्चत्वंमांनचे
त्वांवैहनिष्यामिनसंशयः ४ अज्ञात्वातवद्वृत्तंतु नत्यक्ष्यामिकदाचन क्षत्रियःसन्यदाभीतस्तदासनरकंव्रजेत् अवश्यमेव
गन्तव्यंजीवितंनास्तिचास्थिरम् सर्वथाक्षत्रियेणैवनत्याज्याहृतिःक्वचित् समर्थस्त्वांहन्तुमहंस्त्रीत्वाद्दोषेनहन्यते जि
घांसन्तंजिघांसीयाद्वध्यंप्राणसंशये इतितद्वचनंश्रुत्वाषष्ठीवचनमब्रवीत् ३५ जीवन्तिकोवाच त्वंस्वधर्मरतोय
स्मात्तस्मात्तुष्टास्म्यहंनृप अहंजीवन्तिकादेवीललाटेक्षरमालिकाः जातकस्यलिखित्वाथस्वयंयास्यामिसत्वरम् राजो
वाच मातस्त्वयाकिंलिखितंतदिदानींनिगद्यताम् नमिथ्यालेखनंतेस्तितस्मात्तंश्रृणुयामहम् जीवन्तिकोवाच
विवाहस्यचतुर्थेन्हिसर्पसंसर्गदोषतः प्राक्कर्मतोस्यनिर्वाणंलिखितंतुमयानृप इत्युक्त्वासातदादेवीतत्रैवान्तरधीयत
अत्याश्चर्यंनृपोमत्वाविघ्नमत्रकरोम्यहम् निश्चित्येत्यमुषःकालेप्रस्थितोनृपतिःस्वयम् ४० ततोमन्त्रिगणमाहूयवाक्य
मेतदुवाचह भाण्डारिकंधनंगृह्यतूर्णंकुरुममाज्ञया यमुनायाह्दस्थंगेहंसन्धिच्छिद्रविवर्जितम् सर्पवैद्यास्तुयेकेचिद्येम
न्त्रयजापकाः सर्वेषांमासिकंकृत्वास्थाप्यास्तेभ्यन्तरेजनाः ततईशानदिग्भागेग्रामोस्तिनगवाभिधः सामन्तिकोस्ति श्री
तद्ग्रामेनाम्नाहेमन्तिकोमहान् सकुटुंबःसमानेयःस्थाप्यतांसचमन्दिरे जातोयोबालकस्तस्यसम्पाल्यःप्रयत्नतः इतिराज १८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वचः श्रुत्वा प्रेषिता महती चमूः हेमनानयनार्थं तु मन्त्रिणा सा समादिशात् ग्रामं संवेष्ट्य सेनेशो हेमनं वाक्यमब्रवीत् ५६ हेमनः कम्पसंयु
क्तो वातेन कदली यथा आगतः पूर्वदिवसे कश्चिद्भूपस्य सेवकः पैशून्यं वा कृतं तेन यतः सेना समागता नापराधं महीपस्य न जाने किं भ
विष्यति ग्रामो वा लुण्ठनीयोऽस्ति वध्यो वास्मि नृपाज्ञया इति चिन्तयमानं तं सेनेशो वाक्यमब्रवीत् भयं त्यक्त्वा शुचं मुञ्च नृपाज्ञां
कुरु वेगतः कुटुम्बं बालकं गृह्य याहीन्द्रप्रस्थमादरात् तथैव नगवेशेन गृहीत्वोपायनं बहु दर्शनं कृतवान् राज्ञस्तेनासौ स्थापि
तो गृहे अपमृत्युविनाशाय यानि दानानि भूतले ५७ कृतानि जपहोमाश्च सर्वे राज्ञा तु कारिताः दर्शनार्थं समायाति बालकस्य
महीपतिः नानोपायैर्वर्धितोऽसौ जातः षोडशवार्षिकः स संजयस्य कन्यैकां सर्वलक्षणसंयुताम् दृष्ट्वा ग्रहांश्च चिन्हानि कुलं शीलं सु
रूपताम् दृष्ट्वा स्वयं भूपतिना बालकार्थं तु याचिता हर्षीकृताः सर्वजना विवाहश्च स्वयं कृतः ततश्चतुर्थे दिवसे प्राप्ते तु नृपतिः स्व
यम् आत्मीयत्वेन संगृह्य तस्य रक्षामचीकरत् जायते सर्वतश्चेष्टिरायुर्वर्धनकारिका ५८ विनानिमेषं नृपतिस्तं पश्यति
च बालकम् वयं तत्र गताः स्वामिन् कालाज्ञावसतो मम तदा दयासमुत्पन्ना कथमेष हि वध्यताम् अतिदुःखेन संजातः प्रेत
वोऽयं तदोरगः नृपस्य नासिकामध्ये नृपश्छिक्कामथाकरोत् तदा निर्गत्य सहसा दंशितोऽनेन बालकः हाहाकारो महानासी
ज्जीविताद्भूषितः [illegible] तज्जन्मदिनमारभ्य त्वहिंसाव्रतकारिणः जाता नृपाज्ञया लोकास्तदायुर्जातिकारकाः दयातत्र समुद् ६०
त्पन्ना त्वस्माकं सूर्यसंभव ६१ यथा न जीविताद्भ्रंशेद्दीक्षेतु महोत्सवे तथोपायं ब्रूहि यमकृपाकरास्मदयनः ६२ यमउवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कार्तिकम् १२ आश्विनस्यासिते पक्षे त्रयोदश्यां निशामुखे । प्रतिवर्षं तु यो दद्याद्गृहद्वारे सदीपकम् । मन्त्रेणानेन भो द्विजाः समानीय महोत्सवे
१९ प्राप्तेयं मृत्या वपिन्चशाशनं क्रियतामिति । मृत्युना पाशदण्डाभ्यां कालेन श्यामया सह । त्रयोदश्यां दीपदानात्सूर्यजः प्रीयता
मिति । मन्त्रेणानेन यो दीपं द्वारदेशे प्रयच्छति । उत्सन्नस्यापमृत्योश्च भयं तस्य न जायते । तस्मान्मुनिवराः सर्वे दीपं दद्युर्निशामु
खे ॥ ❀ ॥ इति श्रीसनत्कुमारसंहितायां कार्तिकमहात्म्ये द्वादशोध्यायः १२ ॥ ❀ ॥ बालखिल्या ऊचुः । पूर्वविद्धा
चतुर्दश्या माश्विनस्यासितेतरे । पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः । अरुणोदयतोन्यत्र रिक्तायां स्नाति यो नरः । तस्याब्दि
कभवो धर्मो नश्यत्येव न संशयः । तथा कृष्णचतुर्दश्यामाश्विने कोंदयेसुरः । यामिन्याः पश्चिमे यामे तैलाभ्यङ्गो विशिष्यते । बला
त्काराद्गृहापि शिष्टत्वान्नकरोति चेत् । तैलाभ्यङ्गं चतुर्दश्यां रौरवं नरकं व्रजेत् । तैले लक्ष्मीर्जले गङ्गा दीपावल्याश्चतुर्दशी । अ
पामार्गमथो तुम्बीप्रपुन्नाटमथापरम् ५ भ्रामयेत्स्नानमध्ये वै नरकस्य क्षयाय च । वारत्रयं त्रिवारं च पठित्वा मंत्रमुत्तमम् ६
सीतालोष्ठसमायुक्तः सकण्टकदलान्वित । हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः । इष्टबन्धुजनैः सार्धमेतत्स्नानं समाचरेत् । स्ना
नाङ्गं तर्पणं कृत्वा यमं सन्तर्पयेत्ततः । यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च । औदुम्बरा
य दध्नाय नीलाय परमेष्ठिने । वृकोदराय चित्राय चित्रगुप्ताय वै नमः १० चतुर्दशैते मन्त्राः स्युः प्रत्येकं च नमान्विताः । एकैकेन तिलै श्रीः
र्मिश्रान्दद्यात्त्रीनुदकाञ्जलीन् । यज्ञोपवीतिना कार्यं प्राचीनावीतिना तथा । देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता १२ १९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोः नरकायप्रदातव्योदीपःसंपूज्यदेवताः अत्रैवलक्ष्मीकामस्यविधिःस्नानेमयोच्यते
इषेभूतेचदर्शेचकार्तिकप्रथमेदिने यद्धस्वातीतदाभ्यङ्गंस्नानंकुर्याद्दिष्टदये ऊर्जशुक्लद्वितीयायांतिथौचस्वातियुग्मके
मानवोमङ्गलस्नायीनैवलक्ष्म्याविमुज्यते दीपैर्नीराजनात्तत्रसैषादीपावलीस्मृता इन्दुक्षयेपिसंक्रान्तौरवौपातेदिनक्ष
ये अत्राभ्यङ्गेनदोषायप्रातःपापापनुत्तये माषपत्रस्यशाकेनभुक्त्वातस्मिन्दिनेनरः प्रेताख्यायांचतुर्दश्यांसर्वपापैःप्रमु
च्यते १२ इषासितचतुर्दश्यामिन्दुक्षयेतथावधे दर्शादौस्वातिसंयुक्तेतथादीपावलीभवेत् कुर्यात्संलग्नमेतच्चदीपोत्सव
दिनत्रयम् आश्विनस्यासितेपक्षेत्रयोदश्यादिषु क्रमात्पदत्रयेर्विष्णोर्गृहीतंभुवनत्रयम् महाराजोवलिःप्रोक्तस्तुष्टेन
हरिणाततः वरंयाचयभद्रंतेयद्यन्मनसिवर्तते इतिविष्णोर्वचःश्रुत्वावलिर्वचनमब्रवीत् १६ आत्मार्थंकिंयाचनीयं
सर्वंदत्तंमयातव लोकार्थंयाचयिष्यामिशक्तश्चेद्देहितन्ममे मयाद्यतेधरादत्तावामनच्छद्मरूपिणे त्रिभिःपदैस्त्रिदि
वसैःसाचाक्रान्तायतस्त्वया तस्माद्दिनत्रयंराज्येमस्तुयस्त्रयंहरे मद्राज्येयेदीपदानंभुविकुर्वन्तिमानवाः तेषांगृहेतव
स्त्रीयंसदातिष्ठतुसुस्थिरा ममराज्येगृहेयेषांमन्धकारःपतिष्यति लक्ष्मीसन्तानान्धकारःसदापततितद्गृहे चतुर्दश्यांच
येदीपान्दद्यन्तिनरकायच तेषांपितृगणाःसर्वेनरकेनवसंतिच वलिराज्यंसमासाद्ययैर्नदीपावलीकृता तेषांगृहेकथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२३
कार्तिक म· दीपाः प्रज्वलिष्यंति केशव· वलिराज्ये तु ये लोकाः शोकानुत्साहकारिणः तेषां गृहे सदा शोकः पतेदिति न संशयः· चतुर्दशीत्रये
२० राज्यं वलेरस्तीति याचयेत्· पुरा वामनरूपेण प्रार्थयित्वा धरामिमाम्· दत्तावदितिरिन्द्राय वलिं पातालवासिनम्· २५
कृत्वा दैत्यपतेर्दत्तं हरिणा तद्दिनत्रयम्· तस्मान्महोत्सवं चात्र सर्वथैवाहिकारयेत्· महारात्रिः समुत्पन्ना चतुर्दश्यां मुनीश्वरः
औषध्यश्च पिशाचानि मन्त्राश्च मणयस्तथा· सर्वस्वापहव्यन्तिनृत्यन्ति च निशामुते· तत्तन्मन्त्राश्च सिध्यंति वलिरा
ज्ये न संशयः वलिराज्यं समासाद्य यथा लोकाः सुहर्षिताः तथा तद्दिनमध्येपि लोकाः सुहर्षिता भृशम्· तुलासंस्थे सहस्रां
शो प्रदोषे भूतदर्शयोः उल्काहस्ता नराः कुर्युः पितृणां मार्गदर्शनम्· ३० नरकस्थास्तु ये प्रेतास्तेषां मार्गं व्रतास्सदा· पश्यन्ते
व न सन्देहः कार्योत्र मुनिपुङ्गवैः आश्विने मासि भूतादितिथयः कीर्तितास्त्रयः दीपदानादिकार्येषु आद्यामध्यान्हकालिकाः
यदि स्युः संगवादूर्ध्वं गते च तिथयस्त्रयः दीपदानादिकार्येषु कर्तव्याः पूर्वसंयुताः ३२ इति श्रीसनत्कुमारसंहितायां
कार्तिकमहात्म्ये त्रयोदशोध्यायः १३ वालखिल्पा ऊचुः एवं प्रभातसमये त्वमावास्यां तु मुनीश्वराः स्नात्वा देवा
न्पितॄन् भक्त्या संपूज्याथ प्रणम्य च· कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्· न श्रीः
तः प्रदोषसमये पूजयेदिन्दिरां शुभाम्· कुर्यान्नानाविधैर्वस्त्रैः स्वच्छं लक्ष्म्याश्च मण्डपम्· नानापुष्पैः पल्लवैश्च चित्रैश्चापि विचित्रितैः· २०

तत्रसंपूजयेल्लक्ष्मींदेवांश्चापिप्रपूजयेत् संपूज्यादेवनार्योपिवहुभिश्चोपचारकैः पादसंवाहनंकुर्याल्लक्ष्म्यादीनांतुभक्तितः ५
अस्मिन्नहनिसर्वेपिविष्णुनामोचिताःपुरा· वलिकारागृहाद्देवालक्ष्मीश्चापिविमोचिता· लक्ष्म्यासार्धंततोदेवानीत्वाक्षीरोदधौ
पुनः प्रसुप्तावहुकालन्तेसुखंतस्मान्मुनीश्वराः रचनीयाःस्तत्रभागंपर्यंकाश्चसतूलिकाः दुग्धफेनोपमैर्वस्त्रैरास्तृताश्चयथादिशम्
स्थापयित्वासुरांल्लक्ष्मींवेदघोषसमन्वितः लक्ष्मीर्दैत्यभयान्मुक्तासुखंसुप्ताम्बुजोदरे· अतोर्थेविधिवत्कार्यातुस्यैतुसुखसुप्तिका
तदह्निपद्मशय्यांयपद्मासोरव्यामिवृद्धये १० कुर्यात्तस्यगृहंसुस्नातस्यपाज्ञापिनव्रजेत् नकुर्वन्तिनराइत्थंलक्ष्म्यायेसुखसुप्ति
काम् धनचिन्ताविहीनास्तेकथंरात्रौस्वपन्तिहि तस्मात्सर्वप्रयत्नेनलक्ष्मींसंपूजयेन्नरः सतुदारिद्र्यनिर्मुक्तःस्वजातौस्यात्प्रति
ष्ठितः जातीपत्रलवङ्गैलात्वककर्पूरसमन्वितः पातयित्वागव्यदुग्धंसितांदत्वायथोचिताम् लड्डुकांस्तस्यकुर्वीततांश्चलक्ष्म्यैनिवे
दयेत् अन्यच्चतुर्विधंभक्ष्यंदेशकालादिसंभवम् सर्वंनिवेदयेल्लक्ष्म्यैममश्रीःप्रीयतामिति· १५ दीपदानंततःकुर्यात्प्रदोषेच
तथोल्मुकम् भ्रामयेत्स्वस्यशिरसिसर्वारिष्टनिवारणम् दीपवृक्षास्तथाकार्याःशक्त्यादेवगृहादिषु चतुःपथेश्मशानेचनदीप
र्वतवेश्मसु वृक्षमूलेषुगोष्ठेषुचत्वरेषुगृहेषुच· वस्त्रैःपुष्पैःशोभितव्याराजमार्गस्यभूमयः गृहेषुस्थापयेन्नानापक्वान्नानिफ
लानिच नागवल्लीदलादीनिरचयित्वाचनिःक्षिपेत् शोभांकुर्याद्राजमार्गेसकलेश्चविशेषतः तदभावेऽम्वरादीनिकृत्वातानि
चशोधयेत् २० एवंपुरमलंकृत्यप्रदोषेतदनन्तरम् ब्राह्मणान्भोजयित्वादौसंभोज्यचवुभुक्षितान् लड्डूकापूपमण्डाद्याः९

कार्तिकम॰ शष्कुलीः पूरिकादिकाः अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिना ततोपराह्णसमये घोषयन्नगरे नृपः अद्यराज्यं वलेर्लोका
२१ यथेष्टं क्रीड्यतामिति यथेच्छं क्रीडतां वालाः इत्याज्ञाप्य नृपेण तु विलोक्य वालकक्रीडां नानासामग्रिसंयुताम् तेभ्योदद्या
त् क्रीडनकं ततः पश्यन् शुभाशुभम् तैस्तैः प्रधूपितो वन्हिर्न ज्वालां मुञ्चते यदा महामारीभयं घोरं दुर्भिक्षं वाथजायते वालहृ
ष्टे राजशोकस्तेषां तुष्टौ नृपसुखम् वालयुद्धे राजयुद्धं रोदनं वालकैः कृते अवश्यमेव भवति वर्षाशस्यविनाशनम् २७ यष्टिका
दिकृतान् स्थान् यदा रोहन्ति वालकाः तदा राज्ञो जयो वाच्यः परराष्ट्रविमर्दनम् यदा क्रीडन्ति वालाश्च लिङ्गं धृत्वा करादिषु त
दाप्रसिद्धनारीणां व्यभिचारः प्रजायते अन्नं यदा गोपयन्ति क्रीडने वालकाजलम् दुर्भिक्षं वृष्ट्यभावश्च शीघ्रमेव प्रजायते ३०
एवं वालकृतां चेष्टां वुध्वा चोह्यफलं वदेत् लोकश्चापि पुरे रम्ये सुधाधवलिताजिरे गीतवादित्रसंजुष्टे प्रज्वालितसुदीपके अन्यो
न्यप्रीतिसंयुक्तदत्ततालनकेजने ताम्बूलहृष्टहृदये कुंकुमक्षोदचर्चिते दुकूलपट्टवसने पथ्यस्वर्णविभूषणे मित्रस्वजनसं
वन्धिस्वगोत्रज्ञातिपूजने वलिराज्ये प्रकर्तव्यं यथान्मनसि वर्तते जीवहिंसासुरापानं स्तेयं मातृसमागमः हित्वातदन्यत्
कर्तव्यं वलिराज्येन दोषभाक् आत्मनोयच्च सौख्यार्थं परदुःखाकरं कृतम् वाराङ्गनादिगमनं स्पृष्टास्पृष्टादिभक्षणम् ३८
अन्याचारश्रुतिश्चापि धूतायं चेन दुष्यति एवं तु सर्वथा कार्यो वलिराजमहोत्सवः जीवहिंसा सुरापानमगम्यागमनं तथा चौ श्री॰
र्यं विश्वासघातश्च पञ्चैतानि मुनीश्वराः वलिराज्ये तु नरकद्वाराण्युक्तानि तत्त्यजेत् ततोर्धरात्रसमये स्वयं राजा व्रजेत्पुरम् २१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवलोकयितुं रम्यं पश्यामेव शनैः शनैः महता तूर्यघोषेण उज्वलद्भिर्हस्तदीपकैः ३० हर्म्यशोभा सुखं यावत् कृतकौतुककैर्नरैः
बलिराज्ये प्रमोदं च दृष्ट्वा स्वपुरमाव्रजेत् एवं गते निशीथे तु जने निद्रार्धलोचने तावन्नगरनारीभिः सूर्पडिंडिमवादनैः निष्का
श्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात् द्यूतेन कर्जनी योगे दर्भैः स्यात्तु परेहनि तदा विहाय पूर्वेद्युः परे ह्नि सुखरात्रिका येवै
स्वा वेष्टनवाश्च बलिराज्योत्सवं नराः न कुर्वन्ति वृथा तेषां धर्माः स्युर्नात्र संशयः ३५ ॥ इति श्रीसनत्कुमारसंहितायां का
र्त्तिकमहात्म्ये चतुर्दशोध्यायः १४ ॥ बालखिल्या ऊचुः प्रतिपद्युदये भ्यङ्गं कृत्वा नीराजनं ततः सुवेषः सत्कथागी
तैर्दानैश्च दिवसं नयेत् शंकरस्तु पुरा द्यूतं ससृर्जे सुमनोहरम् कार्त्तिके शुक्लपक्षे तु प्रथमे हनि सत्यवत् प्रयुवाच च चस्वे
दं देवीं प्रति सदाशिवः काललक्षयाय केषांचित्केषांचिद्धनहेतवे केषांचिद्धननाशाय पश्य द्यूतं कृतं मया तस्य त्वं कौतुकं
पश्य भवनं लापयाम्यहम् उक्त्वेत्थं क्रीडितं ताभ्यां भवान्या च जितं तदा पुनर्द्वितीयं भवनं लापितं निर्जितं तया ५
पुनस्तृतीयं भवनं लापितं निर्जितं तया पुनर्वृषः पुनश्चर्म पुनः पन्नगबन्धनम् शशिलेखा डमरुकमर्धाङ्गं चाप्य
जीजयत् निर्गतस्तु हरो गेहाद्गत्वा वल्कलधारकः गंगातीरं समध्यतस्थौ चिन्तासमन्वितः तस्मिन्क्षणे कार्तिकेयः खे
लितुं च गतः क्वचित् गंगातीरा द्यये गेहम् पश्यत्यथ शिशंकरम् ईषत्क्रोध च विरक्तं च ननाम च रणोपितुः तेनापि मू
र्ध्नी चाघ्राय पुत्र याहि गृहे सुखम् तव मात्रा जितश्चाहं गच्छामि गहनं वनम् १० स्कन्द उवाच कथं मात्रा जितो देवाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५
कार्तिक० नंकस्माच्चगच्छति अहमप्यागमिष्यामि त्वत्पादौ सेवयाम्यहम् शिवउवाच विजित्य तव मात्रातु क्षणं न स्थेयमत्रवै म
मलोके तथेत्युक्त्वा कवि रुष्टाप्यहं ततः स्कन्दउवाच आगच्छ त्वं महादेव द्यूतमार्गः प्रदृश्यताम् आनीयते मया जित्वा
२२ तव सर्वं धनादिकम् शिवेनाथ तथेत्युक्त्वा द्यूतमार्गः प्रदर्शितः स्कन्दोपि गृहमागत्य पार्वतीवाक्यमब्रवीत् ९ स्कन्दउवाच
देवि देवो गतः कासौ हृषभोत्रैव संस्थितः तवाङ्कं च विधुः कस्मान्मातः सत्यं वदस्व नः देव्युवाच स्वयमेव हृतं द्यूतं स्वयमेव प
राजितं स्वयमेव गतः क्रोधात्प्रार्थ्यते सो कथं मया स्कन्दउवाच मया सह क्रीडितव्यं कथं तत् क्रीडनं त्विति देव्या क्री
डनेन सार्धं ततः स्कन्देन निर्जितम् मयूरेण हृषस्तस्याः शक्त्या पन्नगबन्धनम् हृषेणेन्दुं ततो धाङ्गं स्वं सर्वं स्वेन निर्जितम् १३
कोपीनान्निर्जितं च मंगृहीत्वा तद्गुपाययौ गङ्गातीरे यत्र शिवस्तत्रागत्य न्यवेदयत् ततो देवीसमीपे तु विघ्नराजः समाययौ
गौरीं दृष्ट्वा विषण्णां च गणेशो वाक्यमब्रवीत् किमर्थं म्लानवदनं देवि जातासि तद्वद केन वा निर्जितासि त्वं सर्वं ब्रूहि ममाग्रतः
१६ देव्युवाच मया जितो महादेवः स तु गेहाद्विनिर्गतः आयास्यति इहा घर्ममिति निश्चित्य संस्थिताम् तवभ्रा
त्रा तु तज्जित्वा सर्वमस्मै निवेदितम् नायास्यत्यधुना देव इति चिन्तापरास्म्यहम् गणेशउवाच देवि शिक्षय मे द्यूतं जे
ष्यामि भ्रातरं हरम् आनयिष्यामि सामग्रीमद्यहं त्वां सुतस्तव इति पुत्रवचः श्रुत्वा तस्मै द्यूतमशिक्षयत् संगृहीत्वा पाश श्रीः २२
युग्मं सारिकां शीघ्रमाययौ दृष्ट्वा दृष्ट्वा यत्र देवः स्कन्दो यत्र व्यवस्थितः तत्र दृष्ट्वा महादेवं गणेशो वाक्यमब्रवीत् २१ गणेशउवाच

भवानीनाविमोपाशोसारिकानाघमेवच क्रीडतुमर्वसार्धंभोदेवस्याश्रेममायतः इतिभ्रातुर्वचःश्रुत्वाउभाभ्यांक्रीडितंतदा
मूषकेनवलीवर्दोमयूरंचाप्यजीजयत् शिवस्यसर्वविषयंस्कन्दस्यापितथैवच गृहीत्वाथतुविघ्नेशस्तत्कालंपार्वतींययौ २५
पार्वत्यपिचसंतुष्टागणेशंवाक्यमब्रवीत् सम्यक्कृतंत्वयाभद्रनानीतोसोमहेश्वरः सामदानादिकंकृत्वाआनीयात्रमहेश्वरम्
तथेत्युक्त्वागणेशोथसमारुह्यचमूषकम् अतित्वरितआयातोगृहीतुंमहेश्वरम् ईश्वरस्ततउत्थायहरिद्वारंसमागतः ना
रदस्यचवृत्तान्ताद्विष्णुस्तत्रसमागतः विष्णुरुवाच अक्षाविद्यांकुरुशिव एकाक्षोवैभवाम्यहम् रावणेनतथेत्युक्तंकारण
भवजनार्दन विष्णुरुवाच ओतुवत्सशपेत्वंतस्मात्तुर्भविष्यसि नारदउवाच देवमिदंमहत्कार्यंमापातितस्त्व
गणेश्वरः भवद्वृत्तान्तमज्ञात्वामूषकस्तस्यधर्षिताम् ३० इतिश्रुत्वानारदस्यवचनंरावणोगतः कुर्वन्मार्जारवच्छब्दंमूषकोसौप
लायितः मूषकंत्यज्यगणपःशनैःशनैरुपाययौ जातोविष्णुःपाशाइतिहरतस्तेनलोकितम् प्रणिपत्यमहादेवंविनम्रतरकंध
रः गणेशउवाच आगम्यतांदेवगेहंदेवीमानपुरःसरम् यदिनायासिगेहंत्वंप्राणांस्त्यक्ष्यतिचाम्बिका त्वय्यागतेम
यासर्वकार्यमेतदुपायनम् ३५ महादेवउवाच एषाक्षक्षामयाविद्याधुनागणपनिर्मिता अनयाक्रीडतेदेवीआगमि
ष्येगृहंततः गणेशउवाच सर्वथैवक्रीडितव्यंदेव्यानात्रसंशयः आगम्यतांगृहंदेवभ्रातरायाहिमाव्रज इतितस्यवचःश्रु
त्वाईश्वरःसगणोययौ नारदोपिगतस्तत्रमहोत्तुरपिचागतः उपविष्टास्तुकैलाशेदेवीतत्रसमागता दृष्ट्वादेवीप्रहस्याहमहेशा

२५

कार्तिकमा॰ गाक्यमहेशोवाक्यमब्रवीत् महादेव उवाच अक्षाविद्यामयादेवि गङ्गाद्वारे विनिर्मिता॰ अनयाजयसेत्वंचेत्तदात्वंसत्यभाषिणी ४७

२३ देव्युवाच वृथाद्यातवसामयाऽीमयेयंलापिताशिव॰ त्वयाकिंलाप्यतेदेव दर्शयस्वममाग्रतः इतिश्रुत्वावचस्तस्याःप्रैक्षेताधो

मुखंहरः तस्मिन्क्षणेनारदेनस्वकौपीनंसमर्पितम् वीणादण्डश्चोपवीतमनेनक्रीड्यतामिति॰ सदाशिवःप्रसन्नोभूत्क्रीडनंस

हवक्रतुः यद्यद्धावयतेरुद्रस्तथाविष्णुःप्रजायते॰ यद्यद्याचयतेदेवीविपरीतस्तदापतत् स्वकीयाभरणाद्यंचमहादेवेननिर्जितं

स्कन्दालंकारिकंसर्वंपुनरात्तंहरेणच॰ ततोगणेशःप्रोवाचवाक्यंसदसिचाग्रतः नक्रीडितव्यंहेमातःपाशोलक्ष्मीपतिस्त्वयम्

कृतोहरेणसर्वस्वंतेहरिष्यतिमन्यिता॰ इतिपुत्रवचःश्रुत्वापार्वतीक्रोधमूर्छिता॰ तथाविधांतामालक्ष्यरावणोवाक्यमब्रवीत् ४८

रावण उवाच पापिष्ठेनाद्यवामोस्मिदुर्दुरूढेनविष्णुना अधर्मोयंनकर्तव्यइत्युक्तंचमयायतः देव्युवाच सर्वानृशीपि

ध्येवत्साहंधूर्तानितान्महावलान् सामर्थ्यंपश्यमेपुत्रधर्मत्यागफलंतथा॰ देवयस्माद्वलल्याकपटंचकृतंत्वया तस्मात्त्वदास्क

तेमूर्ध्नावलाभारप्रपीडितः इतस्ततःकुचेष्टांत्वंयतःशिक्षयसेमुने स्वप्नेवापिसुखंस्त्रीणांनकदाचिद्भविष्यति॰ ५० यतःकृताचा

वलयासहमायात्वयाहरे एकोवैरीरावणोयंतवभार्यांनयिष्यति॰ हित्वामांमातरंपुत्रवालकत्वंत्वयाकृतम् अतस्त्वंनयुवावृद्धोवा

लम्वभविष्यसि गणेश उवाच अनेनचौतुरूपेणसूषकोयंपलायितः मध्येमार्गंहतोविघ्नःशपैनंराक्षसाधमम् देव्युवाच श्रीः

यस्माद्विघ्नस्त्वयादृष्टःकृतोमेवालकस्यतु तस्मादयंतवारिपुर्विष्णुस्त्वांघातयिष्यति इतिदेव्यावचःश्रुत्वासर्वेसंक्षुब्धमानसाः ५१ २३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवीशापेमनश्चक्रुर्नारदोवाक्यमब्रवीत् नारदउवाच कोपंकर्वंतुमादेवाःनेयंशप्याकदाचन सर्वेषामादिमाचेयंयथा
योग्यफलप्रदा नायंशापअस्मावाग्भीस्मर्तव्यामुविचारतेः ५६ गङ्गासदातिष्ठतुरुद्रमस्तकेवलाद्रमांवेनयतुक्षपा
चरःजायाहरस्यापियथाविनामनतिष्ठानजस्तद्भारहितःकुमारकः ५७ अहंत्वमामिषरणीनस्थात्वयंकदाचन स
म्यक्प्रोक्तंत्वयादेविशृणुविदानींवचोमम सर्वक्रोधापनुत्यर्थंननर्तमुनिपुङ्गवः कक्षानादंचकारोच्चैर्हाहाहाहीहीतिचा
ब्रवीत् तस्यचेष्टांविलोक्याथसर्वेहर्षमवाप्नुयुः ५८ देवाऊचुः भोभोविदूषकश्रेष्ठकृतकृत्योसिनारद वरंवरयभद्रंते
रोचते ५। यद्यन्मनसिवर्त्तते ६० नारदउवाच याचयन्तुवरंसर्वेकोवाकिंयाचयिष्यति सर्वान्तेयाचयिष्यामियथाश्रेष्ठंतु
वंतुतत् शिवउवाच सर्वंक्षम्यतांदेविजितंयद्दृष्टभादिकम् तन्मयास्तुघूतशतैर्नश्वालंजगदम्बिके देवुवा
च मास्तुत्वयासमंनाथस्वप्नेपिममचांतरम् एतदेववरंमन्येमाभूत्क्रोधोममोपरि कार्तिकेशुक्लपक्षेतुप्रथमेहनि
सत्यवत् जयोलब्धोमयात्वत्तःसत्येनैवमहेश्वर तस्माद्घूतंप्रकर्तव्यंप्रभातेत्रचमानवैः तस्मिन्द्यूतेजयोयस्यतस्यसं
वत्सरंजयः ६५ विष्णुरुवाच अहंयद्यंकरिष्यामिश्रेष्ठंवालघुमेववा तथातथाभवतुसत्वरंमेनंवराम्यहम् स्कंद
उवाच सदामनस्तपस्यांचममतिष्ठंतुदेवताः कदापिविषयेमास्तुदेयएववरोमम गणेशउवाच संसारेयानि
कार्याणितदादौममपूजनात् यान्तुसिद्धिंममकृपांविनासिद्धान्तुमाक्वचित् रावणउवाच वेदव्याख्यानसामर्थ्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२५
कार्तिक·मा ममश्रीप्रं भवत्विति मद्भाक्तिर्वैसदाचास्तु भक्तिर्मेव्यभिचारिणी ६९ नारदउवाच कृष्णाकृष्णाख्ययेकेचिन्मूर्खामूर्खा
२४ ख्ययेजनाः मद्वाक्यंसत्यमित्येवमानयंतुसदासुराः इत्युक्त्वान्तर्हिताःसर्वेदेवारुद्रपुरोगमाः तस्माद्द्यूतंप्रतिपद्दिकुर्यात्स
र्वोपिवैजनः द्यूतंनिषिद्धंसर्वत्रहित्वाप्रतिपदंबुधाः स्वस्योद्यमादिज्ञानायकुर्याद्द्यूतमतन्द्रितः विशेषवच्चभोक्तव्यंप्रश
स्तैर्ब्राह्मणैःसह दयिताभिश्चसहितैर्नेयासाचनिशाभवेत् ततःसंपूजयेन्मानैरन्तःपुरसुवासिनीः पदानिजनसंघातान्
ग्रैवेयैःकटकैःशुभैः स्वनामांकैःस्वयंराजातोषयेत्स्वजनान्पृथक् वृषभान्महिषांश्चैवयुद्ध्यमानान्परैःसह गजानश्वांश्च
योधांश्चपदातीन्समलंकृतान् मञ्चारूढःस्वयंपश्येन्नटनर्तकचारणान् ७७ योधयेत्त्रासयेच्चैवगोमहिष्यादिकंततः
ततोपराह्णसमयेपूर्वस्यांदिशिकाश्यप मार्गपालीप्रबध्नीयात्तुङ्गस्तम्भेथपादपे कुशकाशमयींदिव्यांलम्बकैर्बहुभि
र्नृपः दर्शयित्वागजानश्वान्सायमस्यास्तलेनयेत् कृतहोमैर्द्विजैःसम्यग्बध्नीयान्मार्गपालिकाम् मार्गपालिनमस्तेस्तु
सर्वलोकसुखप्रदे विधेयैःपुत्रदाराद्यैःपुनरेहिव्रतस्यमे नीराजनंचतत्रैवकार्यंराष्ट्रजयप्रदम् मार्गपालीसमुल्लंघ्य
नीरुजःस्युःसुखान्विताः तस्मादेतत्प्रकर्तव्यंद्यूताद्यंविधिपूर्वकम् ८३ ॥ इतिश्रीसनत्कुमारसंहितायांकार्तिक
महात्म्येप्रतिपत्कथापञ्चदशोध्यायः १५ ॥ वालखिल्याऊचुः पूर्वविद्धाप्रकर्तव्याप्रतिपद्बलिपूजने वर्धमा श्रीः
नतिथौनन्दायदासार्धत्रियामिका द्वितीयावृद्धिगामित्वादुत्तरातत्रचोच्यते वलिमालिख्यदैत्येन्द्रंवर्णकैःपञ्चरङ्ग २५

कैः गृहस्यमध्यशालायांविन्ध्यावल्यासहासितम् जिह्वाताल्वक्षिणीप्रान्तेकरयोःपादयोस्तले रक्तवर्णेनास्यकेशाः
कृष्णेनैवसमालिखेत् सर्वाङ्गंपीतवर्णेनवास्त्राद्यंनीलवर्णतः वस्त्राद्यंश्वेतवर्णेनयथाशोभंप्रकल्पयेत् सर्वाभर
णशोभाढ्यंद्विभुजंनृपचिन्हितम् लोकोलिखेद्गृहस्यान्तःशय्यायांशुक्लतण्डुलैः मन्त्रेणानेनसंपूज्यषोडशोपचारकैः
बलिराजनमस्तुभ्यंदेवदानवपूजित इन्द्रशत्रोमरारतेविष्णुसान्निध्यदोभव बलिमुद्दिश्यदीयन्तेदानानिमुनिपुङ्गवाः
यानितान्यक्षयाणिस्युर्मयैतत्संप्रदर्शितम् कौमुदीतिर्बलेर्यस्माद्दीयन्तेस्यांयुधिष्ठिर पार्थिवेन्द्रैर्मुनिवरास्तेनेयंकौमु
दीस्मृता योयादृशेनभावेनतिष्ठत्यस्यांयुधिष्ठिर हर्षदैन्यादिरूपेणवर्षंतस्यप्रयातिहि ९० बलिपूजांविधायैवं
पश्चाज्जोक्रीडनंचरेत् गवांक्रीडादिनेयत्ररात्रौदृश्येतचन्द्रमाः सोमोराजापशून्हन्तिसुरभीपूजकास्तथा प्रतिपद्
र्शसंयोगेक्रीडनंतुगवांमतम् परविद्धेषुयःकुर्यात्पुत्रदारधनक्षयः अलंकार्यास्तथागावोगोग्रासादिभिरर्चिताः गी
तवादित्रनिर्घोषैर्नयेन्नगरवाह्यतः आनीयचततःपश्चात्कुर्यान्नीराजनादिकम् अथचेत्प्रतिपत्स्वल्पानारीनी
राजनंचरेत् द्वितीयायांतदाकुर्यात्सायंमङ्गलमालिकाः एवंनीराजनंकृत्वासर्वपापैःप्रमुच्यते प्रतिपत्पूर्वविद्धैव
दृष्टिकाकर्षणेभवेत् कुशकाशमयींकुर्याद्दृष्टिकांसुदृढांनवाम् देवद्वारेनृपद्वारेनेयावाथचतुष्पथे तामेकतो
राजपुत्राहीनवर्णास्तथैकतः गृहीत्वाकर्षयेयुस्तेयथासारंमुहुर्मुहुः समसङ्ख्याद्वयोःकार्याःसर्वेपिबलवत्तराः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२८
कार्तिकमा. जयेद्यहीनजातीनां जयो राज्ञस्तु वत्सरम् उभयोः पृष्ठतः कार्या रेखाः स्वाङ्ककरोपरि· रेखान्ते यो नयेत्तस्य जयो भवति नान्य
२५ था· जयचिन्हमिदं राजा विदधीत प्रयत्नतः २० ॐ इति श्रीसनत्कुमारसंहितायां कार्तिकमाहात्म्ये षोडशोध्यायः १६
वालखिल्या ऊचुः कार्तिकस्य सिते पक्षे अन्नकूटं समाचरेत् गोवर्धनोत्सवश्चैव श्रीविष्णुः प्रीयतामिति· ऋषय ऊचुः ॥
कोसौ गोवर्धनो देवः कस्मात्तं परिपूजयेत् कस्मात्तदुत्सवः कार्यः कृते किं च फलं लभेत् वालखिल्या ऊचुः एकदा भगवान्
कृष्णो गतो गोपालकैः सह गृहीत्वा गाः प्रतिपदि कार्तिकस्य गतो वने तत्र नानाविधा लोका गोप्यश्चापि सहस्रशः गोवर्धन
समीपे तु कुर्वन्त्युत्सवमादरात् खाद्यं लेह्यं च चोष्यं च पेयं नानाविधं कृतम् कृता नगास्तथान्नानां नृत्यन्ति च परे जनाः ५ नाना
पताकाः संगृह्य केचिद्धावन्ति चाग्रतः केचिज्जोपाः प्रनृत्यंति स्तुवन्ति च तथा परे· इतस्ततो वितानानि तोरणानि सहस्रशः
दृष्ट्वैवं कौतुकं कृष्णो वाक्यमेतदुवाच ह ७ कृष्ण उवाच· उत्सवः क्रियते कस्य देवता का च पूज्यते पक्वान्नं खादनार्था
यकल्पितो वोत्सवो यथा नभक्षयंति ये देवास्तेभ्योन्नं तु प्रदीयते प्रत्यक्षभोजिनो देवास्तेभ्योन्नं तु न दीयते दृष्टेहवी
भवद्भिः गोपाला वेधसा कृताः गोपाला ऊचुः अनन्तमावदीः कृष्ण वृत्रहन्तुर्महोत्सवः वार्षिकः क्रियतेस्माभिर्देवेन्द्रस्य
तुतुष्टये· इन्द्रपूजयभद्रं ते भविष्यति न संशयः ११ यः करोति च देवेन्द्रमहोत्सवमिदं नरः दुर्भिक्षं च तथा वृष्टिर्देशे तस्य श्रीः
न जायते तस्मात्त्वमपि कृष्णात्र कुरूत्सवमनेकधा कृष्ण उवाच· अयं गोवर्धनः साक्षाद्वृष्टिसौभाग्यकारकः ॥ २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मथुरास्थैर्व्रजस्थैश्च सर्वधा संप्रपंचितः हित्वेन्द्रं पूज्यते लोकादृथेन्द्रः पूज्यते कथम् उत्सवः क्रियतामस्य प्रत्यक्षोयं भुनक्ति च
करिष्यति सम्यगुपसर्गान्हनिष्यति । यदा यदा संकटं मे महदागत्य जायते तदा तदा पूजयामि दृश्यं गोवर्धनं गिरिम् १६
श्रवणेश्रवणे गोपा भ्रान्ताः कुर्वन्ति किन्त्विदम् तेषां मध्ये कोप्यद्य कृष्णो मे प्रीयतामिति यदा स्वादति चान्नं वै न गो गो
वर्धनस्तदा तदा कृष्णोक्तमखिलं सत्यमेव भविष्यति सर्व एव तदा गोपा विनिश्चित्य च नन्दजम् वचनं प्राहुरित्थं चेत्निश्च
योस्ति तथा कुरु सर्वेषामग्रणी भूत्वा गोवर्धनमहोत्सवम् ततः कृष्णस्तथेत्युक्त्वा सूत्सवे कृतनिश्चयः नानासामग्रिकं च
कुर्यथोक्तं नन्दसूनुना नानावस्त्राणि पात्राणि चास्तृतानि नगाग्रतः नन्ददत्तोन्नपुञ्जस्तु यथा गोवर्धनो महान् भक्ताः
सूपानि शाकाम्लकांजिकावटकास्तथा पूरिकाद्यं चल शष्कुल्यो मण्डपादियत् दुग्धं दधि घृतं क्षीरं लेह्यं चोह्यं तथामिषम् २२
कथिकाद्यं सर्वमर्पितं दत्त्वा वचोब्रवीत् कृष्ण उवाच मंत्रं पठित्वा गोपाला नेत्रे संमीलयन्तु वः गोवर्धनेन भोक्तव्यं
सर्वमन्नं न संशयः गोवर्धनधराधार गोकुलत्राणकारक बहुबाहुकृतच्छाय गवां कोटिप्रदो भव लक्ष्मीर्या लोकपालानां
धेनुरूपेण संस्थिता घृतं वहति यज्ञार्थं मम पापं व्यपोहतु पठित्वेत्थं मंत्रयुगं सर्वे मुद्रितलोचनाः कृष्णो गोवर्धनं विश्य
सर्वमन्नमभक्षयत् भक्षणावसरे कैश्चिद्दृष्टो गिरिस्तदा अतीवाभूत्तदाश्चर्यं तच्चेतसि मुनीश्वराः ततो नाडीद्वयात्
कृष्णो गोपान् वाक्यमुवाच ह अहो गोवर्धनेनात्र क्षणाद्भुक्तमिदं स्फुटम् पश्यन्तु सर्वगोपालाः प्रत्यक्षोयं न संशयः ३०

७)
कार्तिकमा· यथास्ति सुखवांछा वः कुर्वन्त्वेतन्महोत्सवम् इति श्रुत्वा वचस्तस्य सर्वे विस्मितमानसाः गोवर्धनोत्सवं चक्रुरैन्द्राच्छतगुणं
२६ तदा इन्द्रोत्सवं द्रष्टुकामः समागच्छत नारदः गोवर्धनोत्सवं दृष्ट्वा देवेन्द्रस्य सभां ययौ देवेन्द्रेणाकृतातिथ्यो वारंवारं प्रणो
दितः नोवाच वचनं किंचिद्देवेन्द्रः प्रत्यभाषत ३९ इन्द्र उवाच युष्माकं कुशलं विप्र वर्तते वा न वेति वा मदग्रे कथ्यतां दुःखं
मुनीश्च हराम्यहम् नारद उवाच अस्माकं किं मुनीन्द्राणामिन्द्र दुःखस्य कारणम् परं गोवर्धनः शैलः इन्द्रो जातो नवलो
किते तदुत्सवैः पूज्यते सो गोपालैर्गोकुले हरौ अतः परं यज्ञभागान्ग्रहिष्यति स एव हि इन्द्रासनं तथैन्द्राणीं क्रमात्स च ग्र
हिष्यति यस्य वीर्यं च सर्वत्र तस्य राज्यं प्रजायते किमस्माकं मुनीन्द्राणां य एवेन्द्रासने भवेत् वर्षाद्वामासषट्कान्ते द्रष्टु
ओसौ समागतः इत्थमुक्त्वैव देवेन्द्रं प्रययौ नारदो भुवि इत्थं नारदवाक्यं स श्रुत्वा शक्रोऽभ्यभाषत अहो आवर्तसंवर्तद्रो
णनीलकपुष्कराः ४० सर्वे मेघा जलं गृह्य करकाभिः समन्वितम् गत्वा तु गोकुलं शीघ्रं मारयन्तु च यादवान् गोवर्धनं स्फो
टयन्तु वज्रपातैरनेकशः घातयन्तु च गाश्चापि गृहाण्युच्चाटयन्तु च ततो घनघटाघोषो गोकुले भून्मुनीश्वराः जातोऽ
न्धकारोऽथ मध्याह्ने मध्याह्नसमये तदा कंपिता यादवाः सर्वे किमकाण्डमुपस्थितम् वृष्टिपर्वहुपानीयं करकाभिस्तु
दा घनाः ४४ यादवा ऊचुः हा कृष्ण कृष्ण हे कृष्ण किमिदानीं विधीयताम् ध्वनास्म यादवाः सर्वे कुपितोऽयं हि वासवः श्रीः
कृष्ण उवाच निमील्याक्षीणि भो गोपा यायो वै गोवर्धनो नगः रक्षाकर्ता स एवास्ति नान्योऽस्ति जगतीतले इत्युक्त्वाथ २६

इतितस्यवचः श्रुत्वा हंसमारुह्यवेधसा आगतंयत्रशक्रोस्ति क्रोधाद्देवंप्रवर्षति ६

धृतंशैलंतत्तलेस्थापितास्तुते ततःप्रोवाचवचनंगोपान्प्रतिबलानुजः अहोगोवर्धनेनैतत्स्थलंदत्तंव्रजेव्रजाः अन्यः
कोस्तिस्थलंदातुंप्रत्यक्षोयंनगोत्तमः एवंसम्पादिनंतोयंवृष्टंमुशलधारया नानादेशाद्यपुनर्नाशंनगोपाःशरणंययुः
गोवर्धनस्यनाम्नैवकृष्णोनित्यंप्रयच्छति पक्वान्नानिचगोपेभ्यस्तत्रतेसुखमासत ५० इत्येवंकुतुकंदृष्ट्वासत्यलोकंय
योमुनिः ब्रह्मन्किंत्वंप्रसुप्तोसिजायतेसृष्टिनाशनम् तस्माच्छीघ्रंगोकुलंत्वंगत्वावृष्टिंनिवारय ब्रह्मोवाच ॥
किमर्थंजायतेवृष्टिःकथंसृष्टिविनाशनम् कश्चिद्दैत्यःसमुत्पन्नःसर्वमाख्याहिमेमुने नारदउवाच नोत्पन्नोदैत्य
राट्कश्चित्त्यक्तःशक्रोत्सवोभुवि याद्ववैरतिसंक्रुद्ध इन्द्रएवप्रवर्षति ब्रह्मोवाच कथंव्यवसिताबुद्धिरीदृशीतेसुरोत्तम ५५
त्रैलोक्यनाथोभगवान्निर्जितश्चकथंत्वया एकेनैवकराङ्गुल्यापश्यगोवर्धनोधृतः ईर्ष्यातेनकथंसाकंत्वयाशक्रवि
धीयताम् इतिब्रह्मवचःश्रुत्वामेघास्संस्तम्भ्यवासवः प्रणिपत्यचतंकृष्णमिन्द्रोवचनमब्रवीत् क्षन्तव्यामत्कृतिर्विष्णो
दासोहंशरणंगतः यद्रोचतेतत्प्रदेयमपराधापनुत्तये कृष्णउवाच अज्ञात्वातवसामर्थ्यंगोपालैरर्चितंत्विदम्
एषोदरउत्सवोयोग्यायंसम्यगेवत्वयाकृतम् अहंकनीयांस्तेभ्रातातवाज्ञापरिपालकः शरणागतजातीनांरक्षणंनकृतं
मया यदिप्रसन्नोदेवेशउत्सवोयंप्रदीयताम् गोवर्धनाख्यगिरयेगोकुलंरक्षितंयतः शक्रोपिचतथेत्युक्त्वातत्रैवान्त
रधीयत गतेशक्रेगिरीन्द्रंतंसंस्थाप्यहरिरब्रवीत् कृष्णउवाच गोपाःदृष्टंनुमाहात्म्यमद्भुतंशैलजंतुयत् ६३

७
कार्तिकमा० अद्यारभ्यप्रकर्तव्योमहान्गोवर्धनोत्सवः गोवर्धनेनशैलेननिखिलातुधराधृता एतत्सारमजानद्भिः कथंसंक्रीडितं
२७ पुरा अद्यपर्वतराजस्य सर्वभूते ममाग्रतः एतस्यैवाप्रभावेणावलंलब्धंमयामहत् प्रतिसंवत्सरं[illegible]स्मादन्नकूटंविधीयतां
गवांभवतिकल्याणंपुत्रपौत्रादिसंततिः ऐश्वर्यंचसदासौख्यंभवेद्गोवर्धनोत्सवात् कृतंयत्कार्तिकस्नानंजपहोमार्चनादि
कम् सर्वंनिष्फलतांयातिनकृतेपर्वतोत्सवम् एवमुक्तास्तुतेगोपाःसर्वेसत्यममन्यत ययुःकृष्णादयःसर्वेनवमेऽहनि
गोकुलम् ६९ वालखिल्या ऊचुः इत्येतत्सर्वमाख्यातमस्माभिस्तुमुनीश्वराः श्रीकृष्णस्यतुसंतुष्ट्यैह्यन्नकूटंविधी
यताम् नानाप्रकारशाकानिदेशकालोद्भवानिच पक्वान्नानिविचित्राणिकुर्याद्वित्तानुसारतः सर्वान्नंपर्वतंकुर्यात्कृ
ष्णायनिवेदयेत् गोवर्धनस्वरूपायमंत्रोक्तंकृष्णादितोपठन् एवंयःकुरुतेलोकेविष्णुलोकेमहीयते ७३ ॐ
इतिश्रीसनत्कुमारसंहितायांकार्तिकमाहात्म्येसप्तदशोऽध्यायः १७ ॐ वालखिल्या ऊचुः कार्तिक
स्यसितेपक्षेद्वितीयायमसंज्ञिता तत्रापराह्णेकर्तव्यंसर्वथैवयमार्चनम् प्रत्यहंयमुनागत्वायमंसंप्रार्थयत्पुरा
भ्रातर्ममगृहेयाहिभोजनार्थंगणावृतः अद्यश्वोवापरश्वोवाप्रत्यहंवदतेयमः कार्यव्याकुलचित्तानामवकाशोनजा
यते नदैकदायमुनयावलात्कारान्निमंत्रितः सगतःकार्तिकेमासिद्वितीयायांमुनीश्वराः नारकीयजनान्मुक्त्वाग श्रीः
णैःसहदेवैःस्तुतः कृतातिथ्योयमुनयानानापाकाःकृताःस्वग ५ कृताभ्यंगोयमुनयातैलैर्गन्धमनोहरैः उद्वर्तनं २७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लापयित्वा स्नापितः सूर्यनन्दनः ततोलंकारिकं दत्तं नानावस्त्राणि चन्दनम् माल्यानि च प्रशस्तानि मञ्चोपरि उपाविशत् ७
पक्वान्नानि विचित्राणि कृत्वा सा स्वर्णभाजने यमायाभोजयद्देवी यमुना प्रीतमानसा भुक्त्वा यमोपि भगिनीमलंका
रैः समर्चयेत् नानावस्त्रैस्ततः प्राह वरं वरय भामिनी इति तद्वचनं श्रुत्वा यमुना वाक्यमब्रवीत् यमुनोवाच प्रतिवर्षं त्व
मागच्छ भोजनार्थं तु मद्गृहे अद्य सर्वे मोचनीयाः पापिनो नरकाद्यम ये चैव भगिनीहस्तात्करिष्यन्ति च भोजनम् २२ ते
षां मोक्षं प्रदेहि त्वमेतदेव वृणोम्यहम् यम उवाच यमुनायां तु यः स्नात्वा संतर्प्य पितृदेवताः भुङ्क्ते च भगिनीहस्ता
द्भगिनीं पूजयेदपि कदाचिदपि मद्द्वारं न स पश्यति भानुजे वीरेशोशानदिग्भागे यमतीर्थं प्रकीर्तितम् तत्र स्नात्वा च
विधिवत्संतर्प्य पितृदेवताः पठेदेतानि नामानि आमध्याह्नं नरोत्तमः सूर्यस्याभिमुखो मौनी दृढचित्तः स्थिरासनः २५
यमो निहन्ता पितृधर्मराजो वैवस्वतो दण्डधरश्च कालः भूताधिपो दत्तकृतानुसारी कृतान्त एतद्दशभिर्जपन्ति २६ ततो
यमेश्वरं पूज्य भगिनीगृहमाव्रजेत् मन्त्रेणानेन च तया भोजितः पूर्णमादरात् भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शु
भम् प्रीतये यमराजस्य यमुनाया विशेषतः ततः सन्तोष्य भगिनीं वस्त्रालंकरणादिभिः स्वप्नेपि यमलोकस्य भविष्य
ति न दर्शनम् नृपैः कारागृहे ये च स्थापिता मम वासरे अवश्यं ते प्रेषणीया भोजनार्थं स्वसुर्गृहे विमोक्तव्या मया
पापा नरकेभ्योद्य वासरे ये द्य बन्दीकरिष्यन्ति तेनाज्ञा मम सर्वथा २९ कनीयसी स्वसा नास्ति तदा ज्येष्ठागृहं व्रजेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE

तदभावे सपत्न्यायाः पितृव्यास्तदभावतः अभावे पितृष्वस्रीया मातुलस्यात्मजास्तथा सापत्नगोत्रसंबन्धैः कल्पयेदथवाक्षमा
त् अवश्यं कार्तिके मासि भोक्तव्यं भगिनीकरात् सर्वाभावे माननीया भगिनी काचिदेव हि गोनद्याद्यथवा तस्या अभावे स
तिकारयेत् तदभावेप्यरण्यादि कल्पयित्वा महोदराम् तस्यां निजगृहे देवि न भोक्तव्यं कदाचन ये भुञ्जन्ति दुराचारा न
रके ते पतन्ति च स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्धनम् दानानि च प्रदेयानि भगिनीभ्यो विशेषतः श्रावणे तु पितृव्य
स्य कन्याहस्तेन भोजनम् मातुलस्य सुताहस्ताद्भोक्तव्यं भाद्रमासके पितुर्मातुः स्वसुः कन्ये आश्विने तु तयोः क्रमात् अव
श्यं कार्तिके मासि भोक्तव्यं भगिनीकरात् एवमुक्त्वा धर्मराजो ययौ संयमिनीं ततः तस्माद्द्विजवराः सर्वे कार्तिकव्रतकारिणः
भुंजतां भगिनीहस्तात्सत्यं सत्यं न संशयः ३० यमद्वितीयां यः प्राप्य भगिनीगृहभोजनम् न कुर्याद्वर्षजं पुण्यं नश्यतीति
रवेः श्रुतम् यान्भोजयते नारी भ्रातरं भाइकेतिथौ अर्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात् भ्रातुरायुःक्षयो नूनं न भवेत्
तत्र कर्हिचित् अपरान्हव्यापिनी या द्वितीया भ्रातृभोजने अज्ञानाद्यदि वा मोहान्न भुक्तं भगिनीगृहे प्रवासिना वाऽ
भावाद्वा ज्वरितेनाथ बन्दिना एतदाख्यानकं श्रुत्वा भोजनस्य फलं लभेत् ३५ ॰ इति श्रीसनत्कुमारसंहितायां का
र्तिकमाहात्म्ये यमद्वितीयाफलकथनं नामाष्टाविंशोऽध्यायः २९ ॰ वालखिल्या ऊचुः कार्तिके शुक्लनवमी तत्रा
मूढ्वापरं युगम् पूर्वापराह्णगा ग्राह्या क्रमाद्दानोपवासयोः अत्र कूष्माण्डको नाम महतो दैत्यस्तु विष्णुना तद्रोमभिः समु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्भूतावह्न्यः कूष्माण्डसंभवाः तस्मात्कूष्माण्डदानेन फलमाप्नोति निश्चितम् अस्यामेव नवम्यां तु कुर्यात्कष्टेन यो नरः स्वशा
स्त्रोक्तेन विधिना तुलस्याः पाणिपीडनम् कन्यादानफलं तस्य जायते नात्र संशयः कार्तिके शुक्लनवमीमवाप्य विजितेन्द्रियः
हरिं विधाय सौवर्णं तुलस्या सहितं शुभम् पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयम् एवं यथोक्तविधिना कुर्याद्वैवाहिकं विधिं ६
त्र्याह्नं त्रिरात्रमत्रैव नवम्या अनुरोधतः मध्याह्नव्यापिनी ग्राह्या नवमी पूर्ववेधिता धात्रा स्वस्थो यः एकत्र पालयित्वा समुद्वहेत्
न नश्यते तस्य पुण्यं कल्पकोटिशतैरपि अत्रैवोदाहरन्तीममितिहासं पुरातनम् बभूव विष्णुकांच्यां तु क्षत्रियः कन
काभिधः धनाढ्यो वैश्यवृत्तिश्च वैष्णवो राजपूजितः बहुकालो गतस्तस्य विनापत्यं मुनीश्वराः ततो नानाव्रतैर्जाता क
न्या कमललोचना सुरूपा लक्षणोपेता नानागुणसमन्विता पिता तस्या नाम चक्रे किशोरीति च विश्रुतम् स
कदाचिद् गृहे यातो जन्मपत्रनिरीक्षकः १२ दर्शयित्वा जन्मपत्रं कथं कन्या भवेदियम् ततस्तेन क्षणं ध्यात्वा कन
क शृणु मे वचः यदि ब्रवीमि सत्यं चेत्तव दुःखं भविष्यति यद्यसत्यमहं ब्रूयां मिथ्यात्वं मम जायते तस्मात्सत्यं व
दिष्यामि रोचते न तथा कुरु अस्याः करग्रहं कुर्याद्यः सो वर्षान्मरिष्यति १५ इति तस्य वचः श्रुत्वा जनको दुःखि
तोऽभवत् न चकार विवाहोऽस्याः सा च ब्राह्मणपूजने नियुक्ता न्यगृहं तेन नानया मन्मुखाग्रतः दृष्ट्वेमां रूपसं
पन्नां दुःखं मे वाधयिष्यति स्थित्वान्यस्मिन्गृहे सा तु द्विजातिथ्यमचीकरत् नगागाद्दैवयोगेन कदाचिद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तंतदा२

२८ कार्तिकमा० द्विजपुङ्गवः यात्रार्थं विष्णुकांच्यां यो वै श्रावणे मासि शंकरः हेमकोविप्रपुत्रीं ज्ञात्वा तत्रैव समागतः आगत्याङ्गणमध्ये तु उ
२९ पविष्टो द्विजोत्तमः किशोर्यागत्य चातिथ्यं शंकरस्य कृ० २० दृष्ट्वा तां तरुणीं नम्रां सुवेषां विनयोन्नताम् अजातकर्पी
डां च सखीं दृष्ट्वा प्रोवाच सः २१ शंकर उवाच चन्द्रेन वद्धी ग्र्लां किशोरी न विवाहिता किमत्र कारणं जाता तरुणीक्
मरूपिणी इति तद्वचनं श्रुत्वा चन्द्रनाम सर्वमब्रवीत् न दाहकपालुना तेन तत्पित्रे संनिवेदितम् अस्यै मंत्रं प्रयच्छामि श्रीविष्णो
र्द्वादशाक्षरम् करोति वर्षत्रितयं जपमस्य सुलोचना प्रातःस्नानवती चास्तु तुलसी वनपालिका कार्तिकस्य सिते पक्षे
नवम्यां विष्णुना सह सौवर्णेन तु लस्याश्च तुलस्याश्च विवाहं कारयत्वियम् तेन व्रतप्रभावेण विधवा न भविष्यति २६ त
त्पित्रा पितथेत्युक्तं प्रायश्चितं सदत्तवान् किशोर्यै वैष्णवं धर्मसमग्रं चादिदेश सः द्विजेन तेन यत्प्रोक्तं किशोर्यपि तथाक
रोत् वर्षत्रयं यथाशास्त्रं किशोर्या तद्व्रतं कृतम् चतुर्थे कार्तिके मासि किशोरी स्नपनाय च प्रातःकाले गता बाला दृ
ष्टा मार्गे विलेपिना क्षत्रियेण यदा दृष्टा प्राप मोहं जडात्मकः दृष्टे तस्यास्तु संलयो भावयन्तामनिन्दिताम् ३० केचि
न्तां दृष्ट्वा सुईरा केचित्पश्यन्ति पुरन्तः स्त्रियोपि तां प्रपश्यन्ति पुरुषाणां तु का कथा यथा द्वितीया चन्द्रस्य दर्शने चोत्सुका
जनाः निमेषमात्रमर्केण दृष्टा स्थिता सुवालिका अधिकं किं वर्णनीयं तस्यै स्वयं मुनीश्वराः केचिद्वदन्ति देवीयं नागक श्रीः
न्येति चापरे रुद्रसम्मोहनार्थाय जाता मामोहनीति च तां न पश्यति लोकांश्च नृमार्गेन सखीगणान् ध्यायती हृदये विष्णु २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तुलसीदेवरूपिणीम् नांग्रहीतुंमनश्चाविलेपीद्रववान्वली ३५ नानाभेदाःकृतास्तेन नलेभेचान्तरंकचित् मालाकारगृहा
त्लातस्येद्व्यमयत्कृतः येनकेनप्रकारेणकिशोर्यासहसंगमः यथास्यात्क्रियतेभद्रेदेयमस्माद्वृतुर्गुणम् तथावोद्वह
नोपायस्त्वयायत्प्रोच्यतेधुना मयातद्देवबक्रयंद्रव्यग्रहणसिद्धये ३८ विलेप्युवाच तवकन्यात्तुभूत्वाहंनयामिकुसु
मानिच अथयद्वाविभवत्तुगृहाणान्हिशतंशतम् मयापिचतथेत्युक्तंसप्तम्यांनिश्चयःकृतः अष्टम्यांसागतातत्रकि
शोरीतामुवाचह मालाकृतेश्वोनवमीतुलस्याःपाणिपीडनम् निश्चयतस्त्वयादेयामुकुटाःपुष्पसंभवाः मालिन्युवाच
मत्कन्यावागताश्वाभान्नानाकौतुककारिणी यद्यत्प्रोक्तंत्वयावालेसमानेष्यतिसत्वरम् तयासापितथेत्युक्ता मा
लिनीस्वगृहंययौ कथितःसर्ववृत्तान्तोविलेप्यग्रेततोभवत् प्राप्तामयेन्द्रपदवीत्येवंसुखमवापसः मालिन्यारचिता
स्तेमुकुटाविविधास्तदा विष्णुकांच्यांतुदाराजाजयसेनोवभूवह तस्यपुत्रोमुकुन्दोऽभूत्सूर्यभक्तिपरायणः कि
शोर्यास्तुश्रुत्वातेनवार्तेयमतिसुन्दरी तदातेनमुकुन्देनसंकल्पःकृतएवहि किशोरीयदिभार्यामेभविष्यतिदिवाकर ४८
तदान्नमहमश्नामिनान्यथास्यान्मतिर्मम कृत्वेत्थंसतुसंकल्पमुपवासांश्चकारसः सप्तमेहनिसूर्योसौस्वप्नेवचन
मब्रवीत् किशोर्याविधवायोगोवर्ततेतेकथंभवेत् सातेपत्नीप्रदास्यामित्वंयांपद्मायतेक्षणाम् ४९ मुकुन्दउवाच
यदिदेवप्रसन्नोसिविश्वंसृजसित्वंविभो वालवैधव्ययोगंचहंतुत्वंचक्षमोह्यसि इतितस्यवचःश्रुत्वाप्राणान्त्वलावहुलाः

१८

कार्त्तिकमा· नमन्यतेमुकुन्दोसौतथेत्युक्त्वा गतोरविः तुलसीव्रतमाहात्म्यात्स्वप्नोभूत्कनकस्यतु· इयंकन्यात्वयादेयामुकुन्दायाम
३० लायदि तुलस्युद्वाहमाहात्म्याद्विधवात्वंगमिष्यति· रात्रौस्वप्नःकिशोर्यास्तुतस्माच्चैवाभ्यजायत· आगताकन्यका८
काचिद्भर्त्रासहसमन्विता भर्तारंवदतिस्वप्नेममप्रमानाकिशोरिका· मद्भर्तापितथेत्युक्त्वाप्रदास्येबलिमुत्तमम्· ए
तत्कर्मेणपश्चात्तुविवाहोस्याभविष्यति ५५ स्वप्नंश्रुत्वाक्लेशर्दनंसावैचिन्तातुराभवत्· कद्वादशाक्षरीविद्याकेशवि
लुसमर्चनम्· नरकद्वारमूलंसमद्भस्मात्परमुमारणम्· एवंसातुसमुत्थायस्वप्नायामितिनिश्चितम् भावयित्वासमा
हूयचन्द्रनांवाक्यमब्रवीत्· निवेद्यदृष्टंस्वप्नंतुकीदृगस्यफलंवद· ५८ चन्द्रनोवाच· फलंतुसम्यक्कल्याणिनवानि
ष्टंविनंक्ष्यति· विवाहोभवितात्वीघ्रंतुलसीव्रतकारणात् इत्थंस्वप्नफलंश्रुत्वातावत्कुक्कुरवाहितम् श्रुत्वासास
हसोत्थायस्नानोद्यममचीकरत्· ६० यावद्यातिसास्नानंकृत्वागेहंकिशोरिका· तावद्विलेपीमालिन्याःपुत्री
भूत्वासमाययौ· कृताःकेशाश्चगोपुच्छैःश्मश्रुचोद्घाटितंबलात्· अन्तरेशाटकंगृह्यनिस्तुभ्यांचकृतोस्तनौ· द्वि
सर्वालंकारशोभाढ्याकेशस्यतिचापरान्· नज्ञातःसतुकेनापिपुमान्स्त्रीरूपधारकः ध्यानंधृत्वाप्रसार्यतेत
याहस्तोयदातदा दत्तोविलेपीपुष्पाणिविलोकयतिसर्वतः कथमस्याममस्पर्शोभविष्यतिविचिन्तयन्· एवं
दिनत्रयंतस्यप्रयासंतुमुनीश्वरः तस्मिन्नहनिसंजातेकनकःशोकपीडितः किंकार्यमधुनास्माभिराजपु श्रीः ३०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ोमरिष्यति एवं चिन्तयतस्तस्य शान्तः कालो बभूव ह राजलोकाः समायाता गृहीत्वा वस्त्रवाहनम् ६७ अभ्यन्तरे समागत्य मन्त्री
वचनमब्रवीत् मन्त्र्युवाच गृहे तिष्ठति वकन्यैका मुकुन्दार्थे प्रदीयताम् माविचारोस्तु भवतो नृपाज्ञा परिपाल्यताम् कनकेन
तथेत्युक्तं मम भाग्यमुपस्थितम् महाराजकुमारस्य वधूः कन्या भविष्यती प्रोवाच वचनं मन्त्री द्वादश्यां लग्नमुत्तमम् रात्रौ
तिष्ठति युग्मांश्च रविः षष्ठे विधुश्चरेव भवे भौमो गुरुर्धर्मे पंचमे बुधभार्गवौ शनिस्तृतीये ऽरौ राहुर्विवाहसमयः स तु उ
भौ सम्भृतसम्भार एवं भावविधनान्वितौ ७२ नैकुवाच अथो निरोधः क्रियतां किशोर्याश्च नृपाज्ञया भविष्यति महोत्
वीनो हृदयापुरुषैः क्वचित् इति तद्वचनं श्रुत्वा पुरुषास्तु निराकृताः जायारूपी विलेपी तु दैवात्तत्रैव संस्थितः ततोऽर्धरात्रवेला
यां मुकुन्दोऽभ्यन्तरे ययौ तुलस्यग्रे स्थिता बाला किशोरी संस्मरन् हरिम् ततो घनघटाशब्दस्तुमुलः समपद्यत महावायु
र्ववौ तत्र प्रशान्ताः सर्वदीपकाः ७६ विद्युल्लताश्च स्फुरिता अन्धीभूतोऽखिलो जनः मिथ्या न भास्करवचो मुकुन्दो विचिन्तय
हृदि अन्यैः प्रतर्कितं लोके वैधव्यस्य तु कारणम् भीतो मुकुन्दो हृदये यावद्ध्यायति भास्करम् तस्यां सन्धौ धृतं तस्याः करपद्मं
विलेपिना तस्याः करस्य संसर्गात्स्वर्गाद्दूतं पपात च नीतस्तेन विलेपी तु तत्कालं यममन्दिरम् वाद्य आसीत्कलकलो मुकुं
न्दोऽयं मृतस्त्विति क्षणादेव ततो ज्ञातं मालाकारसुता मृता ततस्तयोर्विवाहोऽभूद्राज्यं प्राप किशोरिका ८१ किशोर्यास्तु समु
द्भूता भ्रातरस्तुलसीव्रतात् आदेशोऽस्त्वसत्यमासीत्ततो देवो दिवाकरः तुलसीव्रतमाहात्म्यात्कथं न स्युर्मनोरथाः सौभाग्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिकमा र्थंधनार्थंचविद्यार्थंस्त्रिङ्क्षितये सन्तत्यर्थंप्रकर्तव्यंतुलस्याःपाणिपीडनम् ८३ ॐ इतिसन० कार्तिक० एकोनविंशोध्यायः १९
३१ वालखिल्या ऊचुः कार्तिकस्यामलेपक्षे स्नात्वासम्यग्यतव्रतः एकादश्यांतुगृह्णीयाद्व्रतंपञ्चदिनात्मकम् शरपञ्जरसु
प्तेनभीष्मेणसुमहात्मना राजधर्मादानधर्मामोक्षधर्मास्ततःपरम् कथिताःपाण्डवाद्यैःकृष्णेनापिश्रुतास्तदा ततःश्री
नेनमनसावाचादेवेनभाषितम् धन्यधन्योसिभीष्मत्वंधर्मसंस्थापितस्त्वया एकादश्यांकार्तिकस्ययाचितंचजलंत्वया ४
अर्जुनेनसमानीतंगाङ्गंवारणस्यवेगतः तुष्टानितवगात्राणितस्माद्दद्यदिनावधि भूर्णान्तंसर्वलोकास्त्वांतर्पयन्त्यर्घदा
नतः तस्मात्सर्वप्रयत्नेनममसन्तुष्टिकारकम् एतद्व्रतंप्रकुर्वन्तुभीष्मपंचकसंज्ञितम् कार्तिकस्यव्रतंकृत्वानकुर्याद्भीष्म
पञ्चकम् समग्रंकार्तिकव्रतंवृथातस्यभविष्यति अशक्तश्चेन्नरोभूयादसमर्थश्चकार्तिके ८ भीष्मस्यपञ्चकंकृत्वाका
र्तिकस्यफलंलभेत् सत्यव्रतायशुचयेगाङ्गेयायमहात्मने भीष्मायैतद्ददाम्यर्घमाजन्मब्रह्मचारिणे अर्घ्येनानेनमं
त्रेणतर्पणंसार्वकालिकम् व्रताङ्गत्वात्पूर्णिमायांप्रदेयःपापप्रणुत्ये अपुत्रेणतुकर्तव्यंसर्वथाभीष्मपंचकम् यःपुत्रा
र्थंव्रतंकुर्यात्सस्त्रिकोभीष्मपञ्चकम् अत्रैवतुप्रकर्तव्यःप्रबोधस्तुहरेःखग हन्तःशंखासुरोदैत्योनभसःशुक्लपक्षके
एकादश्यांहतोविष्णुश्चातुर्मास्यप्रसुप्तवान् क्षीराब्धौजागर्तेसावेकादश्यांतुकार्तिके अतःप्रबोधनंकार्यमेकादश्यां श्रीः
तुकार्तिके २४ उत्तिष्ठोत्तिष्ठशार्ङ्गघ्न उत्तिष्ठाम्भोधिकारक उत्तिष्ठभुवनाधारत्रैलोक्येमङ्गलंकुरु २५ उत्तिष्ठधरणी ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धारवण्हादिकधारक। कूर्मरूपधरोत्तिष्ठ त्रैलोक्ये॰ उत्तिष्ठोत्तिष्ठ वाराह दंष्ट्रोद्धृतवसुन्धर॰ हिरण्याक्षप्राणघातिन्त्रै
लोक्ये॰ हिरण्यकशिपुघ्नत्वं प्रह्लादानन्दकारक लक्ष्मीपते त्वमुत्तिष्ठ त्रैलोक्ये॰ उत्तिष्ठ बलिदर्पघ्न देवेन्द्रपददायक उ
त्तिष्ठादितिपुत्र त्वं त्रैलोक्ये॰ उत्तिष्ठ हैहयाधीशसमस्तकुलनाशन रेणुकाघ्नत्वमुत्तिष्ठ त्रैलोक्ये॰ उत्तिष्ठ रक्षोदलनअयो
ध्यास्वर्गदायक समुद्रसेतुकर्तस्त्वं त्रैलोक्ये॰ २९ उत्तिष्ठ कंसहरणमदघूर्णितलोचन उत्तिष्ठ हलपाणे त्वं त्रैलोक्ये॰ ३१
उत्तिष्ठ त्वं गयावासिनृत्यक लौकिकर्त्तिक उत्तिष्ठ पद्मासन ग त्रैलोक्ये॰ उत्तिष्ठ म्लेच्छनिवहख ञ्ज संहारकारक अश्व
वाहयुगान्तत्वं त्रैलोक्ये॰ उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज उत्तिष्ठ कमलाकान्त त्रैलोक्ये॰ इत्युक्त्वा शंखभेर्यादि
प्रातःकाले तु वादयेत् वीणावेणुमृदङ्गादिनृत्यगीतादिकारयेत् उत्थापयित्वा देवेशं पूजां तस्य विधाय च सायंकाले
प्रकर्तव्यस्तुलस्युद्वाहजो विधिः अवश्यमेव कर्तव्यः प्रति वर्षं तु वैष्णवैः विधिं तस्य प्रवक्ष्यामि यथा साङ्गा क्रिया भवेत् २८
विष्णोस्तु प्रतिमां कुर्यात् पलस्य स्वर्णजां शुभाम् तदर्धं च तदर्धार्धं यथाशक्त्या प्रकल्पयेत् प्राणप्रतिष्ठां कृत्वा तु तुलसी
विष्णुरूपयोः तत उत्थापयेद्देवं पूर्वोक्तैश्च मन्त्रवादिभिः उपचारैः षोडशभिः पूजयेत् पुरुषोक्तिभिः देशकालौ ततः स्मृत्वा
गणेशं तत्र पूजयेत् पुण्याहं वाचयित्वाथ नान्दीश्राद्धं समाचरेत् वेदवाद्यादिभिर्घोषैर्विष्णुमूर्तिं समापयेत् तुल
सीनिकटे सा तु स्थाप्या चान्तरिता पटैः आगच्छ भगवन्देव अर्चयिष्यामि केशव ३३ तुभ्यं दास्यामि तुलसीं सर्वकामप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०
कार्तिक·मा· दोमव· दद्यात्त्रिवारमर्घ्यं च पाद्यं विस्तरमेव च ततआचमनीयं च त्रिरुक्त्वा च प्रदापयेत् ततोदधिघृतं क्षौद्रं कांस्यपात्र
३२ पुटीकृतम् मधुपर्कं गृहाण त्वं वासुदेव नमोस्तु ते हरिद्रालापनाभ्यङ्गं कार्यं सर्वं विधाय च गोधूलीसमये पूज्यो तुलसी
केशवो पुनः पृथक्पृथक ततः कार्यो सम्मुखो मङ्गलं पठन् ३७ ईषद्दृश्ये भास्करे तु संकल्पं तु समापयेत् स्वगोत्रप्रव
रान्युक्त्वा तथा त्रिपुरुषादिकम् अनादिमध्यनिधन त्रैलोक्यप्रतिपालक इमां गृहाण तुलसीं विवाहविधिनेश्वर ३८
पार्वतीबीजसंभूतां वृन्दाभस्मनि संस्थिताम् अनादिमध्यनिधन वल्लभां ते ददाम्यहम् पयोघटैश्च सेवाभिः कन्या
वद्वर्धिता मया त्वत्प्रियां तुलसीं तुभ्यं दास्यामि त्वं गृहाण भो एवं दत्वा तु तुलसीं पश्चात्तौ पूजयेत् ततः रात्रौ जागरणं कु
र्याद्विवाहोत्सवपूर्वकम् प्रतिवर्षमिदं कुर्यात्कार्तिकव्रतसिद्धये ४३ ॥ ० ॥ इति सन· कार्ति· विंशोध्यायः २०
बालखिल्या ऊचुः ततः प्रभातसमये तुलसीं विष्णुमर्चयेत् वह्निसंस्थापनं कृत्वा द्वादशाक्षरविद्यया पायसाज्य
क्षौद्रतिलैर्हुनेदष्टोत्तरं शतम् ततः स्विष्टकृतं हुत्वा दद्यात्पूर्णाहुतिं ततः आचार्यं तु समभ्यर्च्य होमशेषं समापयेत् च
तुरो वार्षिकान्मासान्नियमो यस्य यः कृतः कथयित्वा द्विजेभ्यस्तं तथान्यान् परिपूजयेत् इदं व्रतं मया देव कृतं प्रीत्यै
तव प्रभो न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन रेवतीतुर्यचरणं द्वादशीसंयुतो नरः न कुर्यात्पारणं कुर्वन् व्रतं निः श्रीः
फलतां व्रजेत् ततो येषां पदार्थानां वर्जनं तु कृतं भवेत् ६ चातुर्मास्येथवा चोर्जे ब्राह्मणेभ्यः समर्पयेत् ततः सर्वसमा ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीयाघघन्त्यक्तंव्रतेस्थितम्: दम्पतीभ्यांसहैवात्रभोक्तव्यंचद्विजैःसह: ततोभुक्त्यनन्तरंयानिगलितानिदलानिच: स्वयंतु
लस्यास्तान्भुक्त्वासर्वपापैःप्रमुच्यते: इक्षुखण्डंतथाधात्रीफलंकोलिफलंतथा: भुक्त्वातुभोजनस्यान्ते तस्योच्छिष्टंवि
नश्यति: एषुत्रिषुनभुक्तंचेदेकैकमपियेनतु: १० ज्ञेयउच्छिष्टआवर्षनरोसोनात्रसंशयः: ततःसायंपुनःपूजांमिष्टुदृ
ण्डेश्वशोभिनौ: तुलसीवासुदेवौचकृतकृत्याभवेत्ततः: ततोविसर्जनंकुर्यादत्वादानादिकंहरेः: वैकुण्ठंगच्छभगवंस्तुलसी
सहितप्रभो: मत्कृतंपूजनंगृह्यसंतुष्टोभवसर्वदा: गच्छगच्छसुरश्रेष्ठस्वस्थानंपरमेश्वर: यत्रब्रह्मादयोदेवास्तत्रगच्छ
जनार्दन: एवंविसृज्यदेवेशमाचार्यायप्रदापयेत्: मूर्त्यादिकंसर्वमेवकृतकृत्योभवेन्नरः १५ प्रतिवर्षंकरोत्येवंतुलस्यु
द्वहनंशुभम्: इहलोकेपरत्रापिविपुलंसयशोभवेत्: प्रतिवर्षंतुयःकुर्यात्तुलसीकरपीडनम्: प्रतिवर्षंधनस्तेनभक्तिमा
न्धनधान्यैःसयुक्तोभवतिनिश्चितम्: १७ ॐ इतिश्रीसनत्कुमारसंहितायांकार्तिक० एकविंशोध्यायः २१ ॐ
वालखिल्या ऊचुः कार्तिकस्यासितेपक्षेचतुर्दश्यांसमागमत्: वैकुण्ठेशास्तुवैकुण्ठाद्वाराणस्यांकृतेयुगे: रात्र्यांतुर्यां
शतोघायांस्नात्वासोमणिकर्णिके: गृहीत्वाहेमपद्मानिसहस्रैकंततोव्रजेत्: अतिभक्त्याप्रजपितुंशिवयासहितंशिवम्:
विधायपूजांविश्वेशीनततःपद्मैरपूजयत्: सहस्रसंख्यांकृत्वादावेकनाम्नाततःपरम्: आरब्धंपूजनंतेनाशिवस्तद्भक्तिमैर
क्षत: एकंपद्मंपद्ममध्येनिलीयात्तंहरेरात्तु: ततःपूजितवान्विष्णुरेकोनंकमलंत्वभूत्: इतस्ततस्तेनदृष्टंपद्मंतिष्ठतिन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिकमा॰ कश्चित् कमलेषुभ्रमोजातोथवानामकमेभ्रमः क्षणंविचार्यसहरिर्निमेनामभ्रमोभवत् पद्मेचैवभ्रमोजातोविचार्यैवं
३३ पुनःपुनः सहस्रपद्मसंकल्पःपूजार्थंतुकृतोमया अर्च्यःकथंमहादेवएकोनकमलेर्मया यदानेतुंगमिष्यामिभङ्गः
स्यादासनस्यतु अतःपरंकिंविधेयंचिन्तोद्विग्नोहरिस्तदा एकःप्रकारउत्पन्नोहृदयेषुमुनीश्वराः पुण्डरीकाक्षइत्येवं
मांवदन्तिमुनीश्वराः नेत्रंमेपद्मसदृशंपद्मार्थेत्वर्पयाम्यहम् इतिनिश्चित्यमनसादत्वातर्जनिकांसतु ११ नेत्रंमध्या
त्तदुत्पाद्यमहादेवेनपूजितः ततोमहेश्वरस्तुष्टोवाक्यमेतदुवाचह १२ महादेवउवाच त्वत्समोनास्तिमद्भक्तस्त्रैलोक्ये
सचराचरे राज्यंदत्तंत्रिलोकास्तेभवत्वंलोकपालकः अन्यंवरयभद्रन्तेवरंयन्मनसेप्सितम् अवश्यमेवदास्यामिना
त्रकार्याविचारणा मद्भक्तिंतुसमालम्ब्ययोद्विषन्तिजनार्दनम् तेमद्द्वेष्यानराविष्णोव्रजेयुर्नरकंध्रुवम् १५ विष्णुरुवाच
त्रैलोक्यरक्षाकरणंममादिष्टंमहेश्वर दुर्मदाश्चमहासत्वादैत्यामायाविःकथंमया शिवउवाच एतत्सुदर्शनंचक्रंसर्वदैत्य
निकृन्तनम् गृहाणभगवन्विष्णोमयातुभ्यंनिवेदितम् अनेनसर्वदैत्यानांभगवन्कदनंकुरु स्वचक्रंहरेर्दत्वाततोवच
नमब्रवीत् शिवउवाच वर्षेचहेमलंवाख्येमासेश्रीसतिकार्तिके शुक्लपक्षेचतुर्दश्यामरुणाभ्युदयंप्रति महादेव
निर्योब्राह्म्येमुहूर्तेमणिकर्णिके स्नात्वाविश्वेश्वरंलिङ्गंवैकुण्ठेत्यपूजितम् सहस्रकमलेस्तस्माद्भविष्यतिममप्रिया २० श्रीः
विख्याताःसर्वलोकेषुवैकुण्ठाख्यचतुर्दशी अन्यंवरंप्रदास्यामिशृणुविष्णोवचोमम पूर्वरात्रेतुतेपूजाकर्तव्यासर्वजातिभिः ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपवासं दिवा कुर्यात्सायं काले तवार्चनम्ः पश्चात्तमर्चनं कार्यमन्यथा निष्फलं भवेत् ग्रासाहात्तु हरिपूजायां रात्रिव्याप्ता चतुर्दशी।
अरुणोदयवेलायां शिवपूजा समाचरेत् सहस्रकमलैर्विष्णोः रादौ येः पूजितो नरेः पश्चात्वच्छिवः पूजितश्चेज्जीवन्मुक्तास्तर
वहि २५ सायं स्नात्वा पंचनदे विन्दुमाधवमर्चयेत् सहस्रनामभिर्विष्णोः कमलैः सुमनोहरैः मणिकर्णं ततः स्नात्वा
विश्वेशमर्चयेत्ततः सहस्रनामभिः पुण्यैर्जीवन्मुक्तास्तएव हि स्नात्वा यो विष्णुकाञ्च्यां तु अनन्तेसनं समर्चयेत् रुद्रकां
च्यां ततः स्नात्वा प्रणवेशं समर्चयेत् पृथिव्यां च श्रुता ये ये धर्माः प्रोक्ता मनीषिभिः सर्वेषां फलमाप्नोति नात्र कार्या वि
चारणा आदौ स्नात्वा वन्हितीर्थे यजेन्नारायणं ततः रेतोदके ततः स्नात्वा केदारेशं समर्चयेत् ३० इहैवार्थवतां नाथो
भवेन्नास्त्यत्र संशयः स्थलपद्मैस्तत्र पूजा कर्तव्या जलजक्षयात् आदौ स्नात्वा पूर्वरात्र्यां वेणिमाधवमर्चयेत् गा
न्हव्यां च ततः स्नात्वा संगमेशं प्रपूजयेत् रक्तपद्मैः श्वेतपद्मैर्हरिरुद्रौ क्रमेण च सर्वास्त्रियस्तस्य वश्याः सत्यं विष्णो मयो
दितम् मोक्षार्थं काशिकामध्ये विन्दुमाधवविश्वपौ नलभेत्पूजयित्वा किं मोक्षं न तारकं विना विनायो हरिपूजां तु कुर्या
द्रुद्रस्य चार्चनम् वृथा तस्य भवेत्पूजा सत्यमेतद्वचो मम ३५ एवं तस्मै वरान्दत्वा चान्तर्धानं ययौ शिवः तस्मात्सर्वप्रय
त्नेन पूज्यो हरिहरावुभौ प्राप्ते कलियुगे घोरे वर्णाचाचारविवर्जिते तत्वसंख्यैर्वर्षशतैर्गतैर्देवो महेश्वरः वाराणसीस्थ
लिंगानि पाताले स नयिष्यति ततो द्विगुणवर्षैस्तु गङ्गा वाराणसी तथा भविष्यति ह्यदृश्या सा तत्परं तु मुनीश्वराः अन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 हिंतायदाकाशीभविष्यतियदामुने॰ नाशास्तुलिङ्गचिन्हानांनिष्प्रभाःसकलाजनाः चतुर्दशाब्दंदुर्भिक्षंमहामारीसमुद्भ
 वः ४० गोवधश्चापिसर्वत्रमृत्तिकाभस्मसंनिभाः गङ्गोत्तर्यांतुयाधारापतेद्भागीरथाश्रमे हरिद्वाराच्चवायव्येतस्यालो
पोभविष्यति॰ भागीरथ्यांगतायांतुकमेटीतन्तुसन्निभाः भविष्यन्तिजलेकीटास्तोयंनीलीनिभंतथा॰ चतुर्वर्षसहस्रे
तुशैलस्थाःसर्वदेवताः मत्यंत्यक्त्वागमिष्यन्तिमानसंचसरोवरम् गतेषुसर्वदेवेषुराजानोधर्मविच्युताः पापिष्ठाये
दुराचारानानेतिपरिपीडिताः कलेरयुतवर्षाणिभविष्यंतियदारवग॰ श्रोतमार्गस्यलोपस्तुभविष्यतिनसंशयः तदा
कौलाभविष्यंतिमद्यपानपरायणाः स्वल्पायुषःस्वल्पभाग्यानानारोगैःप्रपीडिताः विप्रास्तुदक्षिणेदेशेवेदज्ञाःसंभ
वंतिच॰ आनाय्यतान्शङ्करकर्ताधर्मसंस्थापयिष्यति॰ ४७ ॥ इतिश्रीसन॰ कार्तिक॰ द्वाविंशोध्यायः २२ ॥
वालखिल्याऊचुः कार्तिक्यांपूर्णिमायांतुकुर्यात्त्रैपुरमुत्सवम् दीपोदेयोवश्यमेवसायंकालेशिवालये॰ त्रिपु
रोनामदैत्येन्द्रःप्रयागेतपआस्थितः लक्षवर्षाण्यतस्तप्तंत्रैलोक्यंसचराचरम् तत्तपस्तेजसाध्वंसंदग्धंतुभुव
नत्रयम् नानादेवाङ्गनादेवैःप्रेषिताःसंविमोहितुम् नतासांवशगःसोभूद्धर्षणोश्चापिधर्षितः नक्रोधलोभमोहा
नांवशोदैत्योजुगायते॰ वरंदातुंययौब्रह्मानारदादिसमन्वितः ५ ब्रह्मोवाच वरंवरयभद्रंतेसंतुष्टोहंपितामहः
तपसातुफलेसिद्धेकःक्लेशंसहतेनरः त्रिपुरउवाच अमरंकुरुमांब्रह्मन्करोमिह्यन्यथातपः दातुंशक्तोसि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेब्रह्मन्नन्यथागच्छसत्वरम् ब्रह्मोवाच· मयापिवालमर्त्यमितरेषांतुकाकथा· अवश्यंदेहिनांमृत्युःसम्भाव्योया
वयस्वमे· ८ त्रिपुरउवाच· नमेमृत्युर्देवताभ्योमानुषेभ्योनिशाचरात् नस्त्रीभ्योनचरोगेभ्योदेह्येवंवरमुत्तमम् ९
ब्रह्मापिचतथेत्युक्त्वासत्यलोकंजगामसः एवंलब्धवरंज्ञात्वानानादैत्याःसमाययुः तान्दैत्यानागतान्दृष्ट्वाचाज्ञापय
त्तदानवान् अस्मद्विरोधिनोदेवाःधर्तव्याःसर्वएवहि नोचेद्यानिचरत्नानि· देवादीनांसमीपतः गृहीत्वातानिसर्वाणिकुर्व
न्तूपायनमम इत्याज्ञांसर्वशिरसिकृत्वातेसर्वदानवाः देवान्नागांश्चयक्षांश्चधृत्वाग्रेविनिवेदिताः प्रणम्यसर्वंतेदे
वास्त्रिपुरंचव्याजिज्ञपुः गृह्यतांसर्वराजेन्द्रयदस्माकंभविष्यति· वयंकृत्वातुसेवांतेजीविष्यामोयथातथा· इति
तस्यवचस्तेषामधिकारस्थानाःकृताः तेषांस्त्रियःसमानीयदेववेश्याःसहस्रशः एकंभास्करमुत्सृज्यसर्वेदेवास्त॰
दाज्ञया चक्रुर्यथोक्तंदैत्यस्यद्वारस्थाःसर्वएवहि सूर्यस्यनिकटेप्युक्तंमद्द्वारेस्थीयतांसदा तेनापिचतथेत्युक्त्वातद्द्वारे
मंस्थितंक्षणा[illegible] १९ ददाहभुवनंसर्वंस्वकरैःक्षणमात्रतः आदिष्टश्चततस्तेनस्वेच्छयागम्यतामिति ततोगतोसौभ
गवान्भुवनानिविभावयन् चक्रुर्देवास्तदाज्ञांचद्वारितिष्ठंतिवारितैः कदाचित्तस्यगेहेतुनारदःसमुपाययौ· तेनापि
पूजितोभक्त्यापप्रच्छस्वंपराक्रमम् २० नारदउवाच ईदृशोजयघोषस्तुकेनापिनकृतोभुवि अस्मिन्देहेतुदैत्येन्द्रकिमि
दानींविधीयताम् त्रिपुरउवाच· सर्वस्थलेषुमेकीर्तिर्निगताकिन्तुनारद मयाप्रस्थापितादैत्याःसर्वएवइतस्ततः २२

त्रि.ग.४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 नारदउवाच· योयोयत्रगतोदैत्योजातस्तत्रप्रभुःसहि· तवनामनगृह्णातिवक्तिचस्वंपराक्रमम्· इतिश्रुत्वाऽनिलस्तेनसद्य
एवविद्रावितः क्रोधश्चास्यमहानजातः किंकर्तव्यंमयाधुना· विश्वकर्माणमाहूयवाक्यमेतदुवाचह· शीघ्रंकुरुत्रिधातु
 नांविश्वकर्मन्पुरत्रयम्· विमानतुल्यंयत्रेच्छातत्रतत्रगमिष्यति· इतितस्यवचःश्रुत्वात्वष्टापितत्तथाकरोत्· रूपत्रयंस
मास्थायत्रिपुरेषुसमाश्रितः नारदस्यतुवाक्येनदैत्यावन्दीकृतास्तदा· २७ पुरेणैकेनपातालेभ्रमतेत्रिपुरासुरः स्वर्गेचा
पिपुरेणैकेनचरत्यमटतेपुरा काँश्चित्संताडयत्येवंसंभारयतिकानपि· ददातिकेषांस्वामित्वंस्वेच्छाचारीमहाबलः २९
तेनेत्थंपंचलक्षाणिसर्वलोकाउपद्रुताः तदादेवान्समागम्यनारदोवाक्यमब्रवीत् ३० नारदउवाच· पराक्रमायास्तु
धिक्त्वांदेवेन्द्रकगतास्तिधीः विचारयन्तुभोदेवावधायत्रिपुरस्यच· इत्थंमुनिवचःश्रुत्वासलज्जोभूदधोमुखः पुनस्तं
नारदःप्राहब्रह्माणंशंकरंव्रज· ततउत्थायदेवेन्द्रोवृद्धोदेवगणैःसह नारदेनसमायुक्तःसत्यलोकंजगामसः तत्राप
४ता श्यत्सधारंसुवाचकरुणंवचः इन्द्रउवाच धातरस्मत्कृतिर्नास्तिहननीयास्त्वयावयम्· नासाग्रसंस्थिताःप्राणा
स्त्रिपुरस्यतुशासनात् इतीन्द्रस्यवचःश्रुत्वाब्रह्मासेन्द्रोमुनीश्वरैः शुक्लोवैकुण्ठमगमद्यत्रास्तेमधुसूदनः तत्रगत्वाम
हा[illegible]विष्णुंप्रणिपत्यास्थिताःसुराः अनुगृहीतोहकृपातातंब्रह्मावाक्यमब्रवीत् ३१ ब्रह्मोवाच· भगवन्देवदेवे
शादेवापत्तिविनाशक त्रिपुरासुरनिर्दग्धान्किंनदेवांस्त्वमुपेक्षसे विष्णुरुवाच· त्वयैवंनाशितंब्रह्मन्दत्तानानावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वयैवंनाशितंब्रह्मन्दत्तानानाविधावराः देवादिभ्यःकथंतस्यमृत्युःसंभाव्यतेधुना नभासतेविचारोमेतस्यमृत्योःसुरेश्वराः ४०
अस्तिकश्चिद्यदोपायःकथंवैकरवाण्यहम् इतिश्रुत्वावचोविष्णोःसर्वेबुद्ध्यातुकुण्ठिताः यदानोचुर्वचःकिंचिन्नारदो
वाक्यमब्रवीत् नारदउवाच कुर्वन्तुखेदंमादेवाउपायःकथ्यतेमया एकोदृष्टःसृष्टिमध्येनदेवोनचमानुषः नराक्ष
सोनैवदैत्योनभूतोनपिशाचकाः नासौपुमान्नचस्त्रीसनजडोनचपण्डितः नास्यतातोनवामातानभ्रातानभगिनीनच ४४
तथैवतस्यसंतानंसएनंमारयिष्यति ब्रह्मोवाच एतादृशःक्वदृष्टोसौसत्यंवालीकमेववा इतिब्रह्मवचःश्रुत्वाप्रो
वाचजगदीश्वरः विष्णुरुवाच अहोत्रैलोक्यनाथोसौमहादेवोवृषध्वजः ब्रह्मरूपंविस्मृतोसौमनःकार्यंकरिष्यति
इत्युक्त्वासर्वएवैतेशंकरंशरणंययुः देवदेवमहादेवदैत्येन्द्रदुष्टदैत्यतः त्वामेवशरणंप्राप्तास्त्रिपुरेणप्रपीडिताः ४८
शिवउवाच ब्रह्मंस्त्वयावरोदत्तउन्मत्तोसौभवत्तदा प्रहृष्टोसिवरंकस्मात्पुनर्मारयसेकथम् मदीयंनाशितंतेनकर
स्माद्वध्योमयासुरः इतिरुद्रवचःश्रुत्वाहताशास्तेसुरास्तदा तादृशांस्तान्सुरान्दृष्ट्वाविष्णुर्वचनमब्रवीत् त्वयाप्रतिज्ञा
लोकानांपालनायसदाशिव कृतातस्त्वांसमायाताःशरणंसर्वदेवताः मयानानाविधंदुःखंहृदयेतुसदाशिव एतद्दुःखं
मयाशक्यमपनेतुंयतोनहि अतस्त्वांयाचयाम्यद्यदेवान्बन्देर्विमोचय ५३ शिवउवाच तववाक्यंकरिष्यामिसंग्रा
मार्थंसदाशिव करिष्यतिकथंदैत्यःशंभोरन्यायमेवसः इतिविष्णुवचःश्रुत्वाहाकष्टमितिचाब्रुवन् अत्रागमिष्यत्य

✗ करिष्यामिसामग्रीनास्तिमेगृहे ममापराधरहितंहनिष्यामिनदानवम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्त्तिक.मा स्माकंस्मरण्यास्त्रिपुरासुरः नविलंबोमृतोकार्य्यःकिमिदानींविधीयताम् सुरान्म्लानमुखान्दृष्ट्वानारदोवाक्यमब्रवीत् ५७ ना
३६ रदउवाच मामर्षीक्रियतांशीघ्रमायातित्रिपुरासुरः विष्णुंपलायितंदृष्ट्वाकरुद्रोस्मीतिलोकपन् रुद्रउवाच मयान
नाशितंतस्ययद्यिपास्यतिमत्स्थले योहंतदावश्यमेवमयामार्य्यःसुदुर्मदः इतिरुद्रवचःश्रुत्वासमास्वस्तास्तुदेवताः साम
ग्रीविष्णुरकरोद्योद्धार्थंसत्धूर्जटेः बाणःस्वयंबभूवास्यवन्हिःशल्यंबभूवसः वासुकस्तुगुणस्वरूपोभून्मेनाकंचधनुर्धनुः ६१
स्यन्दनंधरणीजाताचेदाजाताहयोत्तमाः विधातासारथिर्जातःपताकाचदिवाकरः आतपत्रंचचन्द्रोभूदुरोगाश्चाधाःपदा
तयः ततोवेगात्तवमुत्पत्यनारदस्त्रिपुरंययौ श्रुत्वानारदमायातंसत्कारैरर्चयच्चतम् मुनेपुराणिपश्यत्वमजेयानिसु
रासुरैः त्रैलोक्येचाधुनाजातंत्वत्कृपातोयशोमम इतितस्यवचःश्रुत्वाललाटंकुट्टयन्मुनिः तूष्णीमासीद्धसित्वेनदैत्र
लोक्यासुरोब्रवीत् ६५ त्रिपुरउवाच किमर्थंविह्वलीवेषामुनेबाष्पकृतात्वया मद्भाग्यसमभाग्यश्चेदस्तिकश्चिन्निग
द्यताम् नारदउवाच कैलाशोवेगतश्चाहंदैत्येन्द्रश्रृणुवैभवम् महेश्वरस्यकिंवाच्यंतत्सक्षांशोनहित्वयि इतितद्वचनं
श्रुत्वानारदस्तुविदायितः गृहीत्वादैत्यसंघान्सकैलाशांत्रिपुरोययौ तत्रदेवैर्महद्युद्धंजातन्तत्रदिनत्रयम् पश्चाद्धरे
णनिहतस्त्रिपुरश्चैकबाणतः कार्त्तिक्यांपूर्णिमायांतुसर्वेदेवाःप्रतुष्टुवुः तस्मिन्दिनेसर्वदेवैर्दीपादत्ताहरायच ७० स श्रीः
र्वथैवप्रदेयोस्माद्दीपस्तुहरतुष्टये विंशतिसप्तकनकसहितादीपवर्तयः दद्याद्दीपंपौर्णमास्यांसर्वपापैःप्रमुच्यते ॥ ३६

स.पा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पौर्णमास्यांतुसंध्यायांकर्तव्यस्त्रिपुरोत्सवः दद्यादनेनमंत्रेणप्रदीपांश्चसुरालये ७३ कीटाःपतङ्गामशकाश्चवृक्षाजलेस्थले
येचचरन्तिजीवाः दृष्ट्वाप्रदीपंनचजन्मभागिनोभवंतिनित्यंश्वपचाहिविप्राः ७४ कार्तिक्यांतुवृषोत्सर्गंकृत्वानक्तंस
माचरेत् शैवंपदमवाप्नोतिशिवव्रतमिदंस्मृतम् कार्यस्तस्मात्पूर्णिमायांत्रिपुरायमहोत्सवः ७५ ॥ ॥
इतिश्रीसनत्कुमारसंहितायांकार्तिकमहात्म्येत्रिपुरवधेपूर्णिमामहिमानुवर्णनंनामत्रयोविंशोध्यायः २३
वालखिल्याऊचुः अथोर्जव्रतिनःसम्यगुद्यापनमथोच्यते कृतेउद्यापनेसांगंव्रतंभवतिनिश्चितम् ऊर्जस्यशुक्लचतु
र्दश्यांकुर्यादुद्यापनंव्रती तुलस्याउपरिष्टात्तुकुर्यान्मण्डपिकांशुभाम् तुलसीमूलदेशेचसर्वतोभद्रमेववा तिर्य
गूर्ध्वगतारेखाऊनविंशतिसङ्ख्यकाः खण्डेन्दुस्त्रिपदःकोणेशृङ्खला पञ्चभिःपदैः एकादशपदावल्लीभद्रंतुनवभिः
पदैः चतुर्विंशत्पदावापीपरिधिर्विंशतिस्मृताः मध्येषोडशभिःकोष्ठैःपद्ममष्टदलंस्मृतम् ५ खण्डेंदवोवेदसङ्
ख्यावाप्यापिश्वेतवर्णिकाः चतस्रःशृंखलाःश्यामारक्तंभद्राष्टकंस्मृतम् वल्ल्यष्टकंनीलरूपंपीतस्तुपरिधिर्भवेत्
कमलंपंचरङ्गंतुयथाशोभंबुधोलिखेत् तस्योपरिष्टात्कलशंपञ्चरत्नसमन्वितम् पूजयेत्तत्रदेवेशंसौवर्णंगुर्व
नुज्ञया रात्रौजागरणंकुर्याद्गीतवाद्यादिमङ्गलैः ततस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान् त्रिंशन्मितानथैकं
वास्वशक्त्याविनिमंत्रयेत् अतोदेवाइतिद्वाभ्यांहोमयेत्तिलपायसम् १० ततोगांकपिलांदद्यात्पूजयेद्विधिवद्गुरुम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्तिक मा. परात्रपूर्णिमास्यात्तुयात्रास्यात्पुष्करस्यतु एवमुद्यापनंकृत्वासम्यग्व्रतफलंलभेत् वरान्दत्वायतोविष्णुर्मत्स्यरूप्यभवत्ततः२
३७ तस्यांजप्तंहुतंदत्तंदशाक्षयफलंलभेत् कार्त्तिक्यांपूर्णिमायांतुविष्णुंनीराजयेत्सदा प्रदोषसमयेराजन्नसदारिद्र्यमाप्नुया
त् कार्त्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनम् सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः एतानिकार्त्तिकेमासिनरःकु
र्वाद्व्रतानिच इहलोकेशरीरीशान्क्लेशयित्वाफलंलभेत् नकार्त्तिकसमोमासोविष्णुसंतुष्टिकारकः १६ स्वल्पक्लेशेः
र्विष्णुलोकप्रापकोनापरोभवत् इत्थंनैमिषिकारण्येवालखिल्यैरुदाहृतम् भास्करस्यमुखाच्छ्रुत्वाततस्तानभिवाद्य
च यद्योसूर्यस्यनिकटेकुर्वन्तोभास्करस्तुतिम् इत्येतत्सर्वमाख्यातंकार्त्तिकस्यव्रतोत्तमम् यत्कृत्वासर्वपापेभ्योमुक्तो
भवतितत्क्षणात् अतःपरंकिंवक्ष्यामिप्रब्रूह्यात्रेयसत्वरम् २० ः॰ः इतिश्रीसनत्कुमारसंहितायांकार्त्तिकमहात्म्ये
चतुर्विंशोध्यायः ः॰ः २४ ः॰ः आत्रेयउवाच अद्भुतोयंत्वयाप्रोक्तोमहिमाकार्त्तिकस्यतु स्वस्यकर्तुमसा
मर्थ्यंकथमेतत्कृतंतदा कुमारउवाच नास्तिकर्तुंस्वसामर्थ्यमुपायात्प्राप्यतेफलम् द्रव्यंदत्वाब्राह्मणायगृह्णी
यात्फलमुत्तमम् शिष्याद्वाभृत्यवर्गाद्वास्त्रीभ्योवाप्ताच्चकारयेत् तस्मादपिफलंग्राह्यंफलभाग्जायतेनरः आ
त्रेयउवाच अदत्तान्यपिपुण्यानिप्राप्यन्तेकेनचित्क्वचित् एतदिच्छाम्यहंश्रोतुंकौतुकंमवर्तते सनत्कुमारउ श्रीः
वाच अदत्तान्यपिपुण्यानिलभंतेपातकान्यपि येनोपायेनतद्वक्ष्मिशृणुष्वेकमनाद्विज सुकृतंवादुष्कृतंवापि ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमेके नयत्कोते जायतेनस्यतश्राकृत्रेतायांतुपुरेभवेत् द्वापरेवंग्राममघ्येतत्कलौकर्तैवकेवलम् अज्ञानाद्यत्कृतंकर्मवा
ल्येस्वप्नेतुतत्फलम् अज्ञानाद्यच्चतारुण्येवाल्येतस्यफलंलभेत् ज्ञानपूर्वंकृतंकर्मआजन्मान्तंफलंलभेत् ष
ण्मासंपापिसंगेननरःपापीप्रजायते पापिनांवाधर्मिणांवासंसर्गाद्द्वादशमासिकम् भोजनादेकपङ्क्तौचविंशांशं
पुण्यपापयोः एकासनेद्वयोर्वासात्सहस्रांशेनलिप्यते योहियस्यान्नमश्नातिसभुङ्क्तेतस्यकिल्बिषम् जपादौ
पापिसंसर्गात्सोऽशांशोविनश्यति १९ परस्यस्तवनाद्ध्यानादेकपात्रस्यभोजनात् एकशय्याप्रावरणात्षष्ठांशः
पुण्यपापयोः पुरुषोहरतेसर्वंभार्यायाऔरसस्यच अर्धंशिष्याच्चतुर्थांशंपापंपुण्यंतथैवच भर्तुराज्ञाकरीना
रीभर्तुरर्धंहरेत् वर्षाशनंतुयोदत्तेतदर्धांशस्यभागयम् वर्षाशनोर्द्धंपुण्यंतुभुङ्क्तेवर्षाशनीनरः पुरोहितस्यषष्ठां
शंपापंवापुण्यमेववा यजमानोभुनक्त्येवतद्दशांशंपुरोहितः उद्योगीचानुमन्ताचयश्चोपकरणप्रदः षष्ठांशंपुण्य
पापानामुपदेष्टादशांशकम् यद्धस्तात्कार्यतेनान्नमस्मैप्रयच्छति दशांशंपुण्यपापानांलभतेनात्रसंशयः अत्रैवो
दाहरन्तीममितिहासंपुरातनम् वाराणस्यांकर्मदत्तोभरद्वाजकुलेभवत् वेदवेदाङ्गवित्पूज्यस्तपध्यानपरायणः सु
शीलानामतद्भार्यासुशीलातरुणीशुभा एकदत्तःसुतःसोपिसर्वविद्यामधीतवान् २० तारुण्यंसवयःप्राप्यका

कर्म३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माविष्टस्तदाभवत् तस्यरूपावती भार्याचतुरातीवसुन्दरी पतिव्रतापितद्धित्वासाति कामवशंययौ· परस्त्रीव्यस
नात्तेनबहुद्रव्यंविनाशितम् पितुर्दुःखभयाल्लोकानोदुःकिंचित्कुभाषुभम् मात्रानिवारिताभूयोव्यसनंसोत्य
जन्नव ततश्चपतितंभार्याधिक्करोतिसुहृज्जनः महापापात्रापयायैवपरस्त्रीव्यसनायसः परस्त्रीव्यसनाशक्त्यावयो
नीतमजानता बहुभिःशिक्षितंनैवकरोतिविधिमोहितः ततश्चौर्यंसमालब्धंपरस्त्रीसुखलब्धये ततोलोकैश्चतज्ज्ञा
त्वंभीत्याकाश्यपःपलायितः एकदन्तस्तदाचिन्तामुपलेभेक्वयाम्यहम् मार्गानभिज्ञोऽगच्छत्सशनैर्देशान्विलोकयन् २९
देशाद्देशान्तरंगच्छन् यमुनातीरमागतः स्नानार्थंकार्तिकेमासितत्रलोकाःसमागमन् कार्तिकव्रतिनस्तत्रनानादेश
समागतान् नरान्ददर्शस्त्रीश्चापिसुरूपावयसान्विताः सदृष्ट्वाकौतुकंपश्यन्मासमेकमुवासह ततन्मध्येकोपिजन
श्चेष्टितंवेददुर्मतेः ३० सन्ध्याकालेभ्रमंस्तत्रस्त्रीणांदर्शनलालसः ददर्शब्राह्मणांस्तत्रजपदेवार्चनास्थितान् कांश्चि
त्पुराणपठिनःकांश्चित्तत्कथाश्रवणेरतान् नृत्यतोगायतःकांश्चिद्धरिस्तवनतत्परान् तुलसीधारिणःकांश्चिद्धरिमुद्रा
ङ्कितान्परान् नित्यंपरिभ्रमंस्तत्रदर्शनस्पर्शभाषणैः पुण्यात्मनांजनानांचपापंतस्यक्षयंययौ पौर्णमास्यांत
तोपश्यद्धिश्चगोपूजनादिकम् दक्षिणाभोजनाद्यंचदीपदानादिकंतथा रात्रौदीपोत्सवंपश्यन्परस्त्रीकामुकोभवत् ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोर्धरात्रसमयेराजन्यस्यास्त्रियंबलात् जग्राहचालिलिङ्गासोहस्तस्त्यपतिनातदा दृष्टमात्रस्तुतेनाथतांविहाय
पलायितः एकदंसस्तस्यमार्गेसर्पेऽधिरूपतत्तदा तदाघृदाकुनादष्टःसद्योमृत्युरुपाययौ ब्राह्मणामिलि
तास्तत्रवैष्णवाःपुण्यशालिनः एकदन्तोद्विजःसोयंदष्टःसर्पेणदैवतः किंकरिष्यतियज्ञाविनतत्केननिवार्य
ते इत्यूचुरामरामेतिकेचिद्विष्णोशिवेतिच कर्णेजपंस्तुतारेणस्वरेणकरुणान्विताः केचित्तुतुलसीमिश्रंजल
क्षिप्युराननात् यमदूतैस्तदाबद्धस्ताडितोनेकधाततः यमस्यसंनिधौनीतस्तंदृष्ट्वार्कसूर्यनन्दनः अब्रवीच्चि
त्रगुप्तंवैकिमस्याहुष्कृतम् ४२ चित्रगुप्तउवाच जानतैवचविप्रेणाकृतंकर्माशुभंवहु तस्मान्निरयवासा
यंयोग्योयंनास्तिसंशयः चित्रगुप्तवचःश्रुत्वायमःप्रेतपमब्रवीत् यमउवाच प्रेतपेमंद्विजंशीघ्रंनरकेपि
निपातय प्रेतपस्तुतदाधृत्वातंविप्रंनरकेनयत् नानाभयानकाहृष्ट्वानरकास्तेनवैतदा भयकंपितस्त्राहेदंव
थाजन्मविनाशितम् प्रेतपेनततश्चोक्तंनरकान्क्रमशोविश यदासोनाविशत्तत्रतैलतप्तेकटाहके कुम्भी
पाकाभिधेक्षिप्तःप्रेतपेनहठात्तदा प्रक्षिप्तोपिद्विजोनासौवेदनामापकामपि दृष्ट्वाश्चर्यंभयात्प्रोक्तंप्रेतपेनकु

तदाश्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तूहलात् कुम्भीपाकेपरिक्षिप्तःसुखमास्तेयथाह्रदे जलस्यघर्मतप्तोहितथायमभवद्द्विजः नक्कुत्वाधर्मराजो
पिकिमिदंकस्यकर्मणः फलंविचारयेद्यावत्तावत्तत्रसमागतः ५० नारदःसर्वदर्शीचयमंप्रोवाचसादरम् ए
कदन्तसमानेयोनायमर्हतियातनाम् अनेनकिलकालिन्द्यामूर्जेमासिसमागते स्नानार्थंसज्जनैःसार्धमा
सःसर्वोतिवाहितः तेनपुण्यप्रभावेणक्षीणंपातकमस्यवै अतःप्रदर्श्यनरकान्नेतव्यःस्वर्गमेवहि ततोनारद
वाक्येनदार्शयित्वाद्विजस्यच नरकान्बहुदुःखाढ्यानेकाशीतिप्रभेदकान् ततोनीतःस्वर्गमसौपुण्यभोगायदेव
वत् अतःसंसर्गजंपुण्यंपापंवापिभवेद्ध्रुवम् तस्मात्सतांसङ्गतयेपतितव्यंसुधीमता असत्संगाद्यतःपुण्यम
र्जितंचविनश्यति इतिहासमिमंश्रुत्वाशुभंप्राप्नोतिमानवः एषःसत्सङ्गमहिमाउक्तोन्यत्किंवक्षितम् ५७
॰ इतिश्रीसनत्कुमारसंहितायांकार्तिकमहात्म्येसत्सङ्गतिमहिमावर्णनंनामपंचविंशोध्यायः २५ ॰
आत्रेयउवाच ईदृशंकार्तिकस्नानमल्पायासंमहत्फलम् नकुर्वन्तिजनाःकेचित्किमर्थंमुनिसत्तम कुमार श्रीः
उवाच स्वसृष्टिवृद्धयेवेधाधर्माधर्मौससर्जह धर्ममेवानुतिष्ठन्तःप्राप्नुवन्तिशुभांगतिम् अधर्ममनुतिष्ठन्तोया ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यांतिचाधोगतिंनराः पुण्यकर्मफलंनाकोनरकस्तद्विपर्ययः तयोःपाल्येनकर्तारौद्वावेवविधिनाकृतौ शतक्रतुयमौतौच
पुण्यपापानुसारिणौ गुरुतल्पादयःपुत्राःकामस्यप्रथिताअपि क्रोधस्यपितृघाताद्यालोभस्यतनयाःशृणु ५
ब्रह्मस्वहरणाद्याश्च एतेनरकनायकाः कृतायमेनतेर्यस्मान्मनुजानहिकुर्वते व्रतादिधर्मकृत्यंयत्तेर्यस्मान्नतत्
कुर्वते अश्रद्धाचैवदुर्मेधाअविद्यायाःसुतेउभे श्रद्धामेधाविद्यानित्योवर्तेतेभुविसर्वदा ताभ्यांवाप्तस्तुमनुजःश्री
विष्णोःश्रवणादिकम् नकरोतिसुदुर्मेधायेनान्धंयातिवैतमः आत्रेयउवाच ऊर्जव्रतोद्यापनाद्यावश्यकाः
सिद्धिमाककथम् कथंविमुच्यतेजन्तुर्दुःखसंसारसागरात् सनत्कुमारउवाच शृणुयादूर्जमाहात्म्यंनिय
मेनशुचिःपुमान् संपूर्णमथवाध्यायमेकश्लोकमथापिवा ब्राह्मणान्भोजयेत्पश्चात्तेभ्योदद्याच्चदक्षिणाम् ११
मुहूर्तंवापिशृणुयात्कथांपुण्यांदिनेदिने यदिप्रतिदिनंश्रोतुमशक्तःस्यात्तुमानवः पुण्यमासेथवापुण्यति
थौसंशृणुयादपि तेनपुण्यप्रभावेणपापान्मुक्तोभवेन्नरः पुराणज्ञःशुचिर्दक्षःशान्तोविगतमत्सरः साधुःका
रुण्यवान्वाग्मीवदेत्पुण्यांकथांसुधीः व्यासासनसमारूढोयदापौराणिकोभवेत् आसमाप्तेःप्रसङ्गस्यनमस्
कुर्यान्नकस्यचित् १५ नदुर्जनसमाकीर्णेनशूद्रश्वापदावृते देशेनद्यूतसदनेवदेत्पुण्यकथांसुधीः श्रद्धाभक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२८
कार्त्तिक मा समायुक्तानान्यकार्येषुलालसाः वाग्यताःशुचयोदक्षाःश्रोतारःपुण्यभागिनः अभक्त्यायेकथांपुण्यांशृण्वन्ति
४० मनुजाधमाः तेषांपुण्यफलंनास्तिदुःखंस्याज्जन्मनि पौराणिकंचसंपूज्यगन्धवस्त्रादिभिःशुभैः शृण्वन्तिच
कथांभक्त्यानदरिद्रानपापिनः कथायांकीर्त्यमानायांयेगच्छन्त्यन्यतोनराः भोगान्तरेप्रणश्यन्तितेषांदाराश्चसं
पदः २० उच्चासनसमारोहेनरकेप्रणतोनवेत् विषवृक्षस्तथास्वापेवनेअजगरोभवेत् कथायांकीर्त्यमानायांविघ्नं
कुर्वन्तियेनराः कोट्यब्दंनरकान्भुक्त्वाभवन्तिग्रामशूकराः येश्रावयन्तिमनुजाःकथांपौराणिकीशुभाम् कल्प
कोटिशतंसाग्रंतिष्ठन्तिब्रह्मणःपदे आसनार्थंप्रयच्छन्तिपुराणज्ञस्ययेनराः कंबलाजिनवासांसिमञ्चंफलकमेव
वा परिधानीयवस्त्राणिप्रयच्छन्तिचयेनराः भूषणादिचयच्छन्तिवसेयुर्ब्रह्मणःपदे २५ वाचकेपरितुष्टेतुतुष्टाःस्युः
सर्वदेवताः अतस्तंतोषयेद्भक्त्याभक्तिश्रद्धान्वितःप्रभुः तस्यपुण्यफलंपूर्णंभवत्येवनसंशयः यत्फलंसर्वयज्ञेषु
सर्वदानेषुयत्फलम् सकृत्पुराणश्रवणात्तत्फलंविन्दतेनरः कलौयुगेविशेषेणपुराणश्रवणादृते नास्तिधर्मः
परःपुंसांनास्तिमुक्तिपथःपरः पुराणश्रवणाद्विष्णोर्नास्तिसंकीर्तनात्परम् यएतदूर्जमाहात्म्यंशृणुयाच्छ्रावयेद श्रीः
पि सतीर्थराजबदरीगमनस्यफलंलभेत् ३० सर्वरोगापहंसर्वपापनाशकरंशुभम् धनधान्यकरंमुक्तेर्निदानंका ४०

२६
क·मा· र्तिकव्रतम् विष्णुप्रीतिकरंनानाविन्तितार्थफलप्रदम् यःकरोतिनरोभक्त्यातस्यपुण्यफलंमहत् ३२ रोगापहंपा
तकनाशकंत्परंसद्बुद्धिदंपुत्रधनादिसाधनम् मुक्तेर्निदानंनहिकार्तिकव्रताद्विष्णुप्रियादन्यदिहास्तिभूतले ३३
२ विष्णुप्रियंसकलकल्मषनाशनंचसत्पुत्रपौत्रधनधान्यविवृद्धिकारि ऊर्ज्जव्रतंसनियमंकुरुतेमनुष्यःकिंतस्य
तीर्थपरिशीलनसेवयास्यात् ३४ ॥ ॥ इतिश्रीसनत्कुमारसंहितायांकार्तिकमहात्म्येपुराणश्र
वणमहिमानुवर्णनंनामषड्विंशोध्यायः २६ ॥ ॥ समाप्तश्चायंग्रन्थः॥ ॥परमात्माप्रीतोस्तु

श्रीः
४९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पु

भ्यः प्रेतेभ्य एवाथतमस्थितिभ्यः॥ ॥पुरायसंञ्चये॥ ॥पितृपक्षेन्नदानेनज्येष्ठाषाढे च वारितः॥ कार्त्तिकेनतूलंपुंसां पर
दीपप्रबोधनात्॥ बोधनात्परदीपस्य वैकुण्ठवानाव्यसेवनात्॥ कार्त्तिके फलमाप्नोति राजसूयाश्वमेधयोः॥ अन्नद
नंगवांग्रासो वैकुण्ठेवैः सहसंकथा॥ बोधनंपरदीपस्य धर्म्मायुः श्रीयशस्करं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रोषसमये दीपान्दद्यान्मनोरमान्॥ तुलविष्णुशिवादीनां भवनेषु मठेषु च॥ ॥व्यासे॥ ॥अमावास्याचतुर्दश्योः प्रदो
षे दीपदानतः॥ यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः॥ ॥नारदीयेपि॥ ॥कार्त्तिके विष्णुमूर्त्यग्रे दीपदानं
दिवं व्रजेत्॥ ॥वृहन्नारदीये॥ ॥अखण्डदीपं यः कुर्याद्विष्णोर्वा शङ्करस्य च॥ दिने दिनेश्वमेधस्य फलमा
प्नोत्यनुत्तमम्॥ ॥पुष्करपुराणे॥ ॥तुलायां तिलतैलेन सायंकाले समागते॥ आकाशदीपं यो दद्यान्मासमे
कं हरिं प्रति॥ महतीं श्रियमाप्नोति रूपसौभाग्यसंपदम्॥ ॥तद्विधिस्तु हेमाद्रौ आदित्यपुराणे॥ ॥दिवा
करे त्वाचलमौलिभूते गृहाद्दूरे पुरुषप्रमाणम्॥ यूपाकृतिं यज्ञियवृक्षदारुमारोप्य भूमावथ तस्य मू
र्ध्नि॥ कृत्वा च तस्याष्टदलाकृतिं तु याभिर्भवेदष्टदिशानुसारि॥ तत्कर्णिकायां तु महाप्रकाशो दीपः प्रदे
यो दलगास्तथाष्टौ॥ निवेद्य धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराजे॥ प्रजापतिभ्यः स्वथ सत्पितृ

वा विप्रमुख्येभ्यो दानं दद्यात्स्वशक्तितः॥ उपवासफलं तेन समग्रं समवाप्न्यात्॥ तत्र भोजनदाने सोपि तत्स्मरणाद्देवनरणं देवनस्पतिः॥
द्रव्यदाने पवासस्य फलं प्राप्नोत्यसंशयम्॥ कर्त्ताननदद्वाप्नोनात्र कार्य्यो विचारणा॥ घृणायावान्यमुद्दिश्य परकादश्यामुपोषि
तः॥ यमुद्दिश्य कृतं विप्रास्तस्य पूर्णं कृतं भवेत्॥ ॥अत्र विशेषमाह त्रिकाण्डमण्डनः॥ काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्ति
के वसः॥ काम्येष्वप्युपक्रमादूर्ध्वं के चित्प्रतिनिधिं विदुः॥ नस्यात्प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु॥ सदेशकालयोर्नास्ति
नारणेरग्निरेव सा॥ नाप्यप्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्॥ ॥हिरण्यकेशिसूत्रेपि॥ ॥नस्वामित्वस्य भार्य्याया पुत्रस
त्रस्य देशस्य कालस्याग्नेर्देवतायाः कर्मणः शब्दस्य च प्रतिनिधिर्विद्यते इति॥ ॥इति श्रीमीमांसकनीलकण्ठात्मजशंकर
भट्टकृतौ व्रतार्के ब्रनेस्तत कादिनिर्णयः॥ ॥

पुराणं पञ्चतु शतं प्राहुर्मुनयः पारदर्शिनः॥ ॥हेमाद्रौ कात्यायनः॥ ॥पितृमातृभ्रातृपत्नीगुर्वर्थे च विशेषतः॥ उपवासं प्रकुर्वाणः
पुराणं पञ्चशतं गुणं लभेत्॥ दक्षिणामात्रदानं प्रागुक्तं हि नाहिंसा॥ ॥मदनरत्ने प्रभासखण्डे॥ ॥भर्त्ता पुत्रः पुरोधाश्च
भ्राता पत्नी सखापि वा॥ यात्रायां धर्मकार्येषु कर्त्तव्याः प्रतिहस्तकाः॥ एभिः कृतं महादेवि स्वयमेव कृतं भवेत्॥ स्वयं
कर्त्तुमशक्तश्चेत् कारयेत् पुरोधसा॥ स्कन्दस्य बालकाः प्रतिनिधिरुक्तः॥ जपस्तोत्रार्थसेवाग्रहस्य मन्त्रसाधनम्॥ वि
प्रैः संपादितं यस्य संपन्नं तस्य तस्य तत्फलम्॥ इति मरीचिवचनात्॥ यत्तु निर्णयसिन्धावुक्तं प्रथमादीनां कृच्छ्रसं
भवान्नेदं वचनं बालस्य शरीरप्रतिनिधिपरम्॥ किन्तु संपूर्णतावाचनपरमिति तन्न॥ प्राप्यमात्रस्य कृच्छ्रसंभवेऽपि जपादी
नां संभवेन तद्विषये सकोऽशायोगात्॥ एतद्वचनस्य प्रतिनिधिप्रकरणे पाठेन संपूर्णतावाचनपरत्वायोगाच्च॥ ॥हे
माद्रौ कात्यायनः॥ पुरोधा सुक्षत्रियो वा द्वयोः सममिति स्थितम्॥ उपवासफलं ताभ्यां समग्रं समवाप्यते॥ ॥
वायुपुराणे॥ उपवासे त्वशक्तस्तु आहिताग्निरथापि वा॥ पुत्रान्वा कारयेदाशु ब्राह्मणान्वापि कारयेत्॥ अथ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथव्रतेसूतकादिनिर्णयः॥ ॥तत्र गर्भवत्यासौचयोः सर्वस्मात्तु कर्म्मनिवृत्तिः॥ सूतके च समुत्पन्ने ज्वरके म्मां रोगे मैथुने॥ क्षौ
रे तथा वान्ते निस्सकर्म्माणि संत्यजेत्॥ द्वेवेधुंके त्वजीर्णे च नैव भुक्त्वापि किञ्चन॥ कर्म कुर्यान्नरो नित्यं सूतके मृतके नथेति॥ वं
कालिकापुराणात्॥ गोडस्तु॥ क्षताशौचादावपि तामाहुः पठन्ति च॥ जातमृतकेऽजाते नित्यं कर्म्म न चाचरेत्॥ गर्भिणी स्मृति
कादिस्थकुमारी वाथरोगिणी॥ यदाशुद्धा तदान्येन कारयेत्स्वयं ता स्वयम्॥ ॥पुरुषेऽप्येषविधिः॥ ॥लिङ्गस्याविवक्षितत्वात्
यस्मिन्व्रते यत्पूजाद्युक्तं तदप्यन्येन कारयेत्॥ शारीरनियमान्स्वयं कुर्य्यादिति॥ शुद्धितत्वे विष्णुः॥ बहुकालिकसंयोगगृ
हीतश्च पुमान्यदि॥ सूतके मृतके चैव व्रतं तन्नैव दुष्यति॥ एतत्काम्यपरं नित्यं त्वनारब्धमपि गौडाः॥ ॥मदनरत्ने॥ पूर्व
संकल्पितं यच्च व्रतं सुनियतव्रतैः॥ तत्कर्तव्यं नरैः शौचं दानार्चनविवर्जितम्॥ ॥माधवीये कौर्म्मे॥ काम्योपवासे प्रक्रां
ते त्वन्तरा मृतसूतके॥ तत्र काम्यव्रतं कुर्य्याद्दानार्चनविवर्जितम्॥ ॥सत्यव्रतः॥ ॥प्रारब्धदीर्घतपसां नारीणां य
स्यस्माद्दु द्रजो भवेत्॥ न तत्रापि व्रतस्यास्य वोपरोधः कथञ्चन॥ ॥सत्यव्रतः॥ ॥प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृ॰ ग

तत्प्रतिनिधिनाकारयेदितिएतत्परम्॥ ॥तदुक्तं मदनरत्ने मात्स्ये॥ ॥अनन्तरात्तुरजो योगपूजामन्येन कारयेदिति॥ ॥प्रतिनि

१ धिश्च निर्णयामृते पैठीनसिः॥ ॥नोक्ता भार्यापत्युः व्रतं कुर्याद्भार्यायाश्च पतिव्रतम्॥ असामर्थ्ये परस्ताभ्यां व्रतभङ्गो न जायते॥

॥कालतत्त्वविवेचने ब्रह्मवैवर्ते॥ ॥उपवाससमर्थश्चेदेकं विप्रं तु भोजयेत्॥ तावद्धनादिकाद द्याद्यद्भक्ताद्द्विगुणं भवेत्॥

सहस्रसंमितां देवी जपेद्वा प्राणसंयमान्॥ कुर्याद्द्वादशसंख्याकान्यथाशक्ति वरेन्नरस्तिति॥ राजपस्यक्षत्रियार्थे वरएका

दश्यामुपोषितः॥ पुरोधाः क्षत्रियस्यार्द्धं फलं प्राप्नोति निश्चितम्॥ पितामहा[illegible]दीनुद्दिश्यएकादश्यामुपोषिते॥ सुतेन तु

तत्फलं विप्राः समग्रं समवाप्नयुः॥ कर्त्रादशगुणं पुण्यं प्राप्नोत्यत्र न संशयः॥ यमुद्दिश्य कृतं सोऽपि संपूर्णं फलमाप्नुयात्॥

स्कान्देऽपि॥ ॥पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा॥ एषामभावे एवान्यं ब्राह्मणं वा नियोजयेत्॥ तथा॥ भ्रातरं भगि

नीं शिष्यं कारयेद्वालपालदिभीतिहेमाद्रौ वाराहपुराणे॥ ॥असामर्थ्ये शरीरस्य व्रते तु समुपस्थिते॥ कारयेद्धर्मपत् ए ग

नीं वा पुत्रं वा नियमान्वितम्॥ भगिनीं भ्रातरं वापि व्रतमस्य न लुप्यते॥ ॥माधवीयेत्तत्पत्तरेऽपि॥ ॥पितृमातृपितृभ्रा

तृश्वश्रूगुर्वादिभूभुजाम्॥ अष्ट[illegible]र्थमुपोषित्वा तु स्वयं च फलभाग्भवेत्॥ नारी च पतिमुद्दिश्य एकादश्यामुपोषितः॥ १

तैलाभ्यङ्गमभोजनम्॥ रत्यौषधपरान्नञ्च श्राद्धहस्तत्त्वर्जयेत्॥ विष्णुरहस्ये॥ श्राद्धोपवासदिवसे खादित्वा दन्तधा
वनम्॥ गायत्र्याशतसंपूतमंबुप्राश्य विशुध्यति॥ पुनर्भोजनमध्वानं यानमायासमैथुनम्॥ दानं प्रतिग्रहो
होमः श्राद्धभुक्त्वष्ट वर्जयेत्॥ ॥वशिष्ठः॥ ॥अलभ्ययोगाः॥ श्रवणाश्विधनिष्ठाद्रा नागदैवतमस्तके॥ यद्य
मा रविवारेण व्यतिपातः स उच्यते॥ नागदैवतमश्लेषा॥ मस्तकं मृगशिरः॥ ॥विष्णुपुराणे॥ अमावास्या यदा
मैत्रविशाखास्वातियोगिनी॥ श्राद्धैः पितृगणास्तृप्तिं संप्राप्नोत्यष्टवार्षिकीम्॥ मैत्रमनुराधा॥ तत्रैवामा
वास्या यदा पुष्ये रौद्रे वर्क्षे पुनर्वसौ॥ द्वादशाब्दीं तदा तृप्तिं प्रयान्ति पितरोऽर्चिताः॥ रौद्रर्क्षमार्द्रा॥ वासवाजै
कपादर्क्षे पितॄणां तृप्तिमिच्छताम्॥ वारुणे वाथ वा स्याद्देवानामपि दुर्लभा॥ वासवर्क्षं धनिष्ठा॥
अजैकपादर्क्षं पूर्वाभाद्रपदा॥ वारुणं शतभिषा॥ माघासितं पञ्चदश्यां कदाचिदुपैति योगं यदि वारुणे
न॥ ऋक्षेण कालः स परः पितॄणां न ह्यल्पपुण्यैर्नृप लभ्यते सौ॥ तत्रैव चेद्भाद्रपदासु पूर्वाः काले त
था यः क्रियते पितृभ्यः॥ श्राद्धं परां तृप्तिमयातु पुंवन्नि युगात्सहस्रं पितरस्वपन्तेन॥ ॥महाभारते॥ ॥नाचीमा

॥२॥ वास्यां प्रक्रम्य ॥ कालेऽथ निष्ठायां दिनामतस्मिन्भानुभूपालनदापितृभ्यः ॥ दत्तं जलान्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्म-
नुष्यैः ॥ रविवारयुक्तायाममावास्यायां श्रवणादिनक्षत्रयोगेन हापकेलो व्यतिपातयोगः ॥ ॥ तदुक्तं मगभास्करे ॥ श्रवणा-
श्विधनिष्ठार्द्रानागदैवतमापत्तन्मां पतेत् ॥ रविवारयुतामायां व्यतिपातः स उच्यते ॥ नागदैवतमश्लेषा ॥ मगभा-
स्कर एव ॥ ॥ अमार्कपातश्रवणैर्युक्ता चेत्पुष्यमाघयोः ॥ अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः ॥ पौषस्य
माघस्य ममावास्या यदा दिव्यवारश्रवणव्यतीपातयुक्ता तदार्धोदयाख्यो योगो भवतीत्यर्थः ॥ मरव ॥ अमावा- गो५
स्यानु सोमेन सप्तमी भानुना सह ॥ चतुर्थी भूमिपुत्रेण सोमपुत्रेण वाष्टमी ॥ चतस्रः तिथयस्त्वेताः सूर्य-
ग्रहणसन्निभाः स्मृताः ॥ ॥ शातातपः ॥ ॥ अमावास्यां भवेद्वारो यदा भूमिसुतस्य वै ॥ जाह्नवीस्नानमात्रे- ल्लः
णैव गोसहस्रफलं भवेत् ॥ ॥ स एवाह ॥ ॥ अमावास्या सोमवारेण सूर्यवारेण सप्तमी ॥ अङ्गारकदि-
नेऽप्येषा चतुर्थी वा चतुर्दशी ॥ तत्र यत्कुरुते कर्म शुभं वा यदि वाशुभम् ॥ षष्टिवर्षसहस्राणि तत्तत्फलमन- ॥२॥
श्नुते ॥ ॥ व्यासः ॥ ॥ सिनीवाली कुहूर्वापि यदि सोमदिने भवेत् ॥ गोसहस्रफलं दद्यात्स्नानं वै मौनिना

दर्शे नियमाः॥ ॥दर्शे स्नानं गयाश्राद्धं तिलैः कृष्णैस्तु तर्प्पणम्॥ न जीवत्पितृकः कुर्य्यात् क्षुरकर्म्म चापरपाजिकम्॥
संकल्पपूर्वकं दर्शनिमित्तस्नाननिषेधः॥ अस्नातस्य सर्वकर्माणि न हन्यात्॥ तत्रापि व्यतीपातादिसंभवे निषे
धो नास्ति॥ ॥यदुक्तम्॥ दर्शे स्नानं न कुर्वीत मातापित्रोस्तु जीवितोः॥ न वस्त्रागुन वेत्तत्र निमित्तापरसंभवः॥
कालिकापुराणे॥ ॥दर्शे स्नानं गयाश्राद्धं तिलतर्पणमेव च॥ न जीवत्पितृको भूप कुर्य्यात् कृत्वा यमाप्नु
यात्॥ ॥विश्वरूपनिर्णये॥ ॥नातिक्रमेत्तु कुकालं कुत्रप्राप्य विशेषतः॥ महान्तं कुरुते यस्तु स्नानं
येत्वित्यघातः॥ ॥स्मृतिकुत्राक्षोपादानेन दर्शश्राद्धं निरग्नैरपि नित्यमिति केचित्॥ ॥काम्ये च॥ ॥दर्शे
स्नात्वापि तर्प्यपश्च दद्यात्तु कृष्णतिलोदकम्॥ अन्ने च विधिवद्दत्वा संततिः स्नानवर्जितः इति फलश्रवणात्
व कुजल्पं परान्नं च रात्रौ भोजनमैथुने॥ क्षौरं सं तैलं तिलापिष्टं नमावास्यां विवर्जयेत्॥ ॥तथा॥ सू
र्य्येन्दु युगते चन्द्रे परान्नं यो हि भक्षयेत्॥ तस्य मासकृतं पुण्यं यस्यान्नं तस्य तद्भवेत्॥ वनस्पति गते
सोमे यस्तु छिंद्याद्वनस्पतिम्॥ पत्रे पत्रे भवेत्तस्य संपूर्णमुपपातकम्॥ अमावास्य पुनः छिंद्याकुशां

॥३॥ ष्वसमित्तथा॥ व्रतयज्ञादिकार्य्यं पुवतस्यधर्म्मकर्म्मणि॥ नाश्नीयान्नमन्यस्य यस्यान्नं तस्य तद्भवेत्॥ यस्तु हिंस्याद्वन
सर्वदावास्थिते हौमे हिंसायां ब्रह्महा भवेत्॥ वनस्थगते सोमेऽनडुहो यस्तु वाहयेत्॥ घोरायां भ्रूणहत्या स्पतिम् २
यां पुज्यते नात्र संशयः॥ स्नानं चित्ते धादि व्यतिरेकेण॥ वनस्पतिगते सोमेऽनडुहो यस्तु वाहयेत्॥ नाश्न
न्ति पितरस्तस्य दशवर्षाणि पञ्च च॥ वनस्पतिगते सोमे मन्थानं यस्तु कारयेत्॥ गावस्तस्य विनश्यन्ति चि
रकालमुपस्थिताः॥ वनस्पतिगते सोमे यो भक्षेद्दन्तधावनम्॥ चन्द्रमा भक्षितस्तेन पितृवंशस्य घात
कः॥ वनस्पतिगते सोमे परान्नं यस्तु भक्षति॥ तस्य मासकृतं पुण्यं दातारमधिगच्छति॥ वनस्पतिगते
सोमे स्त्रियं वै योऽधिगच्छति॥ स्वर्गस्थापि तरस्तस्य च्यवन्ते नात्र संशयः॥ वनस्पतिगते सोमे धेनुर्यस्य
प्रसूयते॥ अभुंजायते तस्य यस्य सा गृहमागता॥ वनस्पतिगते सोमे संध्यायां पर्वतो मुखी॥ रामः
गजच्छायापि सा प्रोक्ता पितृणां दत्तमक्षयम्॥ देवार्थे तुलसी पुष्प होमार्थे समिधः क्रमात्॥ इं ३ ॥३॥

म

यत्तु श्राद्धकाशिकायाम्॥ पुराणसमुच्चये॥ ॥स्नात्वा तु रुधिरस्नानं विप्रश्च्युक्रमाचरेत्॥ एकं द्वे त्रीणि वावि
घ्नं दिवा निवर्जयेदिति तन्निर्मूलम्॥ ॥पृथ्वीचन्द्रोदये यमः॥ ॥पुनर्भोजनमध्वानं भाराध्ययनमैथुन
म्॥ संध्यां प्रतिग्रहं होमं श्राद्धभोक्ताष्ट वर्जयेत्॥ संध्यानिषेधः प्रायश्चित्तात्मकं ज्ञेयम्॥ ॥यथाह ग्वाना॥
दश कृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः॥ ततः संध्यामुपासीत जपेद्वा जुहुयादपि॥ गौडास्तु॥ सा
यं संध्यां परान्नं च छेदनं च वनस्पतेः॥ अमावास्यां न कुर्वीत रात्रिभोजनमेव च॥ एतं च कल्पतरौ व
सायं संध्यां दिवाशयम्॥ श्राद्धकर्त्ता च भोक्ता च पुनर्भोजनं च वर्जयेदिति कामधेनौ वराहपुराणे॥ कर्त्तुर
पि सायं संध्यानिषेधमाह॥ ॥स्मृत्यष्टासु तु निर्मूलमाह॥ होमनिषेधस्तु स्वविषये॥ सत्रके च प्रवासेत
था श्राद्धभोजने॥ एवमादिनिमित्तेषु हावयेन्न तु हापयेदिति छन्दोगपरिशिष्टात्॥ तत्रैवादित्यपुरा
णे॥ ॥निमन्त्रितस्तु न श्राद्धं कुर्याद्भुक्त्वाध्यापि ताडनम्॥ ॥वन्हिवायाडपेता॥ श्राद्धभुक् प्रातरुत्थाय प्रकु
र्याद्दन्तधावनम्॥ श्राद्धकर्त्ता न कुर्वीत दन्तानां धावनं बुधः॥ ॥हेमाद्रौ जाबालः॥ ॥दन्तधावनताम्बूल
× छादर्णपक्षयोरन्ते संध्या नौ श्राद्धवासरे॥ सायंसंध्यां न कुर्वीत कृते तु पितृहा भवेत्॥ ६

॥१॥ लोपेनदुष्यन्तिगवार्थेवयथातृणम्॥ त्रिमुहूर्त्तंवदेकेत्रिमुहूर्त्तंजलेवसेत्॥ त्रिमुहूर्त्तंवसेज्जोष्ठेत्रिमुहू
र्त्तंत्रिमुहूर्त्तंवनस्पतौ॥ ॥शंखः॥ ॥निमंत्रितस्तुयःश्राद्धेमैथुनंसेवतेद्विजः॥ श्राद्धंदत्वाचभुक्त्वाचपुमान्
स्यान्मद्यतेनसा॥ मैथुनंवकर्त्तावापिनिसिद्धम्॥ ॥ऋतुकालेनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित्॥
तत्रगच्छन्नवाप्नोतिह्यरिष्टानिफलानिच॥ तत्रैवमाधवीयेवृहन्मनुः॥ श्राद्धंकरिष्यन्कृत्वा
भुक्त्वाचापिनिमंत्रितः॥ उपोष्यचतथाभुक्त्वानोपेयाद्वकर्त्तावपि॥ भोक्ष्यन्करिष्यंश्चश्राद्धप्रवरा
श्रोप्रयत्नतः॥ व्यवायंभोजनंवापिकर्त्तावपिविवर्जयेत्॥ इतितत्रैवाश्वलायनोक्तेः॥ ॥विज्ञाने
श्वरेयत्तुश्राद्धेकर्त्तागच्छतोपिनदोषइत्युक्तम्॥ ॥तत्स्वगातिकत्वेज्ञेयम्॥ ॥वृहस्पतिः॥ ॥द्विर्निशांब्र
लचारित्स्याच्छ्राद्धकृद्भुक्तयोःसह॥ अन्यथावर्त्तमानौतुस्यातांनिरयगामिनौ॥ पुनर्भोजनमध्वानंभा रा॰म॰
रमायासमैथुनम्॥ श्राद्धकृच्छ्राद्धभुक्चैवसर्वमेतद्विवर्जयेत्॥ स्वाध्यायंकलहंचैवदिवास्वापंतथैवच॥ ॥१॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वै॰ शा
५

यादेविपानीयंप्रतिगृह्यताम्॥ ॥इतिपुनराचमनीयम्॥ अमृतेऽमृतसंभूतेतुलस्यमृतरूपिणि॥ कर्पूरादिस
माप्युक्तंताम्बूलंप्रतिगृह्यताम्॥ ॥इतिताम्बूलम्॥ दक्षिणेदक्षिणेकरे त्वत्क्रतूनांप्रियंकरि॥ करोमि
तेसदाभक्त्याविष्णुकान्तेप्रदक्षिणाम्॥ ॥इतिप्रदक्षिणाम्॥ नमोनमोजगद्धात्र्यैजगद्ध्येनमोनमः॥
जगदीश्वरि ४ नमोनमोमहद्भूत्यैनमस्तेपरमेश्वरि॥ इतिनमस्कारः॥ प्रसीदमम देवेशिकृपयापरयासदा॥ अभी
ष्टफलसिद्ध्यर्थंकुरुमेमाधवप्रिये॥ ॥इतिप्रार्थना॥ इत्येवमर्चयेन्नित्यंप्रातरेवशुचिर्नरः॥ म
फे [redacted] वाथसायाह्ने [redacted] वाथसायांपूजयेत्प्रयतोनरः॥ सर्वेषुवारेष्वथवा कार्तिकमासे विशेषतः॥ पूजयेत्तुलसींदेवीम
पुत्रपुत्रफलपायसेः॥ एकादशीयदास्यात्तदापोष्यव्रतीनरः॥ तद्रात्रावेवकुर्वीततुलसीपूजनंसदा॥
इदंतुतुलसीपूजामहात्म्यंश्रृणुयान्नरः॥ सकृद्वायःपठेन्नित्यंसगच्छेद्वैष्णवंपदम्॥

५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीर्थमयाकारे-

इतिपाद्यम्॥ सर्वकामप्रदे देवि सर्वांगमनिषेविते॥ इदमर्घ्यं गृहाणेदं देवि देत्यान्तकप्रिये॥ ॥इत्यर्घ्यम्॥ सर्वलो
कस्य रक्षार्थे सदा सन्निधिकारिणि॥ गृहाण तुलसि प्रीत्या इदमाचमनीयकम्॥ ॥इत्याचमनीयकम्॥ गङ्गादिभ्यो
नदीभ्यश्च समानीतमिदं जलम्॥ स्नानार्थं तुलसि स्वच्छं प्रीत्या त्वं प्रतिगृह्यताम्॥ ॥इति स्नानम्॥ क्षीरोदमथनो
द्भूते चन्द्रलक्ष्मीसहोदरे॥ गृह्यतां परिधानार्थमिदं क्षौमाम्बरं शुभम्॥ ॥इति वस्त्रम्॥ श्रीगन्धं कुङ्कुमं दिव्यं कर्पूरागरुसं
युतम्॥ कल्पितं ते महादेवि प्रीत्यर्थं प्रतिगृह्यताम्॥ ॥इति गन्धम्॥ नीलोत्पलं सुकह्लारमालत्यादि निशोभने॥ पद्मा
दीनि सुगन्धानि पुष्पाणि प्रतिगृह्यताम्॥ ॥इति पुष्पम्॥ धूपं गृहाण देवेशि मनोहारि सुगुग्गुलम्॥ आज्ययुक्तं
तु तुलसि भक्त्याभीष्टप्रदायिनि॥ ॥इति धूपम्॥ अज्ञानतिमिरान्धस्य ज्ञानदीपप्रदायिनि॥ त्वया तु तुल
सि प्रीत्या दीपोयं प्रतिगृह्यताम्॥ ॥इति दीपम्॥ नमस्ते जगतां नाथ प्राणिनां प्रियदर्शने॥ यथाशक्त्या
मया दत्तं नैवेद्यं देवि गृह्यताम्॥ ॥इति नैवेद्यम्॥ नमो भगवति श्रेष्ठे नारायणि जगन्मये॥ तुलसि त्वं

कलप्रदे-

श्रीखण्डचन्द

नं ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कुष्माण्डनवम्यां तद्दानविधिः॥ ॥तत्र कार्त्तिकशुक्लनवम्यां विष्णुपूजापूर्वकं कूष्माण्डदानम्॥ ॥तत्र प्रातः
स्नानं विधाय धौतेवाससी परिधाय गृहं पादौ प्रक्षाल्याचम्य नित्यं कृत्वा॥ इष्टदेवतां संस्मृत्य विष्णुपूजां कुर्यात्॥ ॥
ॐ अद्येत्यादिदेशकालौ संस्मृत्य मम इह जन्मनि सशैलवनकाननससागरां तभूदानजन्यफलप्राप्तिकामनया श्रीदामो
दरप्रीतये विष्णुपूजनमहं करिष्ये॥ इति संकल्प्य॥ ॥नमोऽस्त्वनन्तायेति दीपं संपूज्य॥ ततः कलशपूजा॥ गणेशं संपू
ज्य॥ ॐ विष्णवे नमः॥ विष्णुमावाहयामि इत्यावाह्य॥ दामोदराय नमः आसनं समर्पयामि॥ पुण्डरीकाक्षाय नमः पाद्यं सम
र्पयामि॥ ॐ मत्स्याकाराय नमः स्नानीयं समर्पयामि॥ ॐ स्वयंभुवे नमः आचमनीयं समर्पयामि॥ ॐ वैकुण्ठनाथाय नमः अ
र्घ्यं समर्पयामि॥ ॐ विश्वयोनये नमः चन्दनं समर्पयामि॥ ॐ गोपीहृदयाय नमः तुलसीदलं समर्पयामि॥ ॥एवं बहु पु
ष्पफलाक्षतैः संपूज्य कर्पूरयुतं सुगंधितिलकं दत्वा धूपदीपादिकं कृत्वा॥ ॥ॐ पुण्डरीकाक्षाय नमः उपायनं॥ हि
रण्यपतिमंत्रेण· ततः आदर्शनं प्रदर्श्य नैवेद्यादि दद्यात्॥ लवंग वासी पक्वान्नं जीरकं शुण्ठि पिप्पली॥ मरीचं॥ दाडिमीफलं
निंबूफलं॥ हरिद्रां॥ तित्तिरीयुतं कुष्माण्डं श्रीकृष्णप्रीतये दद्यात्॥ ततः कूष्माण्डदानं॥ कूष्माण्डं त्वपिं च रत्नयुतं सहिरण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कू॰दा॰ ॥

वकृत्वा॥ पंचरत्नसुताय सहिरण्याय कूष्माण्डाय नमः॥ ॐ ब्राह्मणाय नमः इति वेदब्राह्मणौ त्रिः संपूज्य कुशतिलजलान्यादा
य॥ ॐ अद्येत्यादि कल्पुक्तफलार्थं॥ सूर्य्यग्रहणकालकुरुक्षेत्रतुलादानफल· ग्रहणसमयरेवातीर्थब्रह्माण्डदानफल· प्रय
गकाशीकान्त्यवंतिकाकौशिकीकोशलामायायमुनानर्मदाकेदारपुष्करगंगापूकरक्षेत्रफल्गुसंरोधारवारहतीर्थयात्रावि
शुद्धियमलोकगमनाभावसर्वलोकगमनस्वेच्छापर्यटनकामनया अमुं कूष्माण्डं पंचरत्नयुक्तं अमुकगोत्राय ब्राह्मणाय तु
भ्यमहं संप्रददे॥ ब्रह्महत्यादिपापानां नाशनं निर्मितं पुरा॥ कूष्माण्डं वहुवीजाढ्यमतः शान्तिप्रयच्छ मे॥ अथोक्तताप्रीयतामि
तिदद्यात्॥ कृतैतत्सोपस्कर कूष्माण्डदानसांगतासिध्यर्थं दक्षिणां हिरण्यं कूष्माण्डविष्णुदैवतं यथानामगोत्राय ब्राह्मणाय ॥ राम॰ ॥
संप्रददे इति॥ ॥अथ दक्षिणा॥ अद्येत्यादि कूष्माण्डदानप्रतिष्ठासांगतासिध्यर्थं दक्षिणां रजतं चन्द्रदैवतं यथानामगोत्रा ॥ ७ ॥
येत्यादि॥ ॥इति कार्त्तिकशुक्लनवम्यां कूष्माण्डदानविधिः संपूर्णसमाप्तिमगमत्॥ ॥श्रीवासुदेवप्रीतये नमः॥

Nepal Sanskrit University, Patan

अथवैशाखस्नानविधिर्लिख्यते॥ ॥पूर्वेद्युर्नद्यादौगत्वास्नानंविधायगृहमागत्य॥ विष्णुंसंप्रार्थ्य॥ अर्घ्यंसंस्थाप्य॥ प्राणानायम्य· ४ति२
संकल्पंकुर्यात्॥ ॐ तत्सत् ॐ विष्णुः ॐ नमःपुराणपुरुषोत्तमायेत्यादिपूर्वकमुच्चार्याद्येहेत्यादिस्वपुराणोक्त
फलावाप्तयेकायिकवाचिकमानसिकसकलपापक्षयपूर्वकंश्रीमन्मधुसूदनप्रीतयेप्रातर्मयाहंस्नानपूर्वकं
विष्णुपूजनेनमेषसंक्रान्तिमारभ्यवृषसंक्रान्तिपर्यन्तमेकादशीमारभ्यैकादशीपर्यन्तंपौर्णमासीमारभ्यपौर्णमासीप
र्यन्तंवैशाखस्नानमहंकरिष्ये इति संकल्प्य॥ ततोव्रतस्वीकारमन्त्रः॥ इदंव्रतंमयादेवगृहीतंपुरतस्तव॥ निर्वि
उ घ्नंसिद्धिमायातुप्रसादान्मधुसूदन॥१॥ अज्ञानतिमिरान्धस्यज्ञानेनानेनकेशव। प्रसीदसुमुखोभूत्वाज्ञानदृष्टि
प्रदोभव॥२॥ गृहीतेस्मिन्व्रतेदेवयद्यपूर्णेम्रियाम्यहम्॥ तन्मेभवतुसम्पूर्णंप्रसादान्मधुसूदन॥३॥ इतिव्रत
स्वीकारमन्त्रः॥ ततःस्नानंकृत्वापठेत्॥ प्रातःसनियमःस्नानेप्रीयतांमधुसूदनः॥ मधुहन्तुप्रसादेनब्राह्मणानांप्रसु
खदान्॥ निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहम्॥ माधवेमेषगेभानौमुरारेमधुसूदन॥ प्रातःस्नानेनमेनाथ
फलदोभवपापहा॥४॥ ततःसुवर्णप्रतिमांविधायपञ्चामृतैःसंस्नाप्य॥ तद्यथा॥ देवेशदेववन्दितनाथधेनुःसर्वपापप्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वै. शा

णमिनी॥ त्वत्तक्षीरस्नापितो देवो नित्यमेव वरदो भव॥१॥ इति क्षीरम्॥ कामतो कामतो वापि यन्मया दुष्कृतं कृतम्॥ तत्सर्वं
१ विलयं यातु दधिस्नानेन शोभितः॥२॥ इति दधि॥ रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम्॥ तेन त्वं स्नापितो देव निधिकाति
प्रदो भव॥ इति घृतम्॥ यस्य धारणमात्रेण तृप्यन्ति पितामहाः॥ मधुना स्नापितो देव भिमं शोकहरो भव॥४॥ इति म
धुम्॥ यमलोकभयत्रस्तैः शरणं त्वां गतः शिवः॥ खण्डस्नानेन देवेशं मां कुरुष्व सुखान्वितम्॥५॥ इति शर्करा॥ यस्य दर्श
नमात्रेण मुक्तिः प्राणस्य जीवनम्॥ तेन वोत्तम मेतोयेन स्नातो देहि प्रियं ध्रुवम्॥६॥ इति जलम्॥ अर्घ्यमन्त्रेणार्घ्यं संस्था
प्य॥ शंखमन्त्रेण शंखं संस्थाप्य॥ प्राणानायम्य॥ संकल्पं कुर्यात्॥ ॐ तत्सत् ३ ॐ विष्णुः ३ श्रीमत्पुराणपुरुषोत्तमाय॥
८ कृत्यापूर्वकमुच्चार्य॥ अद्येत्यादि वैशाखे मासि अमुकपक्षेऽमुकतिथौ अमुकगोत्रोत्पन्नोऽमुकराशिरमुकश
र्माहं वैशाखस्नानाङ्गभूतश्रीमधुसूदनस्यार्घ्यदानपूर्वकपूजनं करिष्ये इति संकल्प्य॥ प्रतिष्ठाप्य पूजयेत्॥ अथ
ध्यानम्॥ दक्षिणाधस्तनेकरादारभ्यतः प्रदक्षिणम्॥ शंखचक्राम्बुजगदाविभ्राणं मधुसूदनम्॥ ॐ सहस्रेत्यावाहन
म्॥ ॐ पुरुषएवेति पाद्यम्॥ ॐ त्रिपादूर्ध्व इत्यर्घ्यम्॥ ॐ ततो विराट् इत्याचमनम्॥ तस्माद्यज्ञादिति स्नानम्॥
ॐ तस्माद्यज्ञात्सर्वहुत ऋचः इति वस्त्रम्॥ ॐ तस्मादश्वा इति यज्ञोपवीतम्॥ ॐ तं यज्ञमिति गन्धम्॥ ॐ यत्पुरुषमिति पुष्प १

म्.॥ ॐ धूर्लसरोस्योनिधूपम्.॥ चन्द्रमा मनसोदीपम्.॥ ॐ नाभ्यस्त्रासीनिद्राच मनम्.॥ ॐ यत्पुरुषानि फलम्.॥ ॐ सप्ता
स्यासीराजनम्.॥ ॐ यज्ञेन यज्ञमिति अर्घ्यदानम्.॥ वैशाखे मेषमार्तण्डे स्नातो हं विमले जले.॥ रक्षत्वर्घो मया द
त्तो गृह्यतां मधुसूदन.॥ अनेन विधानेन मासपर्य्यन्तं संपूज्य.॥ तस्मिन्मासान्ते नित्यकर्म समाप्य प्रतिमा संकल्प
दद्यात्.॥ एवं व्रतसंकल्पमुच्चार्य्याद्य हममुको हं यथोक्तफलावाप्तये मासपर्य्यन्तं कृतस्य वैशाख स्नानस्य सांग
फलावाप्त्यर्थं ॐ तत्सच्छ्री मधुसूदनप्रीतये इमां सुपूजितां सौवर्णी श्रीमधुसूदनप्रतिमां सपरिच्छदा
माचार्य्याय संप्रददे.॥ तथा दानप्रतिष्ठासिद्ध्यर्थं सुवर्णं निष्क्रयीभूतं द्रव्यं वा ब्राह्मणाय ददामि.॥ ॐ तत्सन्न मम.॥ ब्रा
ह्मणं संपूज्य प्रतिमां दत्वाभ्युपसीपदत्वा तन्त्रेऽस्वजो दानविधिना गोदानं कुर्य्यात्.॥ व्रतानां व्रतराजेन्द्र इत्य
[illegible] हित्वा ब्राह्मणान्भोजयित्वा पश्चाद्बन्धुभिस्सहितो भुञ्जीत.॥ ॥इति वैशाखस्नानम्.॥ ॥शुभम्.॥
अथ मार्ग[illegible]स्नानविधानम्.॥ ॥प्रातःस्नात्वाऽऽचम्य.॥ भुक्तांवरधरं विष्णुमिति विष्णुमिष्टं संप्रार्थ्य.॥ सङ्कल्पं

वै. प्रा.
२

कुर्य्यात् ॥ ॐ तत्सत् ॐ विष्णुर्नमः परमात्मने पुराणपुरुषोत्तमाय ॥ इत्यादि पूर्वकमुच्चार्य्य ॥ अद्येह श्रुतिस्मृतिपुराणोक्त
सोक्त फलावाप्त्यर्थं कायिकवाचिकमानसिकसकलपापक्षयपूर्वकं ॐ तत्सत् श्रीमत्केशवप्रीत्यर्थं मद्यारभ्य मार्गशीर्षपौ
र्णमासीपर्यन्तमेकभक्तहविष्यान्नेन मार्गशीर्षस्नानमहं करिष्ये ॥ इति सङ्कल्प्य ॥ ततो नियममन्त्रं पठेत् ॥ इ
दं व्रतं मया देव गृहीतं पुरतस्तव ॥ निर्विघ्नां सिद्धिमायातु प्रसादात्तव केशव ॥ इति मन्त्रेण जलमुत्सृजेत् ॥ ततो मध्याह्ने स्ना
नं कृत्वा ॥ केशवप्रतिमां हिमस्य [illegible] रणं कृत्वा ॥ दीपं प्रज्वाल्य ॥ अच्युताय नमः ॥ अनन्ताय नमः ॥ गोविन्दाय नमः
इत्याचम्य ॥ एतन्मन्त्रेण प्रतिमां संस्थाप्य ॥ ॐ भूर्भुवः स्वः केशव इहागच्छ इह तिष्ठ सुप्रतिष्ठितो वरदो भव ॥ प्राणाना
याम्य ॥ संकल्पं कुर्यात् ॥ ॐ तत्सदित्यादि पूर्वकमुच्चार्य्याद्येहामुको हं सकलपापक्षयपूर्वकं यथोक्तफलाप्तये मा
र्गशीर्षस्नानाङ्गभूतं सुवर्णप्रतिमायां केशवस्य पूजनं करिष्ये ॥ इति संकल्प्य ॥ ध्यानम् ॥ दक्षिणोर्ध्वकरात्सव्यान्तं २
शङ्खचक्रगदाम्बुजे ॥ ध्यातव्यः केशवो देवः सर्वचिन्तितफलप्रदः ॥ ॥ इति ध्यात्वा ॥ नाममन्त्रेणावाहनादि नीरा

२

जनान्तं संस्पृज्य॥ ॐ केशवाय नमः॥ आवाहनम्॥ आवाहनम्॥ पाद्यम्॥ स्नानम्॥ सहस्रशीर्षेति॥ वस्त्रम्॥ यज्ञोपवीतम्॥
गन्धम्॥ अक्षता॥ धूपम्॥ दीपम्॥ नैवेद्यम्॥ ताम्बूलम्॥ भूषणानि दत्वा॥ क्षणं ध्यात्वा॥ नीराज्य॥ प्रदक्षिणं कृत्वा॥
पुष्पाञ्जलिं दत्वा॥ अन्येभ्यो पाठादिकं कृत्वा॥ ब्राह्मणान्भोजयित्वा॥ ज्ञातिभिः सह स्वयं भुञ्जीयात्॥ एवं मार्गशीर्षमासं ग
मयेत्॥ पुनः पौर्णीयां नित्यकर्म समाप्य संकल्पं कुर्यात्॥ ॐ तत्सदित्यादिपूर्वकं मुक्षार्थ्यादि हेत्वाधमुकोहं सकलपापक्ष
यपूर्वकं यथोक्तफलावाप्त्यै कार्त्तिकपौर्णमास्यारभ्य मार्गशीर्षपौर्णमासीपर्यन्तमेकभक्त हविष्याशनेन प्रातर्मेध्या
स्नानस्य साङ्गतासिद्ध्यर्थं सुवर्णं यथाम्नायं वा तथा मार्गशीर्षस्नानसाङ्गतासिद्ध्यर्थं यथासंख्यका ब्राह्मणान्भोजयि
ष्ये॥ इति संकल्प्य॥ इमां भूयसीं दक्षिणां ब्राह्मणेभ्यो विभज्य दास्ये॥ इति दत्वा तेषामाशिषं दद्युः॥ अक्षिद गृहीत्वा ब्राह्म
णान्भोजयित्वा स्वयं बन्धुभिः सह भुञ्जीत॥ एतत्कृते यत्तदतुला परामस्तु॥ ॥ इति मार्गशीर्षस्नानविधिः॥ ॥
अथ माघस्नानविधानम्॥ ॥ प्रातः नद्यां तडागे निर्झरे वा स्नानार्थं गत्वा॥ शुक्लाम्बरधरमित्यादिना विघ्नेशं ध्या
त्वा॥ नित्यकर्म विधाय॥ संकल्पं कुर्यात्॥ ॐ विष्णुरित्यादिपूर्वकं माघे इत्यादि॰ अमुकोहं सकलपापक्षयपूर्व

वै॰ धा॰
३

कंस्मृतिस्मृतिपुराणोक्तफलावाप्तयेयथोपमिलितान्नेनमकरसंक्रान्तिमारभ्यकुंभसंक्रान्तिपर्यन्तंश्रीवेणीमाधवप्रीत्यर्थं
माघस्नानमहंकरिष्ये॥इतिसंकल्प॥नियममंत्रः॥माघस्नानंकरिष्यामिमकरस्थेदिवाकरे॥आसमाप्तिमहादेवनिर्विघ्नंकुरु
केशव॥ ॥इतिजलमुत्सृज्यताननामेध्याहृस्नानंकृत्वा॥स्नानमंत्रौ॥दुःखदारिद्र्यनाशायश्रीविष्णोस्तोषणायच॥माघस्नानंकरिष्या
म्यघमाघपापविनाशनम्॥मकरस्थेरवौमाघेगोविन्दाच्युतमाधव॥स्नानेनानेनमेदेवयथोक्तफलदोभव॥माघस्नानंकरिष्यामीतिसू माघमाहात्म्ये ५
र्य्यायार्घ्यदानमंत्रः॥ॐसवित्रेप्रसवित्रेचपरंधामजलेमम॥त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधा॥अथवायुपुराणोक्तस्नानमं
त्रः॥माघमासेत्विदंपुण्यंस्नास्येहंदेवमाधव॥तीर्थस्यास्यजलेनित्यमितिसंकल्प्यचेतसि॥इतिस्नात्वा॥नवेधौतेवाससीपरिधाय॥ स ६
आचम्य॥श्रीमाधवप्रतिमांविधाय॥स्मितस्येत्यग्न्युत्तारणपूर्वकंपञ्चामृतमंत्रैःसंस्नाप्य॥अस्यैप्राणाइतिप्रतिष्ठाप्य॥ॐभूर्भुवः
पुप्रतिष्ठि स्वः॥माधवइहागच्छइहतिष्ठवरदोभव॥दीपंप्रज्वाल्यतंसंपूज्य॥अर्घ्यंमधुपर्कंमंत्रैःसंस्थाप्य॥शंखमंत्रेणशंखंसंस्थाप्य॥प्राणा
नायम्य॥संकल्पंकुर्यात्॥ॐतत्सदित्यादिपूर्वकदेशकालादीन्संकीर्त्यामुकगोत्रोमुकोहंयथोक्तफलावाप्तयेमाघस्नानांगसु
वर्णप्रतिमायांॐतत्सच्छ्रीमाधवस्यपूजनमहंकरिष्ये॥इतिसंकल्प॥अथध्यानम्॥प्रदक्षिणंदक्षिणगाधस्थकरादरस्थं

३

नित्यस्य च॥ गदांशंखं तथा चक्रं पद्मं च बहतिं माधव॥ इति ध्यात्वा॥ नाममंत्रेण ॐ माधवाय नमः॥ इत्यनेन पूजयेत्॥ आवाहनम्॥ आसन
म्॥ पाद्यम्॥ स्नानम्॥ आचमनम्॥ वस्त्रम्॥ गन्धम्॥ पुष्पाणि॥ धूपम्॥ दीपम्॥ नैवेद्यम्॥ ताम्बूलम्॥ भूषणादीनि दत्वा॥ ततः
सफलमर्घ्यं दद्यात्॥ ॐ नमः कमलनाभाय नमस्ते जलशायिने॥ नमस्तेस्तु हृषीकेश गृहाणार्घ्यं नमोस्तुते॥ इत्यर्घ्यं दत्वा॥ नीराजं
पुष्पाञ्जलिं समर्प्य॥ ॥एवं त्रिकालपूजनं सहस्रनामस्तोत्रपाठादिकं कुर्वन्मानेन माघमासे नित्यपूत्॥ ततो कुंभसंक्रान्तौ नित्यक
र्मसमाप्य॥ माघवंसपूजपसंकल्पं कुर्यात्॥ ॐ तत्सदिद्यादि सर्वं देशकालादीन्संकीर्त्य अमुकोहं मकरसंक्रान्त्या
रभ्य कुंभसंक्रान्तिपर्यन्तं कृतस्य माघस्नानाङ्गमाधवपूजासाङ्गफलप्राप्त्यर्थमिमानमुकगोत्रान्सावर्णाश्च माधवप्रीतिमासपरि
ऋदं ब्राह्मणान्यतुभ्यं संप्रददे॥ दानप्रतिष्ठासिद्ध्यर्थं सुवर्णं प्रत्याम्नायं वा॥ तथा माघस्नानस्य सकलफलप्राप्त्यर्थमिमामू
भूयसीं दक्षिणां ब्राह्मणाय ददे॥ यथासंख्यकान्ब्राह्मणान्भोजयिष्ये॥ शक्त्या समलंकृतां सवत्सां गां दद्यात्॥ अ
क्षिंदुग्धी त्वा ब्राह्मणान्भोजयित्वा स्वयं बन्धुभिः भोजयेत्॥ एतस्य तं तत्त्वं मस्यस्ता पूर्णमस्तु इति वदेत्॥ इति माघ
स्नानविधिः॥ ॥अथ कार्तिकस्नानविधिः॥ ॥आश्विनशुक्लैकादश्यां स्नात्वा संकल्पं कुर्यात्॥ ॐ तत्सदद्यादि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दौ· ह्मा
४

पूर्वकमुद्वार्ष्यार्घ्येत्यादिसकलपापक्षयार्थं राधादामोदरयोः प्रीतये ऽर्घ्यदानपूर्वकं मयारब्धकार्त्तिकेपौर्णमासिपर्यन्तं स्नानं करिष्ये
अर्घ्यं दद्यात् तेन मंत्रेण। ॐ नमः कमलनाभाय नमस्ते जलशायिने। नमस्तेऽस्तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते। इत्यर्घ्यं दत्वा स्नाया
यात्। तत्र मंत्रो॥ कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन। प्रीत्यर्थं तव देवेश जलेऽस्मिन् स्नातुमुद्यतः॥ तव प्रसादात् पापं मे दामोद
र विनश्यतु॥ इति स्नात्वा पुनरर्घ्यं दद्यात्॥ नित्ये नैमित्तिके कृष्ण कार्त्तिके पापनाशने। गृहाणार्घ्यं मया दत्तं राधया सहितो हरे।
व्रतिनः कार्त्तिकमासि स्नातस्य विधिवन्मम। गृहाणार्घ्यं मया दत्तं राधया सहितो हरे॥ इति स्नानविधिः॥ ततः सुवर्णप्रतिमायां
पूजनम्॥ दीपं प्रज्वाल्य तत्स्वपूज्य॥ पञ्चामृतमंत्रस्नानं स्नाप्य। अग्न्युत्तारणं संस्थाप्य। तद्वारं संप्रोक्ष्य। प्राणानायम्य। संक
ल्पं कुर्यात्। ॐ तत्सदित्यादि पूर्वं मुद्वार्ष्यार्घ्येत्यादिसकलपापक्षयार्थं श्रीराधादामोदरयोः पूजनं करिष्ये। इति संकल्प्य। ॐ
ते तत्र प्रतिमां प्रतिष्ठाप्य। ध्यायेत्। शंखचक्रगदापद्मधरं दामोदरं हरिं॥ राधाभिधानया लक्ष्म्या सहितं चिन्तये प्रभुं। आवा
हनम्। दामोदर समागच्छ लक्ष्म्या सह जगत्पते। इमां मया कृतां पूजां गृहाण सुरसत्तम। आसनम्। संसारार्णवतारय
धारिमाम्मधुसूदन॥ दामोदर नमस्तेऽस्तु त्रैलोक्यव्यापिने नमः। नाममंत्रेण पाद्यम्। यद्भक्तिलेशसंपर्कात् परमानन्दसंभवः। त
स्मै ते चरणाब्जाय पाद्यं देवाय कल्पये॥ अर्घ्यम्॥ वरेण्यं यज्ञपुरुष प्रजापालनतत्पर। नमो महात्मदेवाय गृहाणा

८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

× तंतिलतैलधारयाऽथिद्धिन्नं वेष्टयित्वासुगन्धचन्दनमाल्यादेभिः सप्ज्यष्टपदीपकर्पूरवर्त्तिकां च हत्वा शिरोप्यरिदूर्वाङ्कुरानि समर्प्य भोज्यमग्रे स्थत्वा.१

× तिभ्रातरभ्रार्थ्यभ्रातायभगिनी वस्त्रालंकारादेभिः संतोसयेदिति॥५

।।भ्रा.पू.।। नंकुर्यात्॥ ॥प्रार्थनामंत्रः॥ त्रयभ्रातमती भ्रातस्त्वया धन्यास्मि मानद। भ्रातस्त्वं वानुजो तो हं भुंक्ष्व भक्तमिदं शुभम्॥ प्रीत

येयमराजस्य यमुनाया विशेषतः॥ कार्त्तिके शुक्लपक्षस्य द्वितीयायां सहोदर॥ यमो यमुनया पूर्वं भोजितः स्वगृहे र्चितः॥ त्रस्मि

न्दिने यमेनात्र नारी वापुरुषोपि वा॥ त्रपविद्धा कर्मपाशैः रवेरुयाये पवंतिहि॥ पापेभ्योविप्रमुख्यास्ते मुक्ता कर्मनिबंधनात्॥

तेषां महोत्सवो ह्यत्रो यमराष्ट्रे सुखावहः॥ तस्माद्धो त्रमजे हे भोजनं कुरु कार्त्तिके॥ ततः भ्राता सूर्याभिमुखो भूत्वा पठनीयो म

न्त्रः॥ ॥यमो निहंता पितृधर्मराजो वैवस्वतो दण्डधरश्च कालः॥ भूताधिपो दत्तकृतानुसारी कृतांतमेतद्दशभिर्जपंति॥ प

× मन्दंमदंई श्चाज्ञोजनं कुर्यात्॥ दक्षिणां च दद्यात्॥ ॥इति भ्रातृपूजापद्धतिः समाप्तिमगमत्॥ ॥शुभम्॥ ॥रामकृष्ण बासु

ई प्रालरोम्ये। अथ वज्रवारण मन्त्राः॥ ॥जैमिनिश्च सुमन्तुश्च वैशंपायन एव च॥ पुलस्त्यः पुलहो विष्णुः ष ।।रामः।।

ष्टैते वज्रवारणाः॥ १॥ मुनेः कल्याणमित्रस्य जैमिनेः श्चापि कीर्त्तनात्॥ विद्युदग्निभयं ।।ई।।

नास्ति लिखिते तु गृहोदरे॥ २॥ कदम्बवृक्षसारस्तु विद्युत्पातनिवारणः॥ विद्युत्पातस्य नो भी

तिर्द्दवराजेति कीर्त्तनात्॥ ३॥ × यस्यां तिथौ यमुनया यमराजदेवः संभोजितः प्रतिपतिः स्विकुसौहृदेन॥ तस्या स्वसुक्षितिथो हि गृहे

भगिन्याः प्राप्नाति वित्तमतुलं विपुलं स वायुः॥ १॥ एवं कुर्वन्ति ये विद्वान्नयांति यमयातनाम्॥

मृत्युमपत्युश्च नाप्नोति सम समस्तां हितास्यथा॥ २॥

× भगिनी त्वेष्टाय दिने दापा ठाद्द नीयः॥ भ्रातस्ववा जात्रा हमि ति.१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ यमद्वितीया सापराह्णव्यापिनी ग्राह्या॥ ऊर्जे शुक्लद्वितीयायामपराह्णेर्चयेद्यमम्॥ इति अपराह्णे यमपूजाविधानात्॥ नव कार्त्तिकशुक्लप्रतिपदि प्रातः नित्यस्नानम्॥ अथ यमद्वितीयायां अमुकगोत्रोहं... नोकार्त्तिके मासि शुक्लपक्षे प्रतिपदि अमुकगोत्राहं
सा... मार्कण्डेयपूजनार्थं... भाजनार्थं अमुकगोत्रस्य अमुकशर्म्मणः... नैवेद्य... फल
नारिकेलताम्बूलैर्निमंत्रयेत्॥ ततो द्वितीयायां... स्नानादिकं विधाय... श्रीरविस्वपरिधाय... भोजयेत्

१ श्रीगणेशायनमः॥ ॥अथ कार्त्तिकशुक्लद्वितीयायां भ्रातृपूजाविधिर्लिख्यते॥ ॥दीपप्रज्वालनं [redacted]॥ अद्येत्यादि कार्त्तिक
कशुक्लद्वितीयायां तिथौ यथानामगोत्राया अमुकदेव्याः मम श्रुतिस्मृतिपुराणोक्तफलावाप्त्यर्थं दीपकलशयमयमुना
चित्रगुप्तयमदूतमार्कण्डेयाश्वत्थामा चिरंजीविपूर्वकं भ्रातृपूजनमहं करिष्ये॥ इति संकल्प्य॥ ॥दीपकलशगणेशान् पूजयेत्॥
यथामिलितोपचारेण स्वस्वमंत्रेण यमयमुनाचित्रगुप्तयमदूतान् पूजयेत्॥ [redacted] यमायार्घं दद्यात्॥ ॥मंत्रः॥ एह्ये
हि मार्त्तण्डज पाशहस्त यमान्तकालोकधरामरेश॥ भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घं भगवन्नमस्ते॥ ॥प्रणाममंत्रः॥ धर्म
राजनमस्तुभ्यं नमस्ते यमुनाग्रज॥ पाहि मां किंकरैः सार्द्धं सूर्यपुत्र नमोस्तु ते॥ यमस्वसर्नमस्तेस्तु यमुने लोकपूजिते॥ वरदा भव
मे नित्यं सूर्यपुत्रि नमोस्तु ते॥ माषतण्डुलबलिं दद्यात्॥ ततः दक्षिणदिशि स्थापयेत्॥ पुनरावमनं कृत्वा॥ पूर्वे मार्कण्डेयं॥ आ
ग्नेये बलिं॥ दक्षिणे व्यासं॥ नैरृत्यां हनुमन्तं॥ पश्चिमे विभीषणं॥ वायव्यां कृपं॥ उत्तरे द्रोणिं॥ ईशान्यां परशुरामं॥ स्वस्वम
न्त्रेण पूजयेत्॥ ॥प्रार्थनामंत्रः॥ मार्कण्डेय महाभाग सप्तकल्पान्तजीवन॥ चिरंजीवि यथा त्वं हि तथा मे भ्रातरं कुरु॥ भ्रातृ
भगिन्ये प्रार्थनामंत्रः॥ भद्रे भगिनि शुभगे त्वं देहि सरसीरुहे॥ श्रेयसे च नमस्तुभ्यं आगतोस्मि तवालयम्॥ ततः मध्ये भ्रातृपूज
× तत्रस्थाल्यां अष्टदलं विलिख्य मध्ये फलपुष्पाक्षतैर्यममावाहयेत्॥ ॐ यमाय त्वेति मन्त्रेण ॐ साङ्गाय सपरिवाराय सा
युधाय सवाहनाय ॐ यमाय नमः॥ इति यमं संपूज्य॥ इंद्रं खेद धि वन्दनदूर्वाक्षतान् संस्थाप्य॥ ७ × तत्रैवाष्टदले यथामिलितोपचारैः पूजयेत्॥
दीपं पूजयेत्॥ यमुना धर्म्म धर्म्मराज चित्र चित्रगुप्त काल कालविकरण यमदूत... आदिनमः॥ ...दानैः धूपदीपनैवेद्यादिभिः पूजयेत्॥
अथ प्रार्थना॥ ५ × अत्र पिष्टाष्टदलमध्ये भ्रातरं संस्थाप्य॥ पूर्वादिक्रमेणावाहनादि नमस्कारान्तैः मार्कण्डेयादि अष्ट देवतान् संपूज्य प्रार्थयेत्॥

भ्रातायुः संवृद्धिपूर्वकं २

= मदङ्घ्रि...

× पूर्वादिक्रमेण

× म्रसीभाग्य... प्र...
...गंधनैव्ये॥ दिनी...
...नादिविधाय ...
...यित्वा ...सारं...
...संपाद्य अपराह्णे
...भ्रातरमभ्यर्च्य ...
...भ्यो पूर्वाभिमुखे
...ता २
× इति मन्त्रेणार्घं
दत्वा प्रार्थयेत्॥ ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो दर्शदिने प्राप्ते सुप्रतिष्ठमनानरः॥ स्नात्वा देवान्मनुष्यांश्च पितॄंश्चापि हि तर्पयेत्॥ तस्यां महोत्सवः कार्य्यो दीपमाल्यावरानने॥ रात्रौ
दीपाः प्रदातव्या गृहे तीर्थे चतुष्पथे॥ आरामे च गवां गोष्ठे पितृणां त्वग्निकारका॥ दीपवृक्षास्तथा कार्य्याः शक्त्या देवगृहेषु च॥ दीपमा
ल्यापरिक्षिप्ते प्रदोषे नन्दनं नरः॥ ततः प्रदोषसमये दीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च॥ ब्रा लिं· अमावास्या च

अथ दीपावलिकामावास्यायां लक्ष्मीपूजाविधिर्लिख्यते॥ ॥ततो निशामुखे कृतनित्यः शुचिराचान्तः उदङ्मुखः उपवि
श्याचम्य पूजामारभेत्॥ तद्यथा॥ तत्रादौ लक्ष्मीविष्णोः प्रतिमे पीठे परिस्थापयेत्॥ तत्रादौ गणपतिं स्मृत्वा स्वस्तिवाचनपु
ण्याहवाचनं कुर्यात्॥ तत्र कलशस्थापनविधिना कलशं संस्थाप्य॥ तत्र कलशस्कन्धप्रदेशे गणपतिदुर्गावायाकाशा
श्विनीकुमार पंचदेवता॥ सूर्यादिनवग्रहानिन्द्रादिदशदिक्पालान्ब्रह्मविष्णुशिवस्कन्दकुबेरनन्दीन्कुलदेवतां च
पूजयेत्॥ तत्र संकल्पः॥ ॥ॐ तत्सत् अद्य विष्णुः ३ अद्येत्यादि देशकालादीन्संकीर्त्य· अमुकगोत्रस्यामुकशर्मणो मम सप
रिवारस्य जन्मजन्मोपार्जिताशेषकल्मषोपशमनद्वारा श्रीनृजन्मनि सकलपुत्रपौत्रादिसहितसकलधनकनकाः
दिनानालक्ष्मीभोगोत्तर चिरविष्णुपुरवासकामनया अनेकविधलक्ष्मीवर्द्धमानकामाय सदनस्थितलक्ष्मीस्थिरकामः
नया गणपतिदुर्गावायाकाशाश्विनीकुमारेन्द्रादिदिक्पाल सूर्यादिनवग्रहब्रह्मविष्णुशिवस्कन्दकुबेरनन्दिकुलदे
वतापूजापूर्वकं लक्ष्मीपूजनमहं करिष्ये॥ इति संकल्प्य॥ ॥तत्र प्रथमं गणानां त्वेति मन्त्रेण पंचोपचारैर्गणपतिं पूज
येत्॥ ततो बद्धाञ्जलिः प्रार्थयेत्॥ वक्रतुण्डेत्यादिना प्रार्थ्य गणपते क्षमस्व॥ एवं क्रमेण सर्वाः संकल्पितदेवताः पूज्याः॥ त

तुर्दश्यां प्रदोषे दीपदानतः॥ यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰ पू॰

तोविशेषेणलक्ष्मींपूजयेत्॥ ॐ मनोजूतिः॥ ॐ श्रीश्च॥ इतिमंत्राभ्यामावाह्यस्थापयेत्॥ ॥अथध्यानम्॥ ॐ पद्मासनां॥
गौरवर्णांसर्वालंकारभूषिताम्॥ रौक्मपद्मव्यग्रहस्तांवरदांदक्षिणेनतु॥ ॥अथासनं॥ संसारार्णवमग्नानांत्राहिमांच
हरिप्रिये॥ पद्मासनेनमस्तुभ्यंनमस्तेस्तुहरिप्रिये॥ श्रीश्च॥ ॥अथपाद्यम्॥ यस्मात्वंसर्वदेवानांत्रासयेभूर्भुवादिकम्॥ ततः
पापालयमांनित्यंत्वदंघ्रिशरणागतः॥ श्रीश्च॥ ॥अथार्घ्यं॥ पद्मासनेनमस्तुभ्यंविष्णुप्रियेनमोस्तुते॥ गृहाणार्घ्यंमयादत्तं
प्रसन्नाभवईश्वरी॥ श्रीश्च॥ ॥अथाचमनं॥ देवदेवेनमस्तुभ्यंमखिजेत्वनमोनमः॥ गृहाणाचमनंचैतत्त्रैलोक्यवरदेनमः
श्रीश्च॥ ॥अथस्नानम्॥ हरिवल्लभेनमस्तुभ्यंविष्णुप्रियेनमोस्तुते॥ स्नानंगृहाणभोपद्मेत्राहिमांगरुडध्वजे॥ श्रीश्च॥ ॥
अथपंचामृतस्नानं॥ आप्यायस्वेतिगोतमऋषिःपयोदेवतागायत्रीछन्दःक्षीरस्नानेविनियोगः॥ आपोअस्मानित्यस्यप्रजाः
पतिऋषिरनुष्टुप्छन्दःआपोदेवताशुद्धोदकस्नानेविनियोगः॥ आपोअस्मान्॥ दधिक्राव्णइतिवामदेवऋषिर्दधिदेव
ताऽनुष्टुप्छन्दोदधिस्नानेविनियोगः॥ ॐ दधिक्राव्णः॥ ततःशुद्धोदकेन॥ ॐ घृतंमिमिक्षइतिगृत्समदऋषिर्घृतंदेवता
त्रिष्टुप्छन्दोघृतस्नानेविनियोगः॥ ॐ घृतंमिमिक्षे॥ ततःशुद्धोदकेन॥ ॐ मधुवातेतिऋचस्यगोतमऋषिर्मधुदेवतागाय

रामः
२

लक्ष्मीपूजानंतरमस्मिन्नेव कुवेरपूजनम्॥ संकल्प्य ध्यायेत्॥ चतुर्दन्तगजारूढो वज्रपाणिः पुरन्दरः॥ शचीपतिश्च ध्यातव्यो नानावर्णविभूषितः॥ पाद्यादिभिः संपूज्य प्रणमेत्
विचित्रैरावतस्थाय भास्वत्कुलिशपाणये। पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नमः॥ इतीन्द्रं संपूज्य बलिं समर्पयेत्॥ पाद्यादिभिः संपूज्य प्रार्थयेत्॥ धनदाय नमस्तुभ्यं निधिपद्माधिप
मां सचन्सागां यथा शास्त्रलक्ष्मीमाचष्टाल स्यसंपूज्य प्रदद्यात्॥ अथ देहल्यादिस्थमुक्को हस्तुतिस्तु निपुणगणो नाफलावाप्तये श्रीविष्णोः प्रीतये॥

त्री छन्दो मधुस्नाने विनियोगः॥ ॐ मधु वाता॥ शुद्धोदकेन स्वादुरिति वेमा ऋषिः शर्करा देवता जगती छन्दः शर्करास्नाने विनि
योगः॥ ॐ स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतु नाम्ने॥ स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदा
भ्यः॥ ततः शुद्धोदकस्नानम्॥ अथ पट्टवस्त्रम्॥ ॥ ॐ वस्त्रयुग्मं शुभं यस्माद्वासुदेवस्य वल्लभम्॥ वस्त्रं गृहाण भो पद्मे देवानां व
रदे नमः॥ ॐ श्रीश्च॥ अथ सिन्दूरम्॥ सिन्दूरं तारकयुतान्वितं वसुकण्ठसूत्रेण हरिद्रया च॥ सुतं गृहाणोभ्यरि कुंकुमेन तत्सौभा
ग्यहेतुं मम मंगलं यत्॥ श्रीश्च॥ नाभिर्मे॥ अथालंकरणानि॥ ॐ हस्तानो रुक्मः॥ श्रीश्च॥ कुंकुमागरुकस्तूरिकेशरैर्निर्मितं सुरा
गंधाढ्यं चन्दनं दिव्यं गृहाण वसुरेश्वरी॥ श्रीश्च॥ अथाक्षता॥ श्वेतान्कुंकुमसंयुक्तानुत्तमान् शालितण्डुलान्॥ अर्पयिष्यामि
भो पद्मे प्रीत्यर्थं प्रतिगृह्यताम्॥ श्रीश्च॥ अथ पुष्पाणि॥ पुष्पाणि च सुगंधीनि मालत्यादीनि पद्मजे॥ मया दत्तानि पुष्पाणि पूजा
र्थं प्रतिगृह्यतां॥ श्रीश्च॥ अथ धूपः॥ वनस्पतिरसोद्भिव्यो गंधाढ्यः सुमनोहरः॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यतां॥ श्रीश्च॥
अथ दीपः॥ यज्ज्योतिः सर्वदेवानां तेजसां तेजउत्तमम्॥ आत्मज्योतिः परं धामदीपोऽयं प्रतिगृह्यताम्॥ श्रीश्च॥ अथ नैवेद्यम्॥ अ
न्नं चतुर्विधं स्वादु भूतानां जीवनं परम्॥ नैवेद्यन्तु मया दत्तमम्बिके प्रतिगृह्यताम्॥ श्रीश्च॥ अथ ताम्बूलं॥ पूगीफलं सताम्बूलं रवा

ल॰पू॰

दिरं चमनोहरम्॥ पवित्रीकृतमत्यंतं तांबूलं प्रतिगृह्यतां॥ श्री श्री॥ लवंगादिसुगंधिद्रव्यं॥ केशपाशमंजनादिस्नाभूषणं॥
उपायनम्॥ चामरम्॥ अथ द्रव्यादिपूजा॥ हिरण्यगर्भ॰॥ अथ प्रदक्षिणा॥ अथ नीराजनम्॥ अग्निर्ज्योतिः॥ अग्निर्देवता॥ ॐ न
मस्ते सर्वदेवेभ्यो वरदासि हरिप्रिये॥ या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात्॥ ॐ श्री श्री॥ अथ नमस्कारः॥ पद्मासने नम
स्तुभ्यं हरिप्रिये नमोस्तु ते॥ अविज्ञे च नमस्तुभ्यं देवानां वरदे नमः॥ श्री श्री॥ अथ दीपदानम्॥ ॐ अद्येत्यादि देशकालादीन्सं
कीर्त्यामुकगोत्रस्यामुकशर्मणो मम सपरिवारस्य धनधान्यराज्यलक्ष्मीवृद्धिप्राप्तिपूर्वकनानैश्वर्यभोगोत्तरदिव्यविमा
नगमनपूर्वकेन्द्रलोकमहितत्वकाम एतानष्टाधिकशतत्रयपरिमितान् तैलप्रज्वलितदीपानग्निदेवतान् श्रीराधाया
मोदरप्रीतये दातुमहमुत्सृजे॥ ततो लक्ष्मीप्रीत्यर्थं नृत्यगीतवाद्यादिकं देव्या अग्रे कुर्यात्॥ ततो ब्राह्मणेभ्यो यथाशक्ति — राम॰
दक्षिणां दद्यात्॥ ततः स्वेष्टैः सह नारिकेलोदकं पीत्वा स्वपरिवारैः सह भुंजीत॥ न चैव रात्रौ अक्षक्रीडां कुर्वन् जागरणं कुर्या — ३
वारं गते निशीथे तु जने निद्रार्द्धलोचने॥ तावन्नगरनारीभिः सूर्पडिण्डिमवादनैः॥ निष्काश्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांग
णात्॥ इति लक्ष्मीपूजा॥ ॥ अथ गोपूजाविधिः॥ पद्मपुराणे॥ गोवर्द्धनधराधार कुलसंत्राणकारक॥ मधुरायां तथान्यत्र
अग्निष्टोमजने[illegible]॥ भूमिपदक्षे संयोगे क्रीडनं तु गवामतम्॥ प्रातर्गुण[illegible] कुर्यात्सुन्दर[illegible]॥ [illegible] क्रीडनं गवामभि निवृत्ता
प्रातः कालव्यापिन्युक्ता गोक्रीडनादौ प्रतिपद्भाति॥ तथा [illegible] क्रीडने [illegible] मासि राजा [illegible] तथा॥ इति देवलेन
प्रतीतस्य [illegible] ॥ [illegible] निमित्तिः॥ ॥ १ पृ२

कृत्वागोवर्द्धनंहरिम्॥गोमयेनमहास्थूलंतत्रपूज्योगिरिस्तथा॥गोवर्द्धनहरेःपूजांगोमहिष्यादिपूजनं॥भूषणीयास्तथागा
नादिना२ वःपूज्याश्चावाहदोहनाः॥महिष्यादेस्तथाभूषाक्रीडनंरावणंतथा॥तत्रक्रमः॥स्नातःशुचिराचान्तःकृतनित्यक्रियोगोष्ठे
गत्वागोवर्द्धनादीन्पूजयेत्॥अद्येत्यादिअमुकगोत्रोमुकशर्माहंआत्मश्रेयसेदीपकलशगणेशपूजापूर्वकगोवर्द्धनगोपा
ये३ लगोवृषमहिषमहिषीःपूजयिष्ये॥इतिसंकल्प्य॥गोमयप्रतिमायां॥ॐमनोजूतिरितिप्रतिष्ठाप्य॥ ॥बलिराजस्यराः
ज्ञेयोद्वारपालोभवस्वसु॥निजवाक्यार्जनार्थंलसगोवर्द्धनगोपते॥भूर्भुवःस्वर्गोवर्द्धनसहितगोपालेहागच्छेहतिष्ठइ
तिस्थापयित्वा॥ ॥अर्घार्घं॥गोवर्द्धनसहितगोपालायनमः॥ ॥अक्षतं॥इदमनुलेपनंगोवर्द्धनसहितगोपालाय
नमः॥अथाक्षताः॥पुष्पाणि॥धूप-दीप-नैवेद्य-पक्वान्नादि॥गोवर्द्धनसहितगोपालायनमः॥इतिसंपूज्यनत्वाप्रार्थयेत्॥
कार३ गोवर्द्धनधराधारगोकुलत्राणकारक॥विष्णुबाहुकृतोच्छ्रायगवांकोटिप्रदोभव॥गोपालमूर्त्तेविश्वेशशक्रोत्सवविभेद
क॥गोवर्द्धनकृतच्छत्रपूजांमेहरगोकुले॥इतिनमस्कृत्य॥ततःपूर्वाभिमुखीपूज्याकृष्णागौर्लिप्तभूतले॥ततोपिपूजयेद्भ
क्त्यापुष्पैर्गंधाधिवासितैः॥मंत्रैःपुराणसंप्रोक्तैर्यथास्थानंयथाविधि॥अग्न्यपादादितःपूज्यापश्चात्पादद्वयावधि॥ततो

गाम ग्रतः कृत्वा पूर्वाभिमुखीं वत्समात्यादिभिर्युतासंभवमलंकृत्य॥ अर्घ्यं गृहीत्वा॥ इमामेतिमंत्रेण॥ अर्घ्यं दत्वा॥ ॐ नमो
गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमः॥ गोराज्ञाय नमः॥ गोशृंगाभ्यो नमः॥ गोस्कंधाभ्यो न
मः॥ गोपुच्छाभ्यो नमः॥ गोपश्चाद्भ्यो नमः॥ गोः सर्वांगेभ्यो नमः॥ स्थानेष्वेतेषु गंधादीन् क्षिपेत् पुष्पमानसः॥ पश्चान्नदीपयेत् धू
पगो धूपः प्रतिगृह्यतां॥ अग्निपर्यादिकं धीरं नदीवैतरणी तथा॥ प्रमादात्तेतरिष्यामि गोमातस्ते नमो नमः॥ इति नमस्कृत्य॥
अथ धूपदीपः॥ आनंददा सदा लोके देवानां च सदा प्रिया॥ गोत्वं पाहि जगन्नाथे दीपोयं प्रतिगृह्यतां॥ अथ नैवेद्यं॥ वस्त्राच्छा
दनं॥ आच्छादनं गवे दद्यात् त्वमप्यकृपुष्ट सुनिर्मलं॥ सुरभिर्वस्त्रदानेन प्रीयतां परमेश्वरी॥ इत्याच्छादनमंत्रः॥ सदन्नस्य चयो भागी
गोपुरस्तादर्पमेव च॥ नैवेद्यं हि मया दत्तं सुरभिः प्रीयतामिति॥ द्वितीयं गुरवे दद्यात् तृतीयं स्वयमेव च॥ एवं चंदनपुष्पाद्यैर्धूप ॥राम॥
दीपनैवेद्यैः पूजयेत्॥ ततः प्रणमेत्॥ लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता॥ घृतं वहति यज्ञार्थे मम पापं व्यपोहतु॥ ब्र ॥ ४ ॥
दत्तासि वशिष्ठेन विश्वामित्रेण धीमता॥ सुरभे हर पापं मे यन्मया दुष्कृतं कृतं॥ या कामधेनुर्भवने स्थिति विरंचेर्या धेनुरसौ ज्ञम
दग्निगेहे॥ यासौरभेयी च वशिष्ठगेहे सा कामधेनुर्वरदा ममास्तु॥ ततो गोमतिं विप्रांज पन्नुप्रार्थयेत्॥ ॥सा च मह्यमारक्ते

गावो मामुपतिष्ठन्तु हेमशृंग्यः पयोमुचः॥ सुरभ्यः सौरभेयाश्च सरितः सागरं यथा॥ गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा॥
गावोस्माकं वयं तासां यतो गावस्ततो वयम्॥ ॥तथा चमयेनापि॥ गावः सुरभयो नित्यं गावो गुग्गुलुगंधिकाः॥ गावः प्रतिष्ठा
भूतानां गावः स्वस्त्ययनं महत्॥ अन्नमेव परं गावो देवानां हविरुत्तमम्॥ पावनं सर्वभूतानां क्षरन्ति च वहन्ति च॥ हविषा मंत्र-
पूतेन तर्पयंत्यमरान्दिवि॥ ऋषीणामग्निहोत्रेषु गावो होमे प्रतिष्ठिता॥ सर्वेषामेव भूतानां गावः शरणमुत्तमम्॥ गावः पवित्रं
परमं गावो मंगलमुत्तमं॥ यासां खुरोत्थितो रेणुर्गंगावारिसमो भवेत्॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥ नमो ब्रह्मसुता-
भ्यश्च पवित्राभ्यो नमो नमः॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्॥ एकत्र मंत्रास्तिष्ठन्ति हविरेकत्र तिष्ठति॥ ॥स्कांदे-
॥शृंगाग्रे सर्वतीर्थानि खुराग्रे सर्वपर्वताः॥ शृंगयोरंतरं तासां साक्षाद्गौरी महेश्वरी॥ गोमयं यत्तु तासां सा साक्षान्मूत्रे नर्मदा शुभा॥ गं-
गा शिरस्तु यासां वै ताः संतु वरदा मम॥ अग्रतः सन्तु मे गावो गावो मे संतु पृष्ठतः॥ गावो मे हृदये सन्तु गवां मध्ये वसाम्यहं॥ ग-
वामंगेषु तिष्ठन्ति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च॥ एवं स्तुत्वा नमस्कृत्य कृत्वा येन प्रदक्षिणा॥ प्र-
दक्षिणीकृता तेन सप्तद्वीपा वसुंधरा॥ या लक्ष्मीः सर्वभूतानां या देवेषु व्यवस्थिता॥ धेनुरूपेण सा देवि मम पापं व्यपोहतु॥ विसो-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

× कार्त्तिके कृष्णपक्षे च चतुर्दश्यां विधूदये । अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥ तैले लक्ष्मीर्जले गङ्गा दीपावल्याश्चतुर्दशीम् । प्रातःस्नानं तु यः कु
र्यो यमलोकं न पश्यति ॥ स मष्ठलो ष्टानाहत्यापामार्गो च बृहतीसुतान । भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै ॥ ५
नयोदश्यां कार्त्तिकस्य कृष्णायां गजगां मिति ॥ स्नात्वा तीर्थे वह्निर्दद्याद्यमदीपं सुशोभनम् ॥ मन्त्रं पाशधरः कृष्णः कालदण्डधरो महान् ॥ तुष्टो भवतु दीपदानेन त्रयोदश्यां सधर्मराट् ॥ इति मंत्रेरा

॥ व्रतार्क ॥

श्रीगणेशाय नमः ॥ ॥ अथ नरकचतुर्दशी विधिः ॥ तत्र पूर्वस्मिन् दिने सीता लोष्ठापामार्ग बृहती पत्राणि संगृह्य । त
तः प्रातस्तिलतैले नाभ्यज्य सीता लोष्ठादीनि शीर्षोपरि भ्रामयन् श्लोकं पठेत् ॥ यथा ॥ ॥ सीतालोष्ठसमायुक्त
सकंटकदलान्वित ॥ हर पापमपामार्ग भ्राम्यमानः पुनः पुनः ॥ इति ॥ ततः स्नात्वा तुलावाराद्दीपचतुष्टयं प्रज्वाल्य संपूज्य दी
पदानं कुर्यात् अनेन मंत्रेण ॥ शुनकौ श्यामशबलौ भ्रातरौ यमसेवकौ ॥ तुष्टौ स्यातां चतुर्दश्यां दीपदानेन मृत्युदावि
ति ॥ ततः समाचारात् रित्यारभ्य राचंदनपुष्पाक्षतधूपमाल्यधूपदीपनैवेद्यादिभिः संपूज्य सोपचारमोदनं नृ
नकायदद्यात् ॥ त्रयोदशी मारभ्य द्वितीयापर्यंतं संध्यासमये द्वारकोष्ठभाण्डशालादिस्थानेषु दीपमालाकर्त्तव्ये
ति समाचारः ॥ ॥ इति नरकचतुर्दशी विधिः संपूर्णः समाप्ताः ॥ ॥ धर्मराजाय नमः ॥ कृष्णाय नमः ॥ वासुदेव
ततोऽदर्शदिने प्रातः प्रतिष्ठमनानरः स्नात्वा देवान् मनुष्यांश्च पितॄन् पिण्डितर्पयेत ॥ तस्यां महोत्सवः
कार्यो दीपावल्यां वरानने ॥ रात्रौ दीपाः प्रदातव्या गृहे तीर्थे चतुष्पथे ॥ आरामे च गवां गोष्ठे पितॄणां
तृप्तिकाः ॥ दीपवृक्षास्तथा कार्याः शक्त्या देवगृहेषु च ॥ दीपमाल्यापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥ ततः प्र
× सप्तवारं समावर्त्य क्षिपेन्नात्याथ दिग्दले ॥ स्नात्वार्द्रवस्त्रः प्रदद्याद्दीपं मृत्युपुत्रयोः ॥ ५

ततो यमाय धर्मराजाय च दीपदानं कुर्यात् ५

× कार १

पुनःपुनः
पुनःपुन

गौर्थ

रामः
१